# Skandapurana Chapters 1-25

# સ્કન્દપુરાણ ૧

## Document Information

Text title : skandapuraaNa

File name : skandapur.itx

Category : purana, subrahmanya

Location : doc_purana

Transliterated by : bakker

Proofread by : bakker

Description-comments : skandapuraaNa

Source : GRETIL

Latest update : September 29, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# Skandapurana Chapters 1-25

# સ્કન્દપુરાણ ૧

## સ્કંદપુરાણ અધ્યાય ૧

SP0010011 નમઃ પરમદેવાય ત્રૈગુણ્યાવિજિતાત્મને ।
SP0010012 સર્વતો યોગરૂપાય સંસારાભાવહેતવે ॥

SP0010021 સ્થિતિસંરોધસર્ગાણાં હેતવેઽન્તઃપ્રસારિણે ।
SP0010022 ષડ્વિંશાય પ્રધાનાય મહાદેવાય ધીમતે ॥

SP0010031 પ્રજાપતેર્મહાક્ષેત્રે ગઙ્ગાકાલિન્દિસંગમે ।
SP0010032 પ્રયાગે પરમે પુણ્યે બ્રહ્મણો લોકવર્ત્મનિ ॥

SP0010041 મુનયઃ સંશિતાત્માનસ્તપસા ક્ષીણકલ્મષાઃ ।
SP0010042 તીર્થસમ્પ્લવનાર્થાય પૌર્ણમાસ્યાં કૃતાહ્નિકાઃ ॥

SP0010051 પૌરાણિકમપશ્યન્ત સૂતં સત્યપરાયણમ્ ।
SP0010052 સ્નાત્વા તસ્મિન્મહાતીર્થે પ્રણામાર્થમુપાગતમ્ ॥

SP0010061 દૃષ્ટ્વા તે સૂતમાયાન્તમૃષયો હૃષ્ટમાનસાઃ ।
SP0010062 આશાસ્યાસનસંવેશં તદ્યોગ્યં સમકલ્પયન્ ॥

SP0010071 સ પ્રણમ્ય ચ તાન્સર્વાન્સૂતસ્તાન્મુનિપુંગવાન્ ।
SP0010072 પ્રદત્તમાસનં ભેજે સર્વધર્મસમન્વિતઃ ॥

SP0010081 તમાસીનમપૃચ્છન્ત મુનયસ્તપસૈધિતાઃ ।
SP0010082 બ્રહ્મસત્રે પુરા સાધો નૈમિશારણ્યવાસિનામ્ ॥

SP0010091 કથિતં ભારતાખ્યાનં પુરાણં ચ પરં ત્વયા ।
SP0010092 તેન નઃ પ્રતિભાસિ ત્વં સાક્ષાત્સત્યવતીસુતઃ ॥

SP0010101 સર્વાગમપરાર્થજ્ઞઃ સત્યધર્મપરાયણઃ ।
SP0010102 દ્વિજપૂજારતો નિત્યં તેન પૃચ્છાં ત્વમર્હસિ ॥

SP0010111 ભારતાખ્યાનસદૃશં પુરાણાદ્યદ્વિશિષ્યતે ।
SP0010112 તત્ત્વા પૃચ્છામ વૈ જન્મ કાર્ત્તિકેયસ્ય ધીમતઃ ॥

SP0010121 ઇમે હિ મુનયઃ સર્વે ત્વદુપાસ્તિપરાયણાઃ ।
SP0010122 સ્કન્દસમ્ભવશુશ્રૂષાસંજાતૌત્સુક્યમાનસાઃ ॥

SP0010131 એવમુક્તસ્તદા સૂતઃ સંસિદ્ધૈર્મુનિપુંગવૈઃ ।
SP0010132 પ્રોવાચેદં મુનીન્સર્વાન્વચો ભૂતાર્થવાચકમ્ ॥

SP0010141 શ‍ૃણુધ્વં મુનયઃ સર્વે કાર્ત્તિકેયસ્ય સમ્ભવમ્ ।
SP0010142 બ્રહ્મણ્યત્વં સમાહાત્મ્યં વીર્યં ચ ત્રિદશાધિકમ્ ॥

SP0010151 મુમુક્ષયા પરં સ્થાનં યાતે શુકમહાત્મનિ ।
SP0010152 સુતશોકાભિસંતપ્તો વ્યાસસ્ત્ર્યમ્બકમૈક્ષત ॥

SP0010161 દૃષ્ટ્વૈવ સ મહેશાનં વ્યાસોઽભૂદ્વિગતવ્યથઃ ।
SP0010162 વિચરન્સ તદા લોકાન્મુનિઃ સત્યવતીસુતઃ ॥

SP0010171 મેરુશ‍ૃઙ્ગેઽથ દદૃશે બ્રહ્મણઃ સુતમગ્રજમ્ ।
SP0010172 સનત્કુમારં વરદં યોગૈશ્વર્યસમન્વિતમ્ ॥

SP0010181 વિમાને રવિસંકાશે તિષ્ઠન્તમનલપ્રભમ્ ।
SP0010182 મુનિભિર્યોગસંસિદ્ધૈસ્તપોયુક્તૈર્મહાત્મભિઃ ॥

SP0010191 વેદવેદાઙ્ગતત્ત્વજ્ઞૈઃ સર્વધર્માગમાન્વિતૈઃ ।
SP0010192 સકલાવાપ્તવિદ્યૈસ્તુ ચતુર્વક્ત્રમિવાવૃતમ્ ॥

SP0010201 દૃષ્ટ્વા તં સુમહાત્માનં વ્યાસો મુનિમથાસ્થિતમ્ ।
SP0010202 વવન્દે પરયા ભક્ત્યા સાક્ષાદિવ પિતામહમ્ ॥

SP0010211 બ્રહ્મસૂનુરથ વ્યાસં સમાયાતં મહૌજસમ્ ।
SP0010212 પરિષ્વજ્ય પરં પ્રેમ્ણા પ્રોવાચ વચનં શુભમ્ ॥

SP0010221 દિષ્ટ્યા ત્વમસિ ધર્મજ્ઞ પ્રસાદાત્પારમેશ્વરાત્ ।
SP0010222 અપેતશોકઃ સમ્પ્રાપ્તઃ પૃચ્છસ્વ પ્રવદામ્યહમ્ ॥

SP0010231 શ્રુત્વાથ વચનં સૂનોર્બ્રહ્મણો મુનિપુંગવઃ ।
SP0010232 ઇદમાહ વચો વિપ્રાશ્ચિરં યદ્ધૃદયે સ્થિતમ્ ॥

SP0010241 કુમારસ્ય કથં જન્મ કાર્ત્તિકેયસ્ય ધીમતઃ ।
SP0010242 કિંનિમિત્તં કુતો વાસ્ય ઇચ્છામ્યેતદ્ધિ વેદિતુમ્ ॥

SP0010251 કથં રુદ્રસુતશ્ચાસૌ વહ્નિગશણ્ગાસુતઃ કથમ્ ।
SP0010252 ઉમાયાસ્તનયશ્ચૈવ સ્વાહાયાશ્ચ કથં પુનઃ ।
SP0010253 સુપર્ણ્યાશ્ચાથ માત્।ૠ◌્ણાં કૃત્તિકાનાં કથં ચ સઃ ॥

SP0010261 કશ્ચાસૌ પૂર્વમુત્પન્નઃ કિંતપાઃ કશ્ચ વિક્રમઃ ।
SP0010262 ભૂતસમ્મોહનં હ્યેતત્કથયસ્વ યથાતથમ્ ॥

SP0010270 સૂત ઉવાચ ।
SP0010271 એવં સ પૃષ્ટસ્તેજસ્વી બ્રહ્મણઃ પુત્રસત્તમઃ ।
SP0010272 ઉવાચ સર્વં સર્વજ્ઞો વ્યાસાયાક્લિષ્ટકારિણે ।
SP0010273 તચ્છૃણુધ્વં યથાતત્ત્વં કીર્ત્યમાનં મયાનઘાઃ ॥

SP0019999 ઇતિ સ્કન્દપુરાણે પ્રથમોઽધ્યાયઃ ॥

## સ્કંદપુરાણ અધ્યાય ૨

SP0020010 સનત્કુમાર ઉવાચ ।
SP0020011 પ્રપદ્યે દેવમીશાનં સર્વજ્ઞમપરાજિતમ્ ।
SP0020012 મહાદેવં મહાત્માનં વિશ્વસ્ય જગતઃ પતિમ્ ॥

SP0020021 શક્તિરપ્રતિઘા યસ્ય ઐશ્વર્યં ચૈવ સર્વશઃ ।
SP0020022 સ્વામિત્વં ચ વિભુત્વં ચ સ્વકૃતાનિ પ્રચક્ષતે ॥

SP0020031 તસ્મૈ દેવાય સોમાય પ્રણમ્ય પ્રયતઃ શુચિઃ ।
SP0020032 પુરાણાખ્યાનજિજ્ઞાસોર્વક્ષ્યે સ્કન્દોદ્ભવં શુભમ્ ॥

SP0020041 દેહાવતારો દેવસ્ય રુદ્રસ્ય પરમાત્મનઃ ।
SP0020042 પ્રાજાપત્યાભિષેકશ્ચ હરણં શિરસસ્તથા ॥

SP0020051 દર્શનં ષટ્કુલીયાનાં ચક્રસ્ય ચ વિસર્જનમ્ ।
SP0020052 નૈમિશસ્યોદ્ભવશ્ચૈવ સત્ત્રસ્ય ચ સમાપનમ્ ॥

SP0020061 બ્રહ્મણશ્ચાગમસ્તત્ર તપસશ્ચરણં તથા ।

SP0020062 શર્વસ્ય દર્શનં ચૈવ દેવ્યાશ્ચૈવ સમુદ્ભવઃ ॥

SP0020071 સત્યા વિવાદશ્ચ તથા દક્ષશાપસ્તથૈવ ચ ।
SP0020072 મેનાયાં ચ યથોત્પત્તિર્યથા દેવ્યાઃ સ્વયંવરમ્ ॥

SP0020081 દેવાનાં વરદાનં ચ વસિષ્ઠસ્ય ચ ધીમતઃ ।
SP0020082 પરાશરસ્ય ચોત્પત્તિર્વ્યાસસ્ય ચ મહાત્મનઃ ॥

SP0020091 વસિષ્ઠકૌશિકાભ્યાં ચ વૈરોદ્ભવસમાપનમ્ ।
SP0020092 વારાણસ્યાશ્ચ શૂન્યત્વં ક્ષેત્રમાહાત્મ્યવર્ણનમ્ ॥

SP0020101 રુદ્રસ્ય ચાત્ર સાંનિધ્યં નન્દિનશ્ચાપ્યનુગ્રહઃ ।
SP0020102 ગણાનાં દર્શનં ચૈવ કથનં ચાપ્યશેષતઃ ॥

SP0020111 કાલીવ્યાહરણં ચૈવ તપશ્ચરણમેવ ચ ।
SP0020112 સોમનન્દિસમાખ્યાનં વરદાનં તથૈવ ચ ॥

SP0020121 ગૌરીત્વં પુત્રલમ્ભશ્ચ દેવ્યા ઉત્પત્તિરેવ ચ ।
SP0020122 કૌશિક્યા ભૂતમાતૃત્વં સિંહાશ્ચ રથિનસ્તથા ॥

SP0020131 ગૌર્યાશ્ચ નિલયો વિન્ધ્યે વિન્ધ્યસૂર્યસમાગમઃ ।
SP0020132 અગસ્ત્યસ્ય ચ માહાત્મ્યં વધઃ સુન્દનિસુન્દયોઃ ॥

SP0020141 નિસુમ્ભસુમ્ભનિર્યાણં મહિષસ્ય વધસ્તથા ।
SP0020142 અભિષેકશ્ચ કૌશિક્યા વરદાનમથાપિ ચ ॥

SP0020151 અન્ધકસ્ય તથોત્પત્તિઃ પૃથિવ્યાશ્ચૈવ બન્ધનમ્ ।
SP0020152 હિરણ્યાક્ષવધશ્ચૈવ હિરણ્યકશિપોસ્તથા ॥

SP0020161 બલિસંયમનં ચૈવ દેવ્યાઃ સમય એવ ચ ।
SP0020162 દેવાનાં ગમનં ચૈવ અગ્નેર્દૂતત્વમેવ ચ ॥

SP0020171 દેવાનાં વરદાનં ચ શુક્રસ્ય ચ વિસર્જનમ્ ।
SP0020172 સુતસ્ય ચ તથોત્પત્તિર્દેવ્યાશ્ચાન્ધકદર્શનમ્ ॥

SP0020181 શૈલાદિદૈત્યસમ્મર્દો દેવ્યાશ્ચ શતરૂપતા ।
SP0020182 આર્યાવરપ્રદાનં ચ શૈલાદિસ્તવ એવ ચ ॥

SP0020191 દેવસ્યાગમનં ચૈવ વૃત્તસ્ય કથનં તથા ।
SP0020192 પતિવ્રતાયાશ્ચાખ્યાનં ગુરુશુશ્રૂષણસ્ય ચ ॥

SP0020201 આખ્યાનં પઞ્ચચૂડાયાસ્તેજસશ્ચાપ્યધૃષ્યતા ।
SP0020202 દૂતસ્યાગમનં ચૈવ સંવાદોઽથ વિસર્જનમ્ ॥

SP0020211 અન્ધકાસુરસંવાદો મન્દરાગમનં તથા ।
SP0020212 ગણાનામાગમશ્ચૈવ સંખ્યાનશ્રવણં તથા ॥

SP0020221 નિગ્રહશ્ચાન્ધકસ્યાથ યુદ્ધેન મહતા તથા ।
SP0020222 શરીરાર્ધપ્રદાનં ચ અશોકસુતસંગ્રહઃ ॥

SP0020231 ભસ્મસોમોદ્ભવશ્ચૈવ શ્મશાનવસતિસ્તથા ।
SP0020232 રુદ્રસ્ય નીલકણ્ઠત્વં તથાયતનવર્ણનમ્ ॥

SP0020241 ઉત્પત્તિર્યક્ષરાજસ્ય કુબેરસ્ય ચ ધીમતઃ ।
SP0020242 નિગ્રહો ભુજગેન્દ્રાણાં શિખરસ્ય ચ પાતનમ્ ॥

SP0020251 ત્રૈલોક્યસ્ય સશક્રસ્ય વશીકરણમેવ ચ ।
SP0020252 દેવસેનાપ્રદાનં ચ સેનાપત્યાભિષેચનમ્ ॥

SP0020261 નારદસ્યાગમશ્ચૈવ તારકપ્રેષિતસ્ય હ ।
SP0020262 વધશ્ચ તારકસ્યોગ્રો યાત્રા ભદ્રવટસ્ય ચ ॥

SP0020271 મહિષસ્ય વધશ્ચૈવ ક્રૌઞ્ચસ્ય ચ નિબર્હણમ્ ।
SP0020272 શક્તેરુદ્ધરણં ચૈવ તારકસ્ય વધઃ શુભઃ ॥

SP0020281 દેવાસુરભયોત્પત્તિસ્ત્રૈપુરં યુદ્ધમેવ ચ ।
SP0020282 પ્રહ્લાદવિગ્રહશ્ચૈવ કૃતઘ્નાખ્યાનમેવ ચ ।
SP0020283 મહાભાગ્યં બ્રાહ્મણાનાં વિસ્તરેણ પ્રકીર્ત્યતે ॥

SP0020291 એતજ્જ્ઞાત્વા યથાવદ્ધિ કુમારાનુચરો ભવેત્ ।
SP0020292 બલવાન્મતિસમ્પન્નઃ પુત્રં ચાપ્નોતિ સમ્મતમ્ ॥

SP0029999 ઇતિ સ્કન્દપુરાણે દ્વિતીયોઽધ્યાયઃ ॥

## સ્કંદપુરાણ અધ્યાય 3

SP0030010 સનત્કુમાર ઉવાચ ।
SP0030011 શ◌ૃણુષ્વેમાં કથાં દિવ્યાં સર્વપાપપ્રણાશનીમ્ ।

SP0030012 કથ્યમાનાં મયા ચિત્રાં બહ્વર્થાં શ્રુતિસમ્મિતામ્ ।
SP0030013 યાં શ્રુત્વા પાપકર્માપિ ગચ્છેચ્ચ પરમાં ગતિમ્ ॥

SP0030021 ન નાસ્તિકાશ્રદ્ધાને શઠે ચાપિ કથંચન ।
SP0030022 ઇમાં કથામનુબ્રૂયાત્તથા ચાસૂયકે નરે ॥

SP0030031 ઇદં પુત્રાય શિષ્યાય ધાર્મિકાયાનસૂયવે ।
SP0030032 કથનીયં મહાબ્રહ્મન્દેવભક્તાય વા ભવેત્ ।
SP0030033 કુમારભક્તાય તથા શ્રદ્ધાનાય ચૈવ હિ ॥

SP0030041 પુરા બ્રહ્મા પ્રજાધ્યક્ષઃ અણ્ડેઽસ્મિન્સમ્પ્રસૂયતે ।
SP0030042 સોઽજ્ઞાનાત્પિતરં બ્રહ્મા ન વેદ તમસાવૃતઃ ॥

SP0030051 અહમેક ઇતિ જ્ઞાત્વા સર્વાં/લ્લોકાનવૈક્ષત ।
SP0030052 ન ચાપશ્યત તત્રાન્યં તપોયોગબલાન્વિતઃ ॥

SP0030061 પુત્ર પુત્રેતિ ચાપ્યુક્તો બ્રહ્મા શર્વેણ ધીમતા ।
SP0030062 પ્રણતઃ પ્રાઞ્જલિર્ભૂત્વા તમેવ શરણં ગતઃ ॥

SP0030071 સ દત્ત્વા બ્રહ્મણે શમ્ભુઃ સ્રષ્ટૃત્વં જ્ઞાનસંહિતમ્ ।
SP0030072 વિભુત્વં ચૈવ લોકાનામન્તર્ધે પરમેશ્વરઃ ॥

SP0030081 તદેષોપનિષત્પ્રોક્તા મયા વ્યાસ સનાતના ।
SP0030082 યાં શ્રુત્વા યોગિનો ધ્યાનાત્પ્રપદ્યન્તે મહેશ્વરમ્ ॥

SP0030091 બ્રહ્મં ચ યો વિદધે પુત્રમગ્રે જ્ઞાનં ચ
યઃ પ્રહિણોતિ સ્મ તસ્મૈ ।
SP0030092 તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરાસ્તેષાં
શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥

SP0030101 સ વ્યાસ પિતરં દૃષ્ટ્વા સ્વદીપ્ત્યા પરયા યુતમ્ ।
SP0030102 પુત્રકામઃ પ્રજાહેતોસ્તપસ્તીવ્રં ચકાર હ ॥

SP0030111 મહતા યોગતપસા યુક્તસ્ય સુમહાત્મનઃ ।
SP0030112 અચિરેણૈવ કાલેન પિતા સમ્પ્રતુતોષ હ ॥

SP0030121 દર્શનં ચાગમત્તસ્ય વરદોઽસ્મીત્યુવાચ હ ।
SP0030122 સ તુષ્ટાવ નતો ભૂત્વા કૃત્વા શિરસિ ચાઞ્જલિમ્ ॥

SP0030131 નમઃ પરમદેવાય દેવાનામપિ વેધસે ।

SP0030132 સ્રષ્ટ્રે વૈ લોકતન્ત્રાય બ્રહ્મણઃ પતયે નમઃ ॥

SP0030141 એકસ્મૈ શક્તિયુક્તાય અશક્તિરહિતાય ચ ।
SP0030142 અનન્તાયાપ્રમેયાય ઇન્દ્રિયાવિષયાય ચ ॥

SP0030151 વ્યાપિને વ્યાપ્તપૂર્વાય અધિષ્ઠાત્રે પ્રચોદિને ।
SP0030152 કૃતપ્રચેતનાયૈવ તત્ત્વવિન્યાસકારિણે ॥

SP0030161 પ્રધાનચોદકાયૈવ ગુણિનાં શાન્તિદાય ચ ।
SP0030162 દૃષ્ટિદાય ચ સર્વેષાં સ્વયં વૈ દર્શનાય ચ ॥

SP0030171 વિષયગ્રાહિણે ચૈવ નિયમસ્ય ચ કારિણે ।
SP0030172 મનસઃ કરણાનાં ચ તત્રૈવ નિયમસ્ય ચ ॥

SP0030181 ભૂતાનાં ગુણકર્ત્રે ચ શક્તિદાય તથૈવ ચ ।
SP0030182 કર્ત્રે હ્યણ્ડસ્ય મહ્યં ચ અચિન્ત્યાયાગ્રજાય ચ ।
SP0030183 અપ્રમેય પિતર્નિત્યં પ્રીતો નો દિશ શક્વરીમ્ ॥

SP0030191 તસ્યૈવં સ્તુવતો વ્યાસ દેવદેવો મહેશ્વરઃ ।
SP0030192 તુષ્ટોऽબ્રવીત્સ્વયં પુત્રં બ્રહ્માણં પ્રણતં તથા ॥

SP0030201 યસ્માત્તે વિદિતં વત્સ સૂક્ષ્મમેતન્મહાદ્યુતે ।
SP0030202 તસ્માદ્બ્રહ્મેતિ લોકેષુ નામ્ના ખ્યાતિં ગમિષ્યસિ ॥

SP0030211 યસ્માચ્ચાહં પિતેત્યુક્તસ્ત્વયા બુદ્ધિમતાં વર ।
SP0030212 તસ્માત્પિતામહત્વં તે લોકે ખ્યાતિં ગમિષ્યતિ ॥

SP0030221 પ્રજાર્થં યચ્ચ તે તપ્તં તપ ઉગ્રં સુદુશ્ચરમ્ ।
SP0030222 તસ્માત્પ્રજાપતિત્વં તે દદાનિ પ્રયતાત્મને ॥

SP0030231 એવમુક્ત્વા સ દેવેશો મૂર્તિમત્યોऽસૃજત્સ્ત્રિયઃ ।
SP0030232 યાસ્તાઃ પ્રકૃતયસ્ત્વષ્ટૌ વિશેષાશ્ચેન્દ્રિયૈઃ સહ ।
SP0030233 ભાવાશ્ચ સર્વે તે દેવમુપતસ્થુઃ સ્વરૂપિણઃ ॥

SP0030241 તાનુવાચ તતો દેવઃ પતિર્યુક્તઃ સ્વતેજસા ।
SP0030242 એતમદ્યાભિષેકેણ સમ્પાદયત મા ચિરમ્ ॥

SP0030251 તાભિઃ સ્વં સ્વં સમાદાય ભાવં દિવ્યમતર્કિતમ્ ।
SP0030252 અભિષિક્તો બભૂવેતિ પ્રજાપતિરતિદ્યુતિઃ ॥

SP0030261 તત્રૈવં યોગિનઃ સૂક્ષ્મં દૃષ્ટ્વા દિવ્યેન ચક્ષુષા ।

SP0030262 પુરાણં યોગતત્ત્વજ્ઞા ગાયન્તિ ત્રિગુણાન્વિતમ્ ॥

SP0030271 રુદ્રઃ સ્રષ્ટા હિ સર્વેષાં ભૂતાનાં તવ ચ પ્રભો ।
SP0030272 અસ્માભિશ્ચ ભવાન્સાર્ધં જગતઃ સમ્પ્રવર્તકઃ ॥

SP0030281 સ દેવસ્તોષિતઃ સમ્યક્પરમૈશ્વર્યયોગધૃક્ ।
SP0030282 બ્રહ્માણમગ્રજં પુત્રં પ્રાજાપત્યેઽભ્યષેચયત્ ॥

SP0030291 યઃ કૃત્વા બહુવિધમાર્ગયોગયુક્તં તત્ત્વાખ્યં
જગદિદમાદરાદ્યુયોજ ।
SP0030292 દેવાનાં પરમમનન્તયોગયુક્તં
માયાભિસ્ત્રિભુવનમન્ધમપ્રસાદમ્ ॥

SP0030301 સર્વેષાં મનસિ સદાવતિષ્ઠમાનો જાનાનઃ શુભમશુભં
ચ ભૂતનાથઃ ।
SP0030302 તં દેવં પ્રમથપતિં પ્રણમ્ય ભક્ત્યા નિત્યં વૈ
શરણમુપૈમિ સૂક્ષ્મસૂક્ષ્મમ્ ॥

SP0039999 ઇતિ સ્કન્દપુરાણે તૃતીયોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૪

SP0040010 સનત્કુમાર ઉવાચ ।
SP0040011 પ્રાજાપત્યં તતો લબ્ધ્વા પ્રજાઃ સ્રષ્ટું પ્રચક્રમે ।
SP0040012 પ્રજાસ્તાઃ સૃજ્યમાનાશ્ચ ન વિવર્ધન્તિ તસ્ય હ ॥

SP0040021 સ કુર્વાણસ્તથા સૃષ્ટિં શક્તિહીનઃ પિતામહઃ ।
SP0040022 સૃષ્ટ્યર્થં ભૂય એવાથ તપશ્ચર્તું પ્રચક્રમે ॥

SP0040031 સૃષ્ટિહેતોસ્તપસ્તસ્ય જ્ઞાત્વા ત્રિભુવનેશ્વરઃ ।
SP0040032 તેજસા જગદાવિશ્ય આજગામ તદન્તિકમ્ ।
SP0040033 સ્રષ્ટા તસ્ય જગન્નાથોઽદર્શયત્સ્વતનૌ જગત્ ॥

SP0040041 સ્વયમાગત્ય દેવેશો મહાભૂતપતિર્હરઃ ।
SP0040042 વ્યાપ્યેવ હિ જગત્કૃત્સ્નં પરમેણ સ્વતેજસા ।
SP0040043 શમ્ભુઃ પ્રાહ વરં વત્સ યાચસ્વેતિ પિતામહમ્ ॥

SP0040051 તં બ્રહ્મા લોકસૃષ્ટ્યર્થં પુત્રસ્ત્વં મનસાબ્રવીત્ ।
SP0040052 સ જ્ઞાત્વા તસ્ય સંકલ્પં બ્રહ્મણઃ પરમેશ્વરઃ ।
SP0040053 મૂઢોઽયમિતિ સંચિન્ત્ય પ્રોવાચ વરદઃ સ્વયમ્ ॥

SP0040061 આગતં પિતરં મા ત્વં યસ્માત્પુત્રં સમીહસે ।
SP0040062 મન્મૂર્તિસ્તનયસ્તસ્માદ્ભવિષ્યતિ મમાજ્ઞયા ॥

SP0040071 સ ચ તે પુત્રતાં યાત્વા મદીયો ગણનાયકઃ ।
SP0040072 રુદ્રો વિગ્રહવાન્ભૂત્વા મૂઢ ત્વાં વિનયિષ્યતિ ॥

SP0040081 સર્વવિદ્યાધિપત્યં ચ યોગાનાં ચૈવ સર્વશઃ ।
SP0040082 બલસ્યાધિપતિત્વં ચ અસ્ત્રાણાં ચ પ્રયોક્તૃતા ॥

SP0040091 મયા દત્તાનિ તસ્યાશુ ઉપસ્થાસ્યન્તિ સર્વશઃ ।
SP0040092 ધનુઃ પિનાકં શૂલં ચ ખડ્ગં પરશુરેવ ચ ॥

SP0040101 કમણ્ડલુસ્તથા દણ્ડઃ અસ્ત્રં પાશુપતં તથા ।
SP0040102 સંવર્તકાશનિશ્ચૈવ ચક્રં ચ પ્રતિસર્ગિકમ્ ।
SP0040103 એવં સર્વર્દ્ધિસમ્પન્નઃ સુતસ્તે સ ભવિષ્યતિ ॥

SP0040111 એવમુક્ત્વા ગતે તસ્મિન્નન્તર્ધાનં મહાત્મનિ ।
SP0040112 બ્રહ્મા ચક્રે તદા ચેષ્ટિં પુત્રકામઃ પ્રજાપતિઃ ॥

SP0040121 સ જુહ્વઞ્છ્રમસંયુક્તઃ પ્રતિઘાતસમન્વિતઃ ।
SP0040122 સમિધ્યુક્તેન હસ્તેન લલાટં પ્રમમાર્જ હ ॥

SP0040131 સમિત્સંયોગજસ્તસ્ય સ્વેદબિન્દુર્લલાટજઃ ।
SP0040132 પપાત જ્વલને તસ્મિન્દ્વિગુણં તસ્ય તેજસા ॥

SP0040141 તદ્ધિ માહેશ્વરં તેજઃ સંધિતં બ્રહ્મણિ સ્રુતમ્ ।
SP0040142 પ્રેરિતં દેવદેવેન નિપપાત હવિર્ભુજિ ॥

SP0040151 ક્ષણે તસ્મિન્મહેશેન સ્મૃત્વા તં વરમુત્તમમ્ ।
SP0040152 પ્રેષિતો ગણપો રુદ્રઃ સદ્ય એવાભવત્તદા ॥

SP0040161 તચ્ચ સંસ્વેદજં તેજઃ પૂર્વં જ્વલનયોજિતમ્ ।
SP0040162 ભૂત્વા લોહિતમાશ્વેવ પુનર્નીલમભૂત્તદા ॥

SP0040171 નીલલોહિત ઇત્યેવ તેનાસાવભવત્પ્રભુઃ ।
SP0040172 ત્ર્યક્ષો દશભુજઃ શ્રીમાન્બ્રહ્માણં છાદયન્નિવ ॥

SP0040181 શર્વાદ્યૈર્નામભિર્બ્રહ્મા તનૂભિશ્ચ જલાદિભિઃ ।
SP0040182 સ્તુત્વા તં સર્વગં દેવં નીલલોહિતમવ્યયમ્ ॥

SP0040191 જ્ઞાત્વા સર્વસૃજં પશ્ચાન્મહાભૂતપ્રતિષ્ઠિતમ્ ।
SP0040192 અસૃજદ્વિવિધાસ્ત્વન્યાઃ પ્રજાઃ સ જગતિ પ્રભુઃ ॥

SP0040201 સોઽપિ યોગં સમાસ્થાય ઐશ્વર્યેણ સમન્વિતઃ ।
SP0040202 લોકાન્સર્વાન્સમાવિશ્ય ધારયામાસ સર્વદા ॥

SP0040211 બ્રહ્મણોઽપિ તતઃ પુત્રા દક્ષધર્માદયઃ શુભાઃ ।
SP0040212 અસૃજન્ત પ્રજાઃ સર્વા દેવમાનુષસંકુલાઃ ॥

SP0040221 અથ કાલેન મહતા કલ્પેઽતીતે પુનઃ પુનઃ ।
SP0040222 પ્રજા ધારયતો યોગાદસ્મિન્કલ્પ ઉપસ્થિતે ॥

SP0040231 પ્રતિષ્ઠિતાયાં વાર્ત્તાયાં પ્રવૃત્તે વૃષ્ટિસર્જને ।
SP0040232 પ્રજાસુ ચ વિવૃદ્ધાસુ પ્રયાગે યજતશ્ચ હ ॥

SP0040241 બ્રહ્મણઃ ષટ્કુલીયાસ્તે ઋષયઃ સંશિતવ્રતાઃ ।
SP0040242 મરીચયોઽત્રયશ્ચૈવ વસિષ્ઠાઃ ક્રતવસ્તથા ॥

SP0040251 ભૃગવોઽશિઙ્ગરસશ્ચૈવ તપસા દગ્ધકિલ્બિષાઃ ।
SP0040252 ઊચુર્બ્રહ્માણમભ્યેત્ય સહિતાઃ કર્મણોઽન્તરે ॥

SP0040261 ભગવન્નન્ધકારેણ મહતા સ્મઃ સમાવૃતાઃ ।
SP0040262 ખિન્ના વિવદમાનાશ્ચ ન ચ પશ્યામ યત્પરમ્ ॥

SP0040271 એતં નઃ સંશયં દેવ ચિરં હૃદિ સમાસ્થિતમ્ ।
SP0040272 ત્વં હિ વેત્થ યથાતત્ત્વં કારણં પરમં હિ નઃ ॥

SP0040281 કિં પરં સર્વભૂતાનાં બલીયશ્ચાપિ સર્વતઃ ।
SP0040282 કેન ચાધિષ્ઠિતં વિશ્વં કો નિત્યઃ કશ્ચ શાશ્વતઃ ॥

SP0040291 કઃ સ્રષ્ટા સર્વભૂતાનાં પ્રકૃતેશ્ચ પ્રવર્તકઃ ।
SP0040292 કોઽસ્માન્સર્વેષુ કાર્યેષુ પ્રયુનક્તિ મહામનાઃ ॥

SP0040301 કસ્ય ભૂતાનિ વશ્યાનિ કઃ સર્વવિનિયોજકઃ ।
SP0040302 કથં પશ્યેમ તં ચૈવ એતન્નઃ શંસ સર્વશઃ ॥

SP0040311 એવમુક્તસ્તતો બ્રહ્મા સર્વેષામેવ સંનિધૌ ।
SP0040312 દેવાનાં ચ ઋષીણાં ચ ગન્ધર્વોરગરક્ષસામ્ ॥

SP0040321 યક્ષાણામસુરાણાં ચ યે ચ કુત્ર પ્રવર્તકાઃ ।
SP0040322 પક્ષિણાં સપિશાચાનાં યે ચાન્યે તત્સમીપગાઃ ।
SP0040323 ઉત્થાય પ્રાઞ્જલિઃ પ્રાહ રુદ્રેતિ ત્રિઃ પ્લુતં વચઃ ॥

SP0040331 સ ચાપિ તપસા શક્યો દ્રષ્ટું નાન્યેન કેનચિત્ ।
SP0040332 સ સ્રષ્ટા સર્વભૂતાનાં બલવાંસ્તન્મયં જગત્ ।
SP0040333 તસ્ય વશ્યાનિ ભૂતાનિ તેનેદં ધાર્યતે જગત્ ॥

SP0040341 તતસ્તે સર્વલોકેશા નમશ્ચક્રુર્મહાત્મને ॥

SP0040350 ઋષય ઊચુઃ ।
SP0040351 કિં તન્મહત્તપો દેવ યેન દૃશ્યેત સ પ્રભુઃ ।
SP0040352 તન્નો વદસ્વ દેવેશ વરદં ચાભિધત્સ્વ નઃ ॥

SP0040360 પિતામહ ઉવાચ ।
SP0040361 સત્રં મહત્સમાસધ્વં વાઙ્મનોદોષવર્જિતાઃ ।
SP0040362 દેશં ચ વઃ પ્રવક્ષ્યામિ યસ્મિન્દેશે ચરિષ્યથ ॥

SP0040371 તતો મનોમયં ચક્રં સ સૃષ્ટ્વા તાનુવાચ હ ।
SP0040372 ક્ષિપ્રમેતન્મયા ચક્રમનુવ્રજત મા ચિરમ્ ॥

SP0040381 યત્રાસ્ય નેમિઃ શીર્યેત સ દેશસ્તપસઃ શુભઃ ।
SP0040382 તતો મુમોચ તચ્ચક્રં તે ચ તત્સમનુવ્રજન્ ॥

SP0040391 તસ્ય વૈ વ્રજતઃ ક્ષિપ્રં યત્ર નેમિરશીર્યત ।
SP0040392 નૈમિશં તત્સ્મૃતં નામ્ના પુણ્યં સર્વત્ર પૂજિતમ્ ॥

SP0040401 તત્પૂજિતં દેવમનુષ્યસિદ્ધૈ રક્ષોભિરુગ્રૈરુરગૈશ્ચ દિવ્યૈઃ ।
SP0040402 યક્ષૈઃ સગન્ધર્વપિશાચસંઘૈઃ સર્વાપ્સરોભિશ્ચ દિતેઃ સુતૈશ્ચ ॥

SP0040411 વિપ્રૈશ્ચ દાન્તૈઃ શમયોગયુક્તૈસ્તીર્થૈશ્ચ સર્વૈરપિ ચાવનીધ્રૈઃ ।
SP0040412 ગન્ધર્વવિદ્યાધરચારણૈશ્ચ સાધ્યૈશ્ચ વિશ્વૈઃ પિતૃભિઃ સ્તુતં ચ ॥

SP0049999 ઇતિ સ્કન્દપુરાણે ચતુર્થોઽધ્યાયઃ ॥

## સ્કંદપુરાણ અધ્યાય ૫

SP0050010 સનત્કુમાર ઉવાચ ।
SP0050011 તન્નૈમિશં સમાસાદ્ય ઋષયો દીપ્તતેજસઃ ।
SP0050012 દિવ્યં સત્રં સમાસન્ત મહદ્વર્ષસહસ્રિકમ્ ॥

SP0050021 એકાગ્રમનસઃ સર્વે નિર્મમા હ્યનહંકૃતાઃ ।
SP0050022 ધ્યાયન્તો નિત્યમીશેશં સદારતનયાગ્રયઃ ॥

SP0050031 તન્નિષ્ઠાસ્તત્પરાઃ સર્વે તદ્યુક્તાસ્તદપાશ્રયાઃ ।
SP0050032 સર્વક્રિયાઃ પ્રકુર્વાણાસ્તમેવ મનસા ગતાઃ ॥

SP0050041 તેષાં તં ભાવમાલક્ષ્ય માતરિશ્વા મહાતપાઃ ।
SP0050042 સર્વપ્રાણિચરઃ શ્રીમાન્સર્વભૂતપ્રવર્તકઃ ।
SP0050043 દદૌ સ રૂપી ભગવાન્દર્શનં સત્રિણાં શુભઃ ॥

SP0050051 તં તે દૃષ્ટ્વાર્ચયિત્વા ચ માતરિશ્વાનમવ્યયમ્ ।
SP0050052 આસીનમાસને પુણ્યે ઋષયઃ સંશિતવ્રતાઃ ।
SP0050053 પપ્રચ્છુરુદ્ભવં કૃત્સ્નં જગતઃ પ્રલયં તથા ॥

SP0050061 સ્થિતિં ચ કૃત્સ્નાં વંશાંશ્ચ યુગમન્વન્તરાણિ ચ ।
SP0050062 વંશાનુચરિતં કૃત્સ્નં દિવ્યમાનં તથૈવ ચ ॥

SP0050071 અષ્ટાનાં દેવયોનીનામુત્પત્તિં પ્રલયં તથા ।
SP0050072 પિતૃસર્ગં તથાશેષં બ્રહ્મણો માનમેવ ચ ॥

SP0050081 ચન્દ્રાદિત્યગતિં સર્વાં તારાગ્રહગતિં તથા ।
SP0050082 સ્થિતિં સર્વેશ્વરાણાં ચ દ્વીપધર્મમશેષતઃ ।
SP0050083 વર્ણાશ્રમવ્યવસ્થાનં યજ્ઞાનાં ચ પ્રવર્તનમ્ ॥

SP0050091 એતત્સર્વમશેષેણ કથયામાસ સ પ્રભુઃ ।
SP0050092 દિવ્યં વર્ષસહસ્રં ચ તેષાં તદભિયાત્તથા ॥

SP0050101 અથ દિવ્યેન રૂપેણ સામવાગ્દિશિણ્નરીક્ષણા ।
SP0050102 યજુર્ઘ્રાણાથર્વશિરાઃ શબ્દજિહ્વા શુભા સતી ॥

SP0050111 ન્યાયશ્રોત્રા નિરુક્તત્વગૃક્પાદપદગામિની ।

SP0050112 કાલબાહૂર્વર્ષકરા દિવસાશ્ઙ્ગુલિધારિણી ॥

SP0050121 કલાદિભિઃ પર્વભિશ્ચ માસૈઃ કરરુહૈસ્તથા ।
SP0050122 કલ્પસાધારણા દિવ્યા શિક્ષાવિદ્યોન્નતસ્તની ॥

SP0050131 છન્દોવિચિતિમધ્યા ચ મીમાંસાનાભિરેવ ચ ।
SP0050132 પુરાણવિસ્તીર્ણકટિર્ધર્મશાસ્ત્રમનોરથા ॥

SP0050141 આશ્રમોરૂર્વર્ણજાનુર્યજ્ઞગુલ્ફા ફલાશ્ઙ્ગુલિઃ ।
SP0050142 લોકવેદશરીરા ચ રોમભિશ્છાન્દસૈઃ શુભૈઃ ॥

SP0050151 શ્રદ્ધાશુભાચારવસ્ત્રા યોગધર્માભિભાષિણી ।
SP0050152 વેદીમધ્યાદ્વિનિઃસૃત્ય પ્રવૃત્તા પરમામ્ભસા ॥

SP0050161 તસ્યાન્તેઽવભૃથે પ્લુત્ય વાયુના સહ સંગતાઃ ।
SP0050162 તામપૃચ્છન્ત કા ન્વેષા વાયું દેવં મહાધિયમ્ ॥

SP0050171 ઉવાચ સ મહાતેજા ઋષીન્ધર્માનુભાવિતાન્ ।
SP0050172 શુદ્ધાઃ સ્થ તપસા સર્વે મહાન્ધર્મશ્ચ વઃ કૃતઃ ॥

SP0050181 યસ્માદિયં નદી પુણ્યા બ્રહ્મલોકાદિહાગતા ।
SP0050182 ઇયં સરસ્વતી નામ બ્રહ્મલોકવિભૂષણા ॥

SP0050191 પ્રથમં મર્ત્યલોકેઽસ્મિન્યુષ્મત્સિદ્ધ્યર્થમાગતા ।
SP0050192 નાસ્યાઃ પુણ્યતમા કાચિત્ત્રિષુ લોકેષુ વિદ્યતે ॥

SP0050200 ઋષય ઊચુઃ ।
SP0050201 કથમેષા મહાપુણ્યા પ્રવૃત્તા બ્રહ્મલોકગા ।
SP0050202 કારણં કિં ચ તત્રાસીદેતદિચ્છામ વેદિતુમ્ ॥

SP0050210 વાયુરુવાચ ।
SP0050211 અત્ર વો વર્તયિષ્યામિ ઇતિહાસં પુરાતનમ્ ।
SP0050212 બ્રહ્મણશ્ચૈવ સંવાદં પુરા યજ્ઞસ્ય ચૈવ હ ॥

SP0050221 યજ્ઞૈરિષ્ટ્વા પુરા દેવો બ્રહ્મા દીપ્તેન તેજસા ।
SP0050222 અસૃજત્સર્વભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥

SP0050231 સ દૃષ્ટ્વા દીપ્તિમાન્દેવો દીપ્ત્યા પરમયા યુતઃ ।
SP0050232 અવેક્ષમાણઃ સ્વા/લ્લોકાંશ્ચતુર્ભિર્મુખપશ્ઙ્કજૈઃ ॥

SP0050241 દેવાદીન્મનુષ્યાદીંશ્ચ દૃષ્ટ્વા દૃષ્ટ્વા મહામનાઃ ।

SP0050242 અમન્યત ન મેઽન્યોઽસ્તિ સમો લોકે ન ચાધિકઃ ॥

SP0050251 યોઽહમેતાઃ પ્રજાઃ સર્વાઃ સપ્તલોકપ્રતિષ્ઠિતાઃ ।
SP0050252 દેવમાનુષતિર્યક્ષુ ગ્રસામિ વિસૃજામિ ચ ॥

SP0050261 અહં સ્રષ્ટા હિ ભૂતાનાં નાન્યઃ કશ્ચન વિદ્યતે ।
SP0050262 નિયન્તા લોકકર્તા ચ ન મયાસ્તિ સમઃ ક્વચિત્ ॥

SP0050271 તસ્યૈવં મન્યમાનસ્ય યજ્ઞ આગાન્મહામનાઃ ।
SP0050272 ઉવાચ ચૈનં દીપ્તાત્મા મૈવં મંસ્થા મહામતે ।
SP0050273 અયં હિ તવ સમ્મોહો વિનાશાય ભવિષ્યતિ ॥

SP0050281 ન યુક્તમીદૃશં તેઽદ્ય સત્ત્વસ્થસ્યાત્મયોનિનઃ ।
SP0050282 સ્રષ્ટા ત્વં ચૈવ નાન્યોઽસ્તિ તથાપિ ન યશસ્કરમ્ ॥

SP0050291 અહં કર્તા હિ ભૂતાનાં ભુવનસ્ય તથૈવ ચ ।
SP0050292 કરોમિ ન ચ સમ્મોહં યથા ત્વં દેવ કત્થસે ॥

SP0050301 તમુવાચ તદા બ્રહ્મા ન ત્વં ધારયિતા વિભો ।
SP0050302 અહમેવ હિ ભૂતાનાં ધર્તા ભર્તા તથૈવ ચ ।
SP0050303 મયા સૃષ્ટાનિ ભૂતાનિ ત્વમેવાત્ર વિમુહ્યસે ॥

SP0050311 અથાગાત્તત્ર સંવિગ્નો વેદઃ પરમદીપ્તિમાન્ ।
SP0050312 ઉવાચ ચૈવ તૌ વેદો નૈતદેવમિતિ પ્રભુઃ ॥

SP0050321 અહં શ્રેષ્ઠો મહાભાગૌ ન વદામ્યનૃતં ક્વચિત્ ।
SP0050322 શ‍ૃણુધ્વં મમ યઃ કર્તા ભૂતાનાં યુવયોશ્ચ હ ॥

SP0050331 પરમેશો મહાદેવો રુદ્રઃ સર્વગતઃ પ્રભુઃ ।
SP0050332 યેનાહં તવ દત્તશ્ચ કૃતસ્ત્વં ચ પ્રજાપતિઃ ॥

SP0050341 યજ્ઞોઽયં યત્પ્રસૂતિશ્ચ અણ્ડં યત્રાસ્તિ સંસ્થિતમ્ ।
SP0050342 સર્વં તસ્માત્પ્રસૂતં વૈ નાન્યઃ કર્તાસ્તિ નઃ ક્વચિત્ ॥

SP0050351 તમેવંવાદિનં દેવો બ્રહ્મા વેદમભાષત ।
SP0050352 અહં શ્રુતીનાં સર્વાસાં નેતા સ્રષ્ટા તથૈવ ચ ॥

SP0050361 મત્પ્રસાદાદ્ધિ વેદસ્ત્વં યજ્ઞશ્ચાયં ન સંશયઃ ।
SP0050362 મૂઢૌ યુવામધર્મો વા ભવદ્ભ્યામન્યથા કૃતઃ ।
SP0050363 પ્રાયશ્ચિત્તં ચરધ્વં વઃ કિલ્બિષાન્મોક્ષ્યથસ્તતઃ ॥

SP0050371 એવમુક્તે તદા તેન મહાચ્છબ્દો બભૂવ હ ।
SP0050372 આદિત્યમણ્ડલાકારમદૃશ્યત ચ મણ્ડલમ્ ।
SP0050373 મહચ્છબ્દેન મહતા ઉપરિષ્ટાદ્વિયત્સ્થિતમ્ ॥

SP0050381 સ ચાપિ તસ્માદ્વિભ્રષ્ટો ભૂતલં સમુપાશ્રિતઃ ।
SP0050382 હિમવત્કુઞ્જમાસાદ્ય નાનાવિહગનાદિતમ્ ।
SP0050383 વ્યોમગશ્ચ ચિરં ભૂત્વા ભૂમિગઃ સમ્બભૂવ હ ॥

SP0050391 તતો બ્રહ્મા દિશઃ સર્વા નિરીક્ષ્ય મુખપઙ્કજૈઃ ।
SP0050392 ચતુર્ભિર્ન વિયત્સ્થં તમપશ્યત્સ પિતામહઃ ॥

SP0050401 સ મુખં પઞ્ચમં દીપ્તમસૃજન્મૂર્ધ્નિ સંસ્થિતમ્ ।
SP0050402 તેનાપશ્યદ્વિયત્સ્થં તં સૂર્યાયુતસમપ્રભમ્ ।
SP0050403 આદિત્યમણ્ડલાકારં શબ્દવદ્ઘોરદર્શનમ્ ॥

SP0050411 તં દૃષ્ટ્વા પઞ્ચમં તસ્ય શિરો વૈ ક્રોધજં મહત્ ।
SP0050412 સંવર્તકાગ્નિસદૃશં ગ્રસિષ્યત્તમવર્ધત ॥

SP0050421 વર્ધમાનં તદા તત્તુ વડવામુખસંનિભમ્ ।
SP0050422 દીપ્તિમચ્છબ્દવચ્ચૈવ દેવોઽસૌ દીપ્તમણ્ડલઃ ॥

SP0050431 હસ્તાઙ્ગુષ્ઠનખેનાશુ વામેનાવજ્ઞયૈવ હિ ।
SP0050432 ચકર્ત તન્મહદ્ઘોરં બ્રહ્મણઃ પઞ્ચમં શિરઃ ॥

SP0050441 દીપ્તિકૃત્તશિરાઃ સોઽથ દુઃખેનોસ્રેણ ચાર્દિતઃ ।
SP0050442 પપાત મૂઢચેતા વૈ યોગધર્મવિવર્જિતઃ ॥

SP0050451 તતઃ સુપ્તોત્થિત ઇવ સંજ્ઞાં લબ્ધ્વા મહાતપાઃ ।
SP0050452 મણ્ડલસ્થં મહાદેવમસ્તૌષીદ્દીનયા ગિરા ॥

SP0050460 બ્રહ્મોવાચ ।
SP0050461 નમઃ સહસ્રનેત્રાય શતનેત્રાય વૈ નમઃ ।
SP0050462 નમો વિવૃતવક્ત્રાય શતવક્ત્રાય વૈ નમઃ ॥

SP0050471 નમઃ સહસ્રવક્ત્રાય સર્વવક્ત્રાય વૈ નમઃ ।
SP0050472 નમઃ સહસ્રપાદાય સર્વપાદાય વૈ નમઃ ॥

SP0050481 સહસ્રપાણયે ચૈવ સર્વતઃપાણયે નમઃ ।
SP0050482 નમઃ સર્વસ્ય સ્રષ્ટ્રે ચ દ્રષ્ટ્રે સર્વસ્ય તે નમઃ ॥

SP0050491 આદિત્યવર્ણાય નમઃ શિરસશ્છેદનાય ચ ।
SP0050492 સૃષ્ટિપ્રલયકર્ત્રે ચ સ્થિતિકર્ત્રે તથા નમઃ ॥

SP0050501 નમઃ સહસ્રલિશ્ણ્ગાય સહસ્રચરણાય ચ ।
SP0050502 સંહારલિશ્ણ્ગને ચૈવ જલલિશ્ણ્ગાય વૈ નમઃ ॥

SP0050511 અન્તશ્ચરાય સર્વાય પ્રકૃતેઃ પ્રેરણાય ચ ।
SP0050512 વ્યાપિને સર્વસત્ત્વાનાં પુરુષપ્રેરકાય ચ ॥

SP0050521 ઇન્દ્રિયાર્થવિશેષાય તથા નિયમકારિણે ।
SP0050522 ભૂતભવ્યાય શર્વાય નિત્યં સત્ત્વવદાય ચ ॥

SP0050531 ત્વમેવ સ્રષ્ટા લોકાનાં મન્તા દાતા તથા વિભો ।
SP0050532 શરણાગતાય દાન્તાય પ્રસાદં કર્તુમર્હસિ ॥

SP0050541 તસ્યૈવં સ્તુવતઃ સમ્યગ્ભાવેન પરમેણ હ ।
SP0050542 સ તસ્મૈ દેવદેવેશો દિવ્યં ચક્ષુરદાત્તદા ॥

SP0050551 ચક્ષુષા તેન સ તદા બ્રહ્મા લોકપિતામહઃ ।
SP0050552 વિમાને સૂર્યસંકાશે તેજોરાશિમપશ્યત ॥

SP0050561 તસ્ય મધ્યાત્તતો વાચં મહતીં સમશ્ૃણ્વત ।
SP0050562 ગમ્ભીરાં મધુરાં યુક્તામથ સમ્પન્નલક્ષણામ્ ।
SP0050563 વિશદાં પુત્ર પુત્રેતિ પૂર્વં દેવેન ચોદિતામ્ ॥

SP0050571 સંસ્વેદાત્પુત્ર ઉત્પન્નો યત્તુભ્યં નીલલોહિતઃ ।
SP0050572 યચ્ચ પૂર્વં મયા પ્રોક્તસ્ત્વં તદા સુતમાર્ગણે ॥

SP0050581 મદીયો ગણપો યસ્તે મન્મૂર્તિશ્ચ ભવિષ્યતિ ।
SP0050582 સ પ્રાપ્ય પરમં જ્ઞાનં મૂઢ ત્વા વિનયિષ્યતિ ॥

SP0050591 તસ્યેયં ફલનિષ્પત્તિઃ શિરસશ્છેદનં તવ ।
SP0050592 મયૈવ કારિતા તેન નિર્વૃતશ્ચાધુના ભવ ॥

SP0050601 તસ્ય ચૈવોત્પથસ્થસ્ય યજ્ઞસ્ય તુ મહામતે ।
SP0050602 શિરશ્છેત્સ્યત્યસાવેવ કસ્મિંશ્ચિત્કારણાન્તરે ।
SP0050603 સ્તવેનાનેન તુષ્ટોઽસ્મિ કિં દદાનિ ચ તેઽનઘ ॥

SP0050611 વાયુરુવાચ ।
SP0050612 તતઃ સ ભગવાન્હૃષ્ટઃ પ્રણમ્ય શુભયા ગિરા ।

SP0050613 ઉવાચ પ્રાઞ્જલિર્ભૂત્વા લક્ષ્યાલક્ષ્યં તમીશ્વરમ્ ॥

SP0050621 ભગવન્નૈવ મે દુઃખં દર્શનાત્તે પ્રબાધતે ।
SP0050622 ઇચ્છામિ શિરસો હ્યસ્ય ધારણં સર્વદા ત્વયા ।
SP0050623 નનુ સ્મરેયમેતચ્ચ શિરસશ્છેદનં વિભો ॥

SP0050631 ભૂયશ્ચાધર્મકાર્યેભ્યસ્ત્વયૈવેચ્છે નિવારણમ્ ।
SP0050632 તથા ચ કૃત્યમુદ્દિશ્ય પશ્યેયં ત્વા યથાસુખમ્ ॥

SP0050641 વિજ્ઞપ્તિં બ્રહ્મણઃ શ્રુત્વા પ્રોવાચ ભુવનેશ્વરઃ ।
SP0050642 સ એવ સુતસંજ્ઞસ્તે મન્મૂર્તિર્નીલલોહિતઃ ।
SP0050643 શિરશ્છેત્સ્યતિ યજ્ઞસ્ય બિભર્ત્સ્યતિ શિરશ્ચ તે ॥

SP0050651 ઇત્યુક્ત્વા દેવદેવેશસ્તત્રૈવાન્તરધીયત ।
SP0050652 ગતે તસ્મિન્મહાદેવે બ્રહ્મા લોકપિતામહઃ ।
SP0050653 સયજ્ઞઃ સહવેદશ્ચ સ્વં લોકં પ્રત્યપદ્યત ॥

SP0050661 વાયુરુવાચ ।
SP0050662 ય ઇમં શ◌ૃણુયાન્મર્ત્યો ગુહ્યં વેદાર્થસમ્મિતમ્ ।
SP0050663 સ દેહભેદમાસાદ્ય સાયુજ્યં બ્રહ્મણો વ્રજેત્ ॥

SP0050671 યશ્ચેમં પઠતે નિત્યં બ્રાહ્મણાનાં સમીપતઃ ।
SP0050672 સ સર્વપાપનિર્મુક્તો રુદ્રલોકે મહીયતે ॥

SP0050681 નાપુત્રશિષ્યયોગિભ્ય ઇદમાખ્યાનમૈશ્વરમ્ ।
SP0050682 આખ્યેયં નાપિ ચાજ્ઞાય ન શઠાય ન માનિને ॥

SP0050691 ઇદં મહદ્દિવ્યમધર્મશાસનં પઠેત્સદા બ્રાહ્મણવૈદ્યસંસદિ ।
SP0050692 કૃતાવકાશો ભવતીહ માનવઃ શરીરભેદે પ્રવિશેત્પિતામહમ્ ॥

SP0059999 ઇતિ સ્કન્દપુરાણે પઞ્ચમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૬

SP0060010 સનત્કુમાર ઉવાચ ।
SP0060011 તતઃ સ ભગવાન્દેવઃ કપર્દી નીલલોહિતઃ ।
SP0060012 આજ્ઞયા પરમેશસ્ય જગ્રાહ બ્રહ્મણઃ શિરઃ ॥

SP0060021 તદ્ગૃહીત્વા શિરો દીપ્તં રૂપં વિકૃતમાસ્થિતઃ ।
SP0060022 યોગક્રીડાં સમાસ્થાય ભૈક્ષાય પ્રચચાર હ ॥

SP0060031 સ દેવવેશ્મનિ તદા ભિક્ષાર્થમગમદ્દ્વિજાઃ ।
SP0060032 ન ચાસ્ય કશ્ચિત્તાં ભિક્ષામનુરૂપામદાદ્વિભોઃ ॥

SP0060041 અભ્યગાત્સંક્રમેણૈવ વેશ્મ વિષ્ણોર્મહાત્મનઃ ।
SP0060042 તસ્યાતિષ્ઠત સ દ્વારિ ભિક્ષામુચ્ચારયચ્છુભામ્ ॥

SP0060051 સ દૃષ્ટ્વા તદુપસ્થં તુ વિષ્ણુર્વૈ યોગચક્ષુષા ।
SP0060052 શિરાં લલાટાત્સમ્ભિદ્ય રક્તધારામપાતયત્ ।
SP0060053 પપાત સા ચ વિસ્તીર્ણા યોજનાર્ધશતં તદા ॥

SP0060061 તયા પતન્ત્યા વિપ્રેન્દ્રા બહૂન્યબ્દાનિ ધારયા ।
SP0060062 પિતામહકપાલસ્ય નાર્ધમપ્યભિપૂરિતમ્ ।
SP0060063 તમુવાચ તતો દેવઃ પ્રહસ્ય વચનં શુભમ્ ॥

SP0060071 સકૃત્કન્યાઃ પ્રદીયન્તે સકૃદગ્નિશ્ચ જાયતે ।
SP0060072 સકૃદ્રાજાનો બ્રુવતે સકૃદ્ભિક્ષા પ્રદીયતે ॥

SP0060081 તુષ્ટોઽસ્મિ તવ દાનેન યુક્તેનાનેન માનદ ।
SP0060082 વરં વરય ભદ્રં તે વરદોઽસ્મિ તવાદ્ય વૈ ॥

SP0060091 વિષ્ણુરુવાચ ।
SP0060092 એષ એવ વરઃ શ્લાઘ્યો યદહં દેવતાધિપમ્ ।
SP0060093 પશ્યામિ શંકરં દેવમુગ્રં શર્વં કપર્દિનમ્ ॥

SP0060101 દેવશ્છાયાં તતો વીક્ષ્ય કપાલસ્થે તદા રસે ।
SP0060102 સસર્જ પુરુષં દીપ્તં વિષ્ણોઃ સદૃશમૂર્જિતમ્ ॥

SP0060111 તમાહાથાક્ષયશ્ચાસિ અજરામર એવ ચ ।
SP0060112 યુદ્ધેષુ ચાપ્રતિદ્વન્દ્વી સખા વિષ્ણોરનુત્તમઃ ।
SP0060113 દેવકાર્યકરઃ શ્રીમાન્સહાનેન ચરસ્વ ચ ॥

SP0060121 નારાસુ જન્મ યસ્માત્તે વિષ્ણુદેહોદ્ભવાસુ ચ ।
SP0060122 નરસ્તસ્માદ્ધિ નામ્ના ત્વં પ્રિયશ્ચાસ્ય ભવિષ્યસિ ॥

SP0060130 વાયુરુવાચ ।

SP0060131 તં તદાશ્વાસ્ય નિક્ષિપ્ય નરં વિષ્ણોઃ સ્વયં પ્રભુઃ ।
SP0060132 અગમદ્બ્રહ્મસદનં તૌ ચાવિવિશતુર્ગૃહમ્ ॥

SP0060141 ય ઇદં નરજન્મેહ શૃણુયાદ્વા પઠેત વા ।
SP0060142 સ કીર્ત્યા પરયા યુક્તો વિષ્ણુલોકે મહીયતે ॥

SP0069999 ઇતિ સ્કન્દપુરાણે ષષ્ઠોऽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૭

SP0070010 વાયુરુવાચ ।
SP0070011 બ્રહ્મલોકં સમાસાદ્ય ભગવાન્સર્વલોકપઃ ।
SP0070012 ભૈક્ષ્યં ભૈક્ષ્યમિતિ પ્રોચ્ય દ્વારે સમવતિષ્ઠત ॥

SP0070021 તં દૃષ્ટ્વા વિકૃતં બ્રહ્મા કપાલકરભૂષણમ્ ।
SP0070022 જ્ઞાત્વા યોગેન મહતા તુષ્ટાવ ભુવનેશ્વરમ્ ॥

SP0070031 તસ્ય તુષ્ટસ્તદા દેવો વરદોऽસ્મીત્યભાષત ।
SP0070032 વૃણીષ્વ વરમવ્યગ્રો યસ્તે મનસિ વર્તતે ॥

SP0070040 બ્રહ્મોવાચ ।
SP0070041 ઇચ્છામિ દેવદેવેશ ત્વયા ચિહ્નમિદં કૃતમ્ ।
SP0070042 યેન ચિહ્નેન લોકોऽયં ચિહ્નિતઃ સ્યાજ્જગત્પતે ॥

SP0070051 તસ્ય તદ્વચનં શ્રુત્વા ભગવાન્વદતાં વરઃ ।
SP0070052 સર્વશ્રુતિમયં બ્રહ્મ ઓમિતિ વ્યાજહાર હ ॥

SP0070061 શમ્ભોર્વ્યાહારમાત્રેણ વાગિયં દિવ્યરૂપિણી ।
SP0070062 નિઃસૃતા વદનાદ્દેવી પ્રહ્વા સમવતિષ્ઠત ॥

SP0070071 તામુવાચ તદા દેવો વાચા સંજીવયન્નિવ ।
SP0070072 યસ્માત્ત્વમક્ષરો ભૂત્વા મમ વાચો વિનિઃસૃતા ।
SP0070073 સર્વવિદ્યાધિદેવી ત્વં તસ્માદ્દેવિ ભવિષ્યસિ ॥

SP0070081 યસ્માદ્બ્રહ્મસરશ્ચેદં મુખં મમ સમાશ્રિતા ।
SP0070082 તસ્માત્સરસ્વતીત્યેવ લોકે ખ્યાતિં ગમિષ્યસિ ॥

SP0070091 ઇમં લોકં વરામ્ભોભિઃ પાવયિત્વા ચ સુપ્રભે ।
SP0070092 સર્વા/લ્લોકાંસ્તારયિત્રી પુનસ્ત્વં નાત્ર સંશયઃ ॥

SP0070101 યજ્ઞભાગં ચ દેવાસ્તે દાસ્યન્તિ સપિતામહાઃ ।
SP0070102 પુણ્યા ચ સર્વસરિતાં ભવિષ્યસિ ન સંશયઃ ॥

SP0070111 તતઃ સા સમનુજ્ઞાતા શંકરેણ વિભાવિની ।
SP0070112 ચક્રે બ્રહ્મસરઃ પુણ્યં બ્રહ્મલોકેઽતિપાવનમ્ ॥

SP0070121 તોયામૃતસુસમ્પૂર્ણં સ્વર્ણપદ્મોપશોભિતમ્ ।
SP0070122 નાનાપક્ષિગણાકીર્ણં મીનસંક્ષોભિતોદકમ્ ।
SP0070123 તતો વિનિઃસૃતા ભૂયઃ સેમં લોકમપાવયત્ ॥

SP0070131 તં ગૃહીત્વા મહાદેવઃ કપાલમમિતૌજસમ્ ।
SP0070132 ઇમં લોકમનુપ્રાપ્ય દેશે શ્રેષ્ઠેઽવતિષ્ઠત ॥

SP0070141 તત્ર તચ્ચ મહદ્દિવ્યં કપાલં દેવતાધિપઃ ।
SP0070142 સ્થાપયામાસ દીપ્તાર્ચિર્ગણાનામગ્રતઃ પ્રભુઃ ॥

SP0070151 તત્સ્થાપિતમથો દૃષ્ટ્વા ગણાઃ સર્વે મહાત્મનઃ ।
SP0070152 અનદન્સુમહાનાદં નાદયન્તો દિશો દશ ।
SP0070153 ક્ષુબ્ધાર્ણવાશનિપ્રખ્યં નભો યેન વ્યશીર્યત ॥

SP0070161 તેન શબ્દેન ઘોરેણ અસુરો દેવકણ્ટકઃ ।
SP0070162 હાલાહલ ઇતિ ખ્યાતસ્તં દેશં સોઽભ્યગચ્છત ॥

SP0070171 અમૃષ્યમાણઃ ક્રોધાન્ધો દુરાત્મા યજ્ઞનાશકઃ ।
SP0070172 બ્રહ્મદત્તવરશ્ચૈવ અવધ્યઃ સર્વજન્તુભિઃ ।
SP0070173 મહિષશ્છન્નરૂપાણામસુરાણાં શતૈર્વૃતઃ ॥

SP0070181 તમાપતન્તં સક્રોધં મહિષં દેવકણ્ટકમ્ ।
SP0070182 સમ્પ્રેક્ષ્યાહ ગણાધ્યક્ષો ગણાન્સર્વાન્પિનાકિનઃ ॥

SP0070191 દૈત્યોઽયં ગણપા દુષ્ટસ્ત્રૈલોક્યસુરકણ્ટકઃ ।
SP0070192 આયાતિ ત્વરિતો યૂયં તસ્માદેનં નિહન્યથ ॥

SP0070201 તતસ્તે ગણપાઃ સર્વે સમાયાન્તં સુરદ્વિષમ્ ।
SP0070202 ભિત્ત્વા શૂલેન સંક્રુદ્ધા વિગતાસું ચ ચક્રિરે ॥

SP0070211 હતે તસ્મિંસ્તદા દેવો દિશઃ સર્વા અવૈક્ષત ।

SP0070212 તાભ્યઃ પિશાચા વૃત્તાસ્યાઃ પિશાચ્યશ્ચ મહાબલાઃ ।
SP0070213 અભ્યગચ્છન્ત દેવેશં તાભ્યસ્તં વિનિવેદયત્ ॥

SP0070221 સ તાભિરુપયુક્તશ્ચ વિનિયુક્તશ્ચ સર્વશઃ ।
SP0070222 તમેવ ચાપ્યથાવાસં દેવાદિષ્ટં પ્રપેદિરે ॥

SP0070231 ભક્ષયન્તિ સ્મ મહિષં મિત્વા મિત્વા યતસ્તુ તાઃ ।
SP0070232 કપાલમાતરઃ પ્રોક્તાસ્તસ્માદ્દેવેન ધીમતા ॥

SP0070241 કપાલં સ્થાપિતં યસ્માત્તસ્મિન્દેશે પિનાકિના ।
SP0070242 મહાકપાલં તત્તસ્માત્ત્રિષુ લોકેષુ ગદ્યતે ॥

SP0070251 સ્થાપિતસ્ય કપાલસ્ય યથોક્તમભવત્તદા ।
SP0070252 ખ્યાતં શિવતડાગં તત્સર્વપાપપ્રમોચનમ્ ॥

SP0070261 આગત્યાથ તતો બ્રહ્મા દેવતાનાં ગણૈર્વૃતઃ ।
SP0070262 કપર્દિનમુપામન્ત્ર્ય તં દેશં સોઽન્વગૃહ્ણત ॥

SP0070271 અર્ધયોજનવિસ્તીર્ણં ક્ષેત્રમેતત્સમન્તતઃ ।
SP0070272 ભવિષ્યતિ ન સંદેહઃ સિદ્ધક્ષેત્રં મહાત્મનઃ ॥

SP0070281 શ્મેતિ હિ પ્રોચ્યતે પાપં ક્ષયં શાનં વિદુર્બુધાઃ ।
SP0070282 ધ્યાનેન નિયમૈશ્ચૈવ શ્મશાનં તેન સંજ્ઞિતમ્ ।
SP0070283 ગુહ્યં દેવાતિદેવસ્ય પરં પ્રિયમનુત્તમમ્ ॥

SP0070291 એવં તત્ર નરઃ પાપં સર્વમેવ પ્રહાસ્યતિ ।
SP0070292 ત્રિરાત્રોપોષિતશ્ચૈવ અર્ચયિત્વા વૃષધ્વજમ્ ।
SP0070293 રાજસૂયાશ્વમેધાભ્યાં ફલં યત્તદવાપ્સ્યતિ ॥

SP0070301 યશ્ચ પ્રાણાન્પ્રિયાંસ્તત્ર પરિત્યક્ષ્યતિ માનવઃ ।
SP0070302 સ ગુહ્યગણદેવાનાં સમતાં સમવાપ્સ્યતિ ॥

SP0070311 વાયુરુવાચ ।
SP0070312 તતઃ સ તત્ર સંસ્થાપ્ય દેવસ્યાર્ચાદ્વયં શુભમ્ ।
SP0070313 શૂલેશ્વરં મહાકાયં રુદ્રસ્યાયતનં શુભમ્ ॥

SP0070321 તત્રાભિગમનાદેવ કૃત્વા પાપસ્ય સંક્ષયમ્ ।
SP0070322 રુદ્રલોકમવાપ્નોતિ સ પ્રાહૈવં પિતામહઃ ॥

SP0070331 યત્ર ચાપિ શિરસ્તસ્ય ચિચ્છેદ ભુવનેશ્વરઃ ।

SP0070332 કશ્મીરઃ સોઽભવન્નામ્ના દેશઃ પુણ્યતમઃ સદા ॥

SP0070341 તતો દેવઃ સહ ગણૈ રૂપં વિકૃતમાસ્થિતઃ ।
SP0070342 પશ્યતાં સર્વદેવાનામન્તર્ધાનમગાત્પ્રભુઃ ॥

SP0070351 ગતે ચ દેવનાથેઽથ કપાલસ્થાનમવ્યયમ્ ।
SP0070352 સર્વતીર્થાભિષેકસ્ય ફલેન સમયોજયત્ ॥

SP0070361 તદદ્યાપિ મહદ્દિવ્યં સરસ્તત્ર પ્રદૃશ્યતે ।
SP0070362 મહાકપાલં વિપ્રેન્દ્રાઃ સ્વર્ગાસ્તત્રાક્ષયાઃ સ્મૃતાઃ ॥

SP0070371 ઇદં શુભં દિવ્યમધર્મનાશનં મહાફલં સેન્દ્રસુરાસુરાર્ચિતમ્ ।
SP0070372 મહાકપાલં પ્રકૃતોપદર્શનં સુરેશલોકાદિવિગાહને હિતમ્ ॥

SP0070381 તપોધનૈઃ સિદ્ધગણૈશ્ચ સંસ્તુતં દિવિષ્ઠતુલ્યદ્વિજરાજમણ્ડલે ।
SP0070382 પઠેન્નરો યઃ શ ૃણુયાચ્ચ સર્વદા ત્રિપિષ્ટપં ગચ્છતિ
સોઽભિનન્દિતઃ ॥

SP0079999 ઇતિ સ્કન્દપુરાણે સપ્તમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૮

SP0080010 વાયુરુવાચ ।
SP0080011 એવમેષા ભગવતી બ્રહ્મલોકાનુસારિણી ।
SP0080012 યુષ્માકં ધર્મસિદ્ધ્યર્થં વેદીમધ્યાદ્વ્યવર્તત ॥

SP0080020 સનત્કુમાર ઉવાચ ।
SP0080021 એવં તેષાં સમામેઽથ સત્ત્રે વર્ષસહસ્રિકે ।
SP0080022 પ્રવૃત્તાયાં સરસ્વત્યામગાત્તત્ર પિતામહઃ ॥

SP0080030 બ્રહ્મોવાચ ।
SP0080031 ભૂયોઽન્યેન હ સત્ત્રેણ યજધ્વં દેવમીશ્વરમ્ ।
SP0080032 યદા વો ભવિતા વિઘ્નં તદા નિષ્કલ્મષં તપઃ ॥

SP0080041 વિઘ્નં તચ્ચૈવ સંતીર્ય તપસ્તપ્ત્વા ચ ભાસ્વરમ્ ।
SP0080042 યોગં પ્રાપ્ય મહદ્યુક્તાસ્તતો દ્રક્ષ્યથ શંકરમ્ ॥

SP0080051 તથેત્યુક્ત્વા ગતે તસ્મિન્સત્રાણ્યાજહ્રિરે તદા ।
SP0080052 બહૂનિ વિવિધાકારાણ્યભિયુક્તા મહાવ્રતાઃ ॥

SP0080061 નિઃસોમાં પૃથિવીં કૃત્વા કૃત્સ્નામેતાં તતો દ્વિજાઃ ।
SP0080062 રાજાનં સોમમાનાય્ય અભિષેક્તુમિયેષિરે ॥

SP0080071 અથ સોઽપિ કૃતાતિથ્યઃ અદૃશ્યેન દુરાત્મના ।
SP0080072 સ્વર્ભાનુના હૃતઃ સોમસ્તતસ્તે દુઃખિતાભવન્ ॥

SP0080081 તે ગત્વા મુનયઃ સર્વે કલાપગ્રામવાસિનઃ ।
SP0080082 પુરૂરવસમાનીય રાજાનં તેઽભ્યષેચયન્ ॥

SP0080091 ઊચુશ્ચૈનં મહાભાગા હૃતઃ સોમો હિ નઃ પ્રભો ।
SP0080092 કેનાપિ તદ્ભવાન્ક્ષિપ્રમિહાનયતુ મા ચિરમ્ ॥

SP0080101 સ એવમુક્તો મૃગયન્ન તમાસાદયત્પ્રભુઃ ।
SP0080102 ઉવાચ સ તદા વિપ્રાન્પ્રણમ્ય ભયપીડિતઃ ॥

SP0080111 પરમં યત્નમાસ્થાય મયા સોમોઽભિમાર્ગિતઃ ।
SP0080112 ન ચ તં વેદ્મિ કેનાસૌ ક્વ વા નીત ઇતિ પ્રભુઃ ॥

SP0080121 તમેવંવાદિનં ક્રુધ્દ્ધા ઋષયઃ સંશિતવ્રતાઃ ।
SP0080122 ઊચુઃ સર્વે સુસંરબ્ધા ઇલાપુત્રં મહામતિમ્ ॥

SP0080131 ભવાન્રાજા કુતસ્ત્રાતા કૃતોઽસ્માભિર્ભયાર્દિતૈઃ ।
SP0080132 ન ચ નસ્તદ્ભયં શક્તો વિનાશયિતુમાશ્વપિ ॥

SP0080141 વિષયેષ્વતિસક્તાત્મા યોગાત્તં નાનુપશ્યસિ ।
SP0080142 તસ્માદ્વિરોધમાસ્થાય દ્વિજેભ્યો વધમાપ્સ્યસિ ॥

SP0080151 વયમેવ હિ રાજાનમાનયિષ્યામ દુર્વિદમ્ ।
SP0080152 તપસા સ્વેન રાજેન્દ્ર પશ્ય નો બલમુત્તમમ્ ॥

SP0080161 તતસ્તે ઋષયઃ સર્વે તપસા દગ્ધકિલ્બિષાઃ ।
SP0080162 અસ્તુવન્વાગ્ભિરિષ્ટાભિર્ગાયત્રીં વેદભાવિનીમ્ ॥

SP0080171 સ્તુવતાં તુ તતસ્તેષાં ગાયત્રી વેદભાવિની ।
SP0080172 રૂપિણી દર્શનં પ્રાદાદુવાચેદં ચ તાન્દ્વિજાન્ ॥

SP0080181 તુષ્ટાસ્મિ વત્સાઃ કિં વોઽદ્ય કરોમિ વરદાસ્મિ વઃ ।
SP0080182 બ્રૂત તત્કૃતમેવેહ ભવિષ્યતિ ન સંશયઃ ॥

SP0080190 ઋષય ઊચુઃ ।
SP0080191 સોમો નોઽપહૃતો દેવિ કેનાપિ સુદુરાત્મના ।
SP0080192 તમાનય નમસ્તેઽસ્તુ એષ નો વર ઉત્તમઃ ॥

SP0080200 સનત્કુમાર ઉવાચ ।
SP0080201 સા તથોક્તા વિનિશ્ચિત્ય દૃષ્ટ્વા દિવ્યેન ચક્ષુષા ।
SP0080202 શ્યેનીભૂતા જગામાશુ સ્વર્ભાનુમસુરં પ્રતિ ॥

SP0080211 વ્યગ્રાણામસુરાણાં સા ગૃહીત્વા સોમમાગતા ।
SP0080212 આગમ્ય તાનૃષીન્પ્રાહ અયં સોમોઽભિષૂયતામ્ ॥

SP0080221 તે તમાસાદ્ય ઋષયઃ પ્રાપ્ય યજ્ઞફલં મહત્ ।
SP0080222 અમન્યન્ત તપોઽસ્માકં નિષ્કલ્મષમિતિ દ્વિજાઃ ॥

SP0080231 તતસ્તત્ર સ્વયં બ્રહ્મા સહ દેવોરગાદિભિઃ ।
SP0080232 આગત્ય તાનૃષીન્પ્રાહ તપઃ કુરુત મા ચિરમ્ ॥

SP0080241 તે સહ બ્રહ્મણા ગત્વા મૈનાકં પર્વતોત્તમમ્ ।
SP0080242 સર્વૈર્દેવગણૈઃ સાર્ધં તપશ્ચેરુઃ સમાહિતાઃ ॥

SP0080251 તેષાં કાલેન મહતા તપસા ભાવિતાત્મનામ્ ।
SP0080252 યોગપ્રવૃત્તિરભવત્સૂક્ષ્મયુક્તાસ્તતસ્તુ તે ॥

SP0080261 તે યુક્તા બ્રહ્મણા સાર્ધમૃષયઃ સહ દેવતૈઃ ।
SP0080262 મહેશ્વરે મનઃ સ્થાપ્ય નિશ્ચલોપલવત્સ્થિતાઃ ॥

SP0080271 અથ તેષાં મહાદેવઃ પિનાકી નીલલોહિતઃ ।
SP0080272 અભ્યગચ્છત તં દેશં વિમાનેનાર્કતેજસા ॥

SP0080281 તદ્ભાવભાવિતાઞ્જ્ઞાત્વા સદ્ભાવેન પરેણ હ ।
SP0080282 ઉવાચ મેઘનિર્હ્રાદઃ શતદુન્દુભિનિસ્વનઃ ॥

SP0080291 ભો ભો સબ્રહ્મકા દેવાઃ સવિષ્ણુઋષિચારણાઃ ।
SP0080292 દિવ્યં ચક્ષુઃ પ્રયચ્છામિ પશ્યધ્વં માં યથેપ્સિતમ્ ॥

SP0080300 સનત્કુમાર ઉવાચ ।
SP0080301 અપશ્યન્ત તતઃ સર્વે સૂર્યાયુતસમપ્રભમ્ ।
SP0080302 વિમાનં મેરુસંકાશં નાનારત્નવિભૂષિતમ્ ॥

SP0080311 તસ્ય મધ્યેઽગ્નિકૂટં ચ સુમહદ્દીપ્તિમાસ્થિતમ્ ।
SP0080312 જ્વાલામાલાપરિક્ષિપ્તમર્ચિભિરુપશોભિતમ્ ॥

SP0080321 દંષ્ટ્રાકરાલવદનં પ્રદીપ્તાનલલોચનમ્ ।
SP0080322 ત્રેતાગ્નિપિશઙ્ગલજટં ભુજગાબદ્ધમેખલમ્ ॥

SP0080331 મૃષ્ટકુણ્ડલિનં ચૈવ શૂલાસક્તમહાકરમ્ ।
SP0080332 પિનાકિનં દણ્ડહસ્તં મુદ્ગરાશનિપાણિનમ્ ॥

SP0080341 અસિપટ્ટિસહસ્તં ચ ચક્રિણં ચોર્ધ્વમેહનમ્ ।
SP0080342 અક્ષસૂત્રકરં ચૈવ દુષ્પ્રેક્ષ્યમકૃતાત્મભિઃ ।
SP0080343 ચન્દ્રાદિત્યગ્રહૈશ્ચૈવ કૃતસ્રગુપભૂષણમ્ ॥

SP0080351 તમપશ્યન્ત તે સર્વે દેવા દિવ્યેન ચક્ષુષા ।
SP0080352 યં દૃષ્ટ્વા ન ભવેન્મૃત્યુર્મર્ત્યસ્યાપિ કદાચન ॥

SP0080361 તપસા વિનિયોગયોગિનઃ પ્રણમન્તો ભવમિન્દુનિર્મલમ્ ।
SP0080362 વિયતીશ્વરદત્તચક્ષુષઃ સહ દેવૈર્મુનયો મુદાન્વિતાઃ ॥

SP0080371 પ્રસમીક્ષ્ય મહાસુરેશકાલં મનસા ચાપિ વિચાર્ય દુર્વિસહ્યમ્ ।
SP0080372 પ્રણમન્તિ ગતાત્મભાવચિન્તાઃ સહ દેવૈર્જગદુદ્ભવં સ્તુવન્તઃ ॥

SP0089999 ઇતિ સ્કન્દપુરાણે અષ્ટમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૯

SP0090010 સનત્કુમાર ઉવાચ ।
SP0090011 તે દૃષ્ટ્વા દેવદેવેશં સર્વે સબ્રહ્મકાઃ સુરાઃ ।
SP0090012 અસ્તુવન્વાગ્ભિરિષ્ટાભિઃ પ્રણમ્ય વૃષવાહનમ્ ॥

SP0090020 પિતામહ ઉવાચ ।
SP0090021 નમઃ શિવાય સોમાય ભક્તાનાં ભયહારિણે ।
SP0090022 નમઃ શૂલાગ્રહસ્તાય કમણ્ડલુધરાય ચ ॥

SP0090031 દણ્ડિને નીલકણ્ઠાય કરાલદશનાય ચ ।
SP0090032 ત્રેતાગ્નિદીપ્તનેત્રાય ત્રિનેત્રાય હરાય ચ ॥

SP0090041 નમઃ પિનાકિને ચૈવ નમોઽસ્ત્વશનિધારિણે ।
SP0090042 વ્યાલયજ્ઞોપવીતાય કુણ્ડલાભરણાય ચ ॥

SP0090051 નમશ્ચક્રધરાયૈવ વ્યાઘ્રચર્મધરાય ચ ।
SP0090052 કૃષ્ણાજિનોત્તરીયાય સર્પમેખલિને તથા ॥

SP0090061 વરદાત્રે ચ રુદ્રાય સરસ્વતીસૃજે તથા ।
SP0090062 સોમસૂર્યર્ક્ષમાલાય અક્ષસૂત્રકરાય ચ ॥

SP0090071 જ્વાલામાલાસહસ્રાય ઊર્ધ્વલિઙ્ગાય વૈ નમઃ ।
SP0090072 નમઃ પર્વતવાસાય શિરોહર્ત્રે ચ મે પુરા ॥

SP0090081 હાલાહલવિનાશાય કપાલવરધારિણે ।
SP0090082 વિમાનવરવાહાય જનકાય મમૈવ ચ ।
SP0090083 વરદાય વરિષ્ઠાય શ્મશાનરતયે નમઃ ॥

SP0090091 નમો નરસ્ય કર્ત્રે ચ સ્થિતિકર્ત્રે નમઃ સદા ।
SP0090092 ઉત્પત્તિપ્રલયાનાં ચ કર્ત્રે સર્વસહાય ચ ॥

SP0090101 ઋષિદૈવતનાથાય સર્વભૂતાધિપાય ચ ।
SP0090102 શિવઃ સૌમ્યશ્ચ દેવેશ ભવ નો ભક્તવત્સલ ॥

SP0090110 સનત્કુમાર ઉવાચ ।
SP0090111 બ્રહ્મણ્યથૈવં સ્તુવતિ દેવદેવઃ સ લોકપઃ ।
SP0090112 ઉવાચ તુષ્ટસ્તાન્દેવાનૃષીંશ્ચ તપસૈધિતાન્ ॥

SP0090121 તુષ્ટોઽસ્મ્યનેન વઃ સમ્યક્તપસા ઋષિદેવતાઃ ।
SP0090122 વરં બ્રૂત પ્રદાસ્યામિ સુનિશ્ચિન્ત્ય સ ઉચ્યતામ્ ॥

SP0090130 સનત્કુમાર ઉવાચ ।
SP0090131 અથ સર્વાનભિપ્રેક્ષ્ય સંતુષ્ટાંસ્તપસૈધિતાન્ ।
SP0090132 દર્શનેનૈવ વિપ્રેન્દ્ર બ્રહ્મા વચનમબ્રવીત્ ॥

SP0090140 બ્રહ્મોવાચ ।
SP0090141 યદિ તુષ્ટોઽસિ દેવેશ યદિ દેયો વરશ્ચ નઃ ।
SP0090142 તસ્માચ્છિવશ્ચ સૌમ્યશ્ચ દૃશ્યશ્ચૈવ ભવસ્વ નઃ ॥

SP0090151 સુખસંવ્યવહાર્યશ્ચ નિત્યં તુષ્ટમનાસ્તથા ।
SP0090152 સર્વકાર્યેષુ ચ સદા હિતઃ પથ્યશ્ચ શંકરઃ ॥

SP0090161 સહ દેવ્યા સસૂનુશ્ચ સહ દેવગણૈરપિ ।
SP0090162 એષ નો દીયતાં દેવ વરો વરસહસ્રદ ॥

SP0090170 સનત્કુમાર ઉવાચ ।
SP0090171 એવમુક્તઃ સ ભગવાન્બ્રહ્મણા દેવસત્તમઃ ।
SP0090172 સ્વકં તેજો મહદ્દિવ્યં વ્યસૃજત્સર્વયોગવિત્ ॥

SP0090181 અર્ધેન તેજસઃ સ્વસ્ય મુખાદુલ્કાં સસર્જ હ ।
SP0090182 તામાહ ભવ નારીતિ ભગવાન્વિશ્વરૂપધૃક્ ॥

SP0090191 સાકાશં દ્યાં ચ ભૂમિં ચ મહિમ્ના વ્યાપ્ય વિષ્ઠિતા ।
SP0090192 ઉપતસ્થે ચ દેવેશં દીપ્યમાના યથા તડિત્ ॥

SP0090201 તામાહ પ્રહસન્દેવો દેવીં કમલલોચનામ્ ।
SP0090202 બ્રહ્માણં દેવિ વરદમારાધય શુચિસ્મિતે ॥

SP0090211 સા તથેતિ પ્રતિજ્ઞાય તપસ્તપ્તું પ્રચક્રમે ।
SP0090212 રુદ્રશ્ચ તાનૃષીનાહ શ◌ૃણુધ્વં મમ તોષણે ।
SP0090213 ફલં ફલવતાં શ્રેષ્ઠા યદ્બ્રવીમિ તપોધનાઃ ॥

SP0090221 અમરા જરયા ત્યક્તા અરોગા જન્મવર્જિતાઃ ।
SP0090222 મદ્ભક્તાસ્તપસા યુક્તા ઇહૈવ ચ નિવત્સ્યથ ॥

SP0090231 અયં ચૈવાશ્રમઃ શ્રેષ્ઠઃ સ્વર્ણશ◌ૃશ્ણ્ગોઽચલોત્તમઃ ।
SP0090232 પુણ્યં પવિત્રં સ્થાનં વૈ ભવિષ્યતિ ન સંશયઃ ॥

SP0090241 મૈનાકે પર્વતે શ્રેષ્ઠે સ્વર્ણોઽહમભવં યતઃ ।
SP0090242 સ્વર્ણાક્ષીં ચાસૃજં દેવીં સ્વર્ણાક્ષં તેન તત્સ્મૃતમ્ ॥

SP0090251 સ્વર્ણાક્ષે ઋષયો યૂયં ષટ્કુલીયાસ્તપોધનાઃ ।
SP0090252 નિવત્સ્યથ મયાજ્ઞપ્તાઃ સ્વર્ણાક્ષં વૈ તતશ્ચ હ ।
SP0090253 સમન્તાદ્યોજનં ક્ષેત્રં પવિત્રં તન્ન સંશયઃ ॥

SP0090261 દેવગન્ધર્વચરિતમપ્સરોગણસેવિતમ્ ।
SP0090262 સિંહેભશરભાકીર્ણં શાર્દૂલર્ક્ષમૃગાકુલમ્ ।
SP0090263 અનેકવિહગાકીર્ણં લતાવૃક્ષક્ષુપાકુલમ્ ॥

SP0090271 બ્રહ્મચારી નિયમવાઞ્જિતક્રોધો જિતેન્દ્રિયઃ ।
SP0090272 ઉપોષ્ય ત્રિગુણાં રાત્રિં ચરું કૃત્વા નિવેદ્ય ચ ।

SP0090273 યત્ર તત્ર મૃતઃ સોઽપિ બ્રહ્મલોકે નિવત્સ્યતિ ॥

SP0090281 યોઽપ્યેવમેવ કામાત્મા પશ્યેત્તત્ર વૃષધ્વજમ્ ।
SP0090282 ગોસહસ્રફલં સોઽપિ મત્પ્રસાદાદવાપ્સ્યતિ ।
SP0090283 નિયમેન મૃતશ્ચાત્ર મયા સહ ચરિષ્યતિ ॥

SP0090291 યાવત્સ્થાસ્યન્તિ લોકાશ્ચ મૈનાકશ્ચાપ્યયં ગિરિઃ ।
SP0090292 તાવત્સહ મયા દેવા મત્પ્રસાદાચ્ચરિષ્યથ ॥

SP0090301 એવં સ તાનૃષીનુક્ત્વા દૃષ્ટ્વા સૌમ્યેન ચક્ષુષા ।
SP0090302 પશ્યતામેવ સર્વેષાં તત્રૈવાન્તરધીયત ॥

SP0090310 સનત્કુમાર ઉવાચ ।
SP0090311 ય ઇમં શ ृણુયાન્મર્ત્યો દ્વિજાતીઞ્છ્રાવયેત વા ।
SP0090312 સોઽપિ તત્ફલમાસાદ્ય ચરેન્મૃત્યુવિવર્જિતઃ ॥

SP0090321 જયતિ જલદવાહઃ સર્વભૂતાન્તકાલઃ શમદમનિયતાનાં
ક્લેશહર્તા યતીનામ્ ।
SP0090322 જનનમરણહર્તા ચેષ્ટતાં ધાર્મિકાણાં વિવિધકરણયુક્તઃ
ખેચરઃ પાદચારી ॥

SP0090331 મદનપુરવિદારી નેત્રદન્તાવપાતી વિગતભયવિષાદઃ
સર્વભૂતપ્રચેતાઃ ।
SP0090332 સતતમભિદધાનશ્ચેકિતાનાત્મચિત્તઃ કરચરણલલામઃ
સર્વદૃગ્દેવદેવઃ ॥

SP0099999 ઇતિ સ્કન્દપુરાણે નવમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૦

SP0100010 સનત્કુમાર ઉવાચ ।
SP0100011 સા દેવી ત્ર્યમ્બકપ્રોક્તા તતાપ સુચિરં તપઃ ।
SP0100012 નિરાહારા કદાચિચ્ચ એકપર્ણાશના પુનઃ ।
SP0100013 વાય્વાહારા પુનશ્ચાપિ અબ્ભક્ષા ભૂય એવ ચ ॥

SP0100021 તાં તપશ્ચરણે યુક્તાં બ્રહ્મા જ્ઞાત્વાતિભાસ્વરામ્ ।

SP0100022 ઉવાચ બ્રૂહિ તુષ્ટોઽસ્મિ દેવિ કિં કરવાણિ તે ॥

SP0100031 સાબ્રવીત્ ત્ર્યમ્બકં દેવં પતિં પ્રાપ્યેન્દુવર્ચસમ્ ।
SP0100032 વિચરેયં સુખં દેવ સર્વા/લ્લોકાન્નમસ્તવ ॥

SP0100040 બ્રહ્મોવાચ ।
SP0100041 ન હિ યેન શરીરેણ ક્રિયતે પરમં તપઃ ।
SP0100042 તેનૈવ પરમેશોઽસૌ પતિઃ શમ્ભુરવાપ્યતે ॥

SP0100051 તસ્માદ્ધિ યોગાદ્ભવતી દક્ષસ્યેહ પ્રજાપતેઃ ।
SP0100052 જાયસ્વ દુહિતા ભૂત્વા પતિં રુદ્રમવાપ્સ્યસિ ॥

SP0100061 તતઃ સા તદ્વચઃ શ્રુત્વા યોગાદ્દેવી મનસ્વિની ।
SP0100062 દક્ષસ્ય દુહિતા જજ્ઞે સતી નામાતિયોગિની ॥

SP0100071 તાં દક્ષસ્ત્ર્યમ્બકાયૈવ દદૌ ભાર્યામનિન્દિતામ્ ।
SP0100072 બ્રહ્મણો વચનાદ્યસ્યાં માનસાનસૃજત્સુતાન્ ॥

SP0100081 આત્મતુલ્યબલાન્દીપ્તાઞ્જરામરણવર્જિતાન્ ।
SP0100082 અનેકાનિ સહસ્રાણિ રુદ્રાણામમિતૌજસામ્ ॥

SP0100091 તાન્દૃષ્ટ્વા સૃજ્યમાનાંશ્ચ બ્રહ્મા તં પ્રત્યષેધયત્ ।
SP0100092 મા સ્રાક્ષીર્દેવદેવેશ પ્રજા મૃત્યુવિવર્જિતાઃ ॥

SP0100101 અન્યાઃ સૃજસ્વ ભદ્રં તે પ્રજા મૃત્યુસમન્વિતાઃ ।
SP0100102 તેન ચોક્તં સ્થિતોઽસ્મીતિ સ્થાણુસ્તેન તતઃ સ્મૃતઃ ॥

SP0100110 દેવ ઉવાચ ।
SP0100111 ન સ્રક્ષ્યે મૃત્યુસંયુક્તાઃ પ્રજા બ્રહ્મન્કથંચન ।
SP0100112 સ્થિતોઽસ્મિ વચનાત્તેઽદ્ય વક્તવ્યો નાસ્મિ તે પુનઃ ॥

SP0100121 યે ત્વિમે માનસાઃ સૃષ્ટા મહાત્માનો મહાબલાઃ ।
SP0100122 ચરિષ્યન્તિ મયા સાર્ધં સર્વ એતે હિ યાજ્ઞિકાઃ ॥

SP0100130 સનત્કુમાર ઉવાચ ।
SP0100131 અથ કાલે ગતે વ્યાસ સ દક્ષઃ શાપકારણાત્ ।
SP0100132 અન્યાનાહૂય જામાત્।ॠ્ન્સદારાનર્ચયદ્ગૃહે ॥

SP0100141 સતીં સહ ત્ર્યમ્બકેન નાજુહાવ રુષાન્વિતઃ ।
SP0100142 સતી જ્ઞાત્વા તુ તત્સર્વં ગત્વા પિતરમબ્રવીત્ ॥

SP0100151 અહં જ્યેષ્ઠા વરિષ્ઠા ચ જામાત્રા સહ સુવ્રત ।
SP0100152 માં હિત્વા નાર્હસે હ્યેતાઃ સહ ભર્તૃભિરર્ચિતુમ્ ॥

SP0100161 ક્રોધેનાથ સમાવિષ્ટઃ સ ક્રોધોપહતેન્દ્રિયઃ ।
SP0100162 નિરીક્ષ્ય પ્રાબ્રવીદ્દક્ષશ્ચક્ષુષા નિર્દહન્નિવ ॥

SP0100171 મામેતાઃ સતિ સસ્નેહાઃ પૂજયન્તિ સભર્તૃકાઃ ।
SP0100172 ન ત્વં તથા પૂજયસે સહ ભર્ત્રા મહાવ્રતે ॥

SP0100181 ગૃહાંશ્ચ મે સપત્નીકાઃ પ્રવિશન્તિ તપોધનાઃ ।
SP0100182 શ્રેષ્ઠાંસ્તસ્માત્સદા મન્યે તતસ્તાનર્ચયામ્યહમ્ ॥

SP0100191 તસ્માદ્યત્તે કરોમ્યદ્ય શુભં વા યદિ વાશુભમ્ ।
SP0100192 પૂજાં ગૃહાણ તાં પુત્રિ ગચ્છ વા યત્ર રોચતે ॥

SP0100200 સનત્કુમાર ઉવાચ ।
SP0100201 તતઃ સા ક્રોધદીપ્તાસ્યા ન જગ્રાહાતિકોપિતા ।
SP0100202 પૂજામસમ્મતાં હીનામિદં ચોવાચ તં શુભા ॥

SP0100211 યસ્માદસમ્મતામેતાં પૂજાં ત્વં કુરુષે મયિ ।
SP0100212 શ્લાઘ્યાં ચૈવાપ્યદુષ્ટાં ચ શ્રેષ્ઠાં માં ગર્હસે પિતઃ ॥

SP0100221 તસ્માદિમં સ્વકં દેહં ત્યજામ્યેષા તવાત્મજા ।
SP0100222 અસત્કૃતાયાઃ કિં મેઽદ્ય જીવિતેનાશુભેન હ ॥

SP0100230 સનત્કુમાર ઉવાચ ।
SP0100231 તતઃ કૃત્વા નમસ્કારં મનસા ત્ર્યમ્બકાય હ ।
SP0100232 ઉવાચેદં સુસંરબ્ધા વચનં વચનારણિઃ ॥

SP0100241 યત્રાહમુપપદ્યેયં પુનર્દેહે સ્વયેચ્છયા ।
SP0100242 એવં તત્રાપ્યસમ્મૂઢા સમ્ભૂતા ધાર્મિકા સતી ।
SP0100243 ગચ્છેયં ધર્મપત્નીત્વં ત્ર્યમ્બકસ્યૈવ ધીમતઃ ॥

SP0100251 તતઃ સા ધારણાં કૃત્વા આગ્નેયીં સહસા સતી ।
SP0100252 દદાહ વૈ સ્વકં દેહં સ્વસમુત્થેન વહ્નિના ॥

SP0100261 તાં જ્ઞાત્વા ત્ર્યમ્બકો દેવીં તથાભૂતાં મહાયશાઃ ।
SP0100262 ઉવાચ દક્ષં સંગમ્ય ઇદં વચનકોવિદઃ ॥

SP0100271 યસ્માત્તે નિન્દિતશ્ચાહં પ્રશસ્તાશ્ચેતરે પૃથક્ ।

SP0100272 જામાતરઃ સપત્નીકાસ્તસ્માદ્વૈવસ્વતેઽન્તરે ।
SP0100273 ઉત્પત્સ્યન્તે પુનર્યજ્ઞે તવ જામાતરસ્ત્વિમે ॥

SP0100281 ત્વં ચૈવ મમ શાપેન ક્ષત્રિયો ભવિતા નૃપઃ ।
SP0100282 પ્રચેતસાં સુતશ્ચૈવ કન્યાયાં શાખિનાં પુનઃ ।
SP0100283 ધર્મવિઘ્નં ચ તે તત્ર કરિષ્યે ક્રૂરકર્મણઃ ॥

SP0100290 સનત્કુમાર ઉવાચ ।
SP0100291 તમુવાચ તદા દક્ષો દૂયતા હૃદયેન વૈ ।
SP0100292 મયા યદિ સુતા સ્વા વૈ પ્રોક્તા ત્યક્તાપિ વા પુનઃ ।
SP0100293 કિં તવાત્ર કૃતં દેવ અહં તસ્યાઃ પ્રભુઃ સદા ॥

SP0100301 યસ્માત્ત્વં મામભ્યશપસ્તસ્માત્ત્વમપિ શંકર ।
SP0100302 ભૂર્લોકે વત્સ્યસે નિત્યં ન સ્વર્લોકે કદાચન ॥

SP0100311 ભાગં ચ તવ યજ્ઞેષુ દત્ત્વા સર્વે દ્વિજાતયઃ ।
SP0100312 અપઃ સ્પ્રક્ષ્યન્તિ સર્વત્ર મહાદેવ મહાદ્યુતે ॥

SP0100320 સનત્કુમાર ઉવાચ ।
SP0100321 તતઃ સ દેવઃ પ્રહસંસ્તમુવાચ ત્રિલોચનઃ ।
SP0100322 સર્વેષામેવ લોકાનાં મૂલં ભૂર્લોક ઉચ્યતે ॥

SP0100331 તમહં ધારયામ્યેકો લોકાનાં હિતકામ્યયા ।
SP0100332 ભૂર્લોકે હિ ધૃતે લોકાઃ સર્વે તિષ્ઠન્તિ શાશ્વતાઃ ।
SP0100333 તસ્માત્તિષ્ઠામ્યહં નિત્યમિહૈવ ન તવાજ્ઞયા ॥

SP0100341 ભાગાન્દત્ત્વા તથાન્યેભ્યો દિત્સવો મે દ્વિજાતયઃ ।
SP0100342 અપઃ સ્પૃશન્તિ શુદ્ધ્યર્થં ભાગં યચ્છન્તિ મે તતઃ ।
SP0100343 દત્ત્વા સ્પૃશન્તિ ભૂયશ્ચ ધર્મસ્યૈવાભિવૃદ્ધયે ॥

SP0100351 યથા હિ દેવનિર્માલ્યં શુચયો ધારયન્ત્યુત ।
SP0100352 અશુચિં સ્પ્રષ્ટુકામાશ્ચ ત્યક્ત્વાપઃ સંસ્પૃશન્તિ ચ ॥

SP0100361 દેવાનામેવમન્યેષાં દિત્સવો બ્રાહ્મણર્ષભાઃ ।
SP0100362 ભાગાનપઃ સ્પૃશન્તિ સ્મ તત્ર કા પરિદેવના ॥

SP0100371 ત્વં તુ મચ્છાપનિર્દગ્ધો વિપરીતો નરાધમઃ ।
SP0100372 સ્વસ્યાં સુતાયાં મૂઢાત્મા પુત્રમુત્પાદયિષ્યસિ ॥

SP0100380 સનત્કુમાર ઉવાચ ।
SP0100381 એવં સ ભગવાઞ્છમ્ભ્વા દક્ષં દેવો જગત્પતિઃ ।
SP0100382 વિરરામ મહાતેજા જગામ ચ યથાગતમ્ ॥

SP0100391 ચન્દ્રદિવાકરવહ્નિસમાક્ષં ચન્દ્રનિભાનનપદ્મદલાક્ષમ્ ।
SP0100392 ગોવૃષવાહમમેયગુણૌઘં સતતમિહેન્દુવહં પ્રણતાઃ સ્મઃ ॥

SP0100401 ય ઇમં દક્ષશાપાશણ્કં દેવ્યાશ્ચૈવાશરીરતામ્ ।
SP0100402 શ‌ૃણુયાદ્વાથ વિપ્રાન્વા શ્રાવયીત યતવ્રતઃ ।
SP0100403 સર્વપાપવિનિર્મુક્તો રુદ્રલોકમવાપ્નુયાત્ ॥

SP0109999 ઇતિ સ્કન્દપુરાણે દશમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૧

SP0110010 સનત્કુમાર ઉવાચ ।
SP0110011 કદાચિત્સ્વગૃહં પ્રાપ્તં કશ્યપં દ્વિપદાં વરમ્ ।
SP0110012 અપૃચ્છદ્ધિમવાન્પ્રશ્નં લોકે ખ્યાતિકરં નુ કિમ્ ॥

SP0110021 કેનાક્ષયાશ્ચ લોકાઃ સ્યુઃ ખ્યાતિશ્ચ પરમા મુને ।
SP0110022 તથૈવ ચાર્ચનીયત્વં સત્સુ તં કથયસ્વ મે ॥

SP0110030 કશ્યપ ઉવાચ ।
SP0110031 અપત્યેન મહાબાહો સર્વમેતદવાપ્યતે ।
SP0110032 મમ ખ્યાતિરપત્યેન બ્રહ્મણો ઋષિભિશ્ચ હ ॥

SP0110041 કિં ન પશ્યસિ શૈલેન્દ્ર યતો માં પરિપૃચ્છસિ ।
SP0110042 વર્તયિષ્યામિ તચ્ચાપિ યન્મે દૃષ્ટં પુરાચલ ॥

SP0110051 વારાણસીમહં ગચ્છન્નપશ્યં સંસ્થિતં દિવિ ।
SP0110052 વિમાનં સ્વનવદ્દિવ્યમનૌપમ્યમનિન્દિતમ્ ॥

SP0110061 તસ્યાધસ્તાદાર્તનાદં ગર્તાસ્થાને શ‌ૃણોમ્યહમ્ ।
SP0110062 તાનહં તપસા જ્ઞાત્વા તત્રૈવાન્તર્હિતઃ સ્થિતઃ ॥

SP0110071 અથાગાત્તત્ર શૈલેન્દ્ર વિપ્રો નિયમવાઞ્છુચિઃ ।
SP0110072 તીર્થાભિષેકપૂતાત્મા પરે તપસિ સંસ્થિતઃ ॥

SP0110081 અથ સ વ્રજમાનસ્તુ વ્યાઘ્રેણાભીષિતો દ્વિજઃ ।
SP0110082 વિવેશ તં તદા દેશં સા ગર્તા યત્ર ભૂધર ॥

SP0110091 ગર્તાયાં વીરણસ્તમ્બે લમ્બમાનાંસ્તદા મુનીન્ ।
SP0110092 અપશ્યદાર્તો દુઃખાર્તાનપૃચ્છત્તાંશ્ચ સ દ્વિજઃ ॥

SP0110101 કે યૂયં વીરણસ્તમ્બે લમ્બમાના હ્યધોમુખાઃ ।
SP0110102 દુઃખિતાઃ કેન મોક્ષશ્ચ યુષ્માકં ભવિતાનઘાઃ ॥

SP0110110 પિતર ઊચુઃ ।
SP0110111 વયં તેઽકૃતપુણ્યસ્ય પિતરઃ સપિતામહાઃ ।
SP0110112 પ્રપિતામહાશ્ચ ક્લિશ્યામસ્તવ દુષ્ટેન કર્મણા ॥

SP0110121 નરકોઽયં મહાભાગ ગર્તારૂપં સમાસ્થિતઃ ।
SP0110122 ત્વં ચાપિ વીરણસ્તમ્બસ્ત્વયિ લમ્બામહે વયમ્ ॥

SP0110131 યાવત્ત્વં જીવસે વિપ્ર તાવદેવ વયં સ્થિતાઃ ।
SP0110132 મૃતે ત્વયિ ગમિષ્યામો નરકં પાપચેતસઃ ॥

SP0110141 યદિ ત્વં દારસંયોગં કૃત્વાપત્યં ગુણોત્તરમ્ ।
SP0110142 ઉત્પાદયસિ તેનાસ્માન્મુચ્યેમ વયમેકશઃ ॥

SP0110151 નાન્યેન તપસા પુત્ર ન તીર્થાનાં ફલેન ચ ।
SP0110152 તત્કુરુષ્વ મહાબુદ્ધે તારયસ્વ પિત્।ऱ◌્નભયાત્ ॥

SP0110161 સ તથેતિ પ્રતિજ્ઞાય આરાધ્ય ચ વૃષધ્વજમ્ ।
SP0110162 પિત્।ऱ◌્નગર્તાત્સમુદ્ધૃત્ય ગણપાન્પ્રચકાર હ ॥

SP0110171 સ્વયં ચ રુદ્રદયિતઃ સુકેશો નામ નામતઃ ।
SP0110172 સમ્મતો બલવાંશ્ચૈવ રુદ્રસ્ય ગણપોઽભવત્ ॥

SP0110181 તસ્માત્કૃત્વા તપો ઘોરમપત્યં ગુણવત્તરમ્ ।
SP0110182 ઉત્પાદયસ્વ શૈલેન્દ્ર તતઃ કીર્તિમવાપ્સ્યસિ ॥

SP0110190 સનત્કુમાર ઉવાચ ।
SP0110191 સ એવમુક્તો ઋષિણા શૈલેન્દ્રો નિયમે સ્થિતઃ ।
SP0110192 તપશ્ચકાર વિપુલં યેન બ્રહ્મા તુતોષ હ ॥

SP0110201 તમાગત્ય તદા બ્રહ્મા વરદોઽસ્મીત્યભાષત ।

SP0110202 બ્રૂહિ તુષ્ટોઽસ્મિ તે શૈલ તપસાનેન સુવ્રત ॥

SP0110210 હિમવાનુવાચ ।
SP0110211 ભગવન્પુત્રમિચ્છામિ ગુણૈઃ સર્વૈરલંકૃતમ્ ।
SP0110212 એતદ્વરં પ્રયચ્છસ્વ યદિ તુષ્ટોઽસિ નઃ પ્રભો ॥

SP0110220 બ્રહ્મોવાચ ।
SP0110221 કન્યા ભવિત્રી શૈલેન્દ્ર સુતા તે વરવર્ણિની ।
SP0110222 યસ્યાઃ પ્રભાવાત્સર્વત્ર કીર્તિમાપ્સ્યસિ પુષ્કલામ્ ॥

SP0110231 અર્ચિતઃ સર્વદેવાનાં તીર્થકોટીસમાવૃતઃ ।
SP0110232 પાવનશ્ચૈવ પુણ્યશ્ચ દેવાનામપિ સર્વતઃ ।
SP0110233 જ્યેષ્ઠા ચ સા ભવિત્રી તે અન્યે ચાનુ તતઃ શુભે ॥

SP0110240 સનત્કુમાર ઉવાચ ।
SP0110241 એવમુક્ત્વા તતો બ્રહ્મા તત્રૈવાન્તરધીયત ।
SP0110242 સોઽપિ કાલેન શૈલેન્દ્રો મેનાયામુપપાદયત્ ।
SP0110243 અપર્ણામેકપર્ણાં ચ તથા ચાપ્યેકપાટલામ્ ॥

SP0110251 ન્યગ્રોધમેકપર્ણા તુ પાટલં ચૈકપાટલા ।
SP0110252 આશ્રિતે દ્વે અપર્ણા તુ અનિકેતા તપોઽચરત્ ।
SP0110253 શતં વર્ષસહસ્રાણાં દુશ્ચરં દેવદાનવૈઃ ॥

SP0110261 આહારમેકપર્ણેન સૈકપર્ણા સમાચરત્ ।
SP0110262 પાટલેન તથૈકેન વિદધાત્યેકપાટલા ॥

SP0110271 પૂર્ણે પૂર્ણે સહસ્રે તુ આહારં તેન ચક્રતુઃ ।
SP0110272 અપર્ણા તુ નિરાહારા તાં માતા પ્રત્યભાષત ।
SP0110273 નિષેધયન્તી હ્યુ મેતિ માતૃસ્નેહેન દુઃખિતા ॥

SP0110281 સા તથોક્તા તદા માત્રા દેવી દુશ્ચરચારિણી ।
SP0110282 તેનૈવ નામ્ના લોકેષુ વિખ્યાતા સુરપૂજિતા ॥

SP0110291 એતત્તત્રિકુમારીણાં જગત્સ્થાવરજઙ્ગમમ્ ।
SP0110292 એતાસાં તપસા લબ્ધં યાવદ્ભૂમિર્ધરિષ્યતિ ॥

SP0110301 તપઃશરીરાસ્તાઃ સર્વાસ્તિસ્રો યોગબલાન્વિતાઃ ।
SP0110302 સર્વાશ્ચૈવ મહાભાગાઃ સર્વાશ્ચ સ્થિરયૌવનાઃ ॥

SP0110311 તા લોકમાતરશ્ચૈવ બ્રહ્મચારિણ્ય એવ ચ ।
SP0110312 અનુગૃહ્ણન્તિ લોકાંશ્ચ તપસા સ્વેન સર્વદા ॥

SP0110321 ઉમા તાસાં વરિષ્ઠા ચ શ્રેષ્ઠા ચ વરવર્ણિની ।
SP0110322 મહાયોગબલોપેતા મહાદેવમુપસ્થિતા ॥

SP0110331 દત્તકશ્ચોશના તસ્યાઃ પુત્રઃ સ ભૃગુનન્દનઃ ।
SP0110332 અસિતસ્યૈકપર્ણા તુ દેવલં સુષુવે સુતમ્ ॥

SP0110341 યા તુ તાસાં કુમારીણાં તૃતીયા હ્યેકપાટલા ।
SP0110342 પુત્રં શતશલાકસ્ય જૈગીષવ્યમુપસ્થિતા ।
SP0110343 તસ્યાપિ શશ્ણખલિખિતૌ સ્મૃતૌ પુત્રાવયોનિજૌ ॥

SP0110351 ઉમા તુ યા મયા તુભ્યં કીર્તિતા વરવર્ણિની ।
SP0110352 અથ તસ્યાસ્તપોયોગાત્ત્રૈલોક્યમખિલં તદા ।
SP0110353 પ્રધૂપિતં સમાલક્ષ્ય બ્રહ્મા વચનમબ્રવીત્ ॥

SP0110360 બ્રહ્મોવાચ ।
SP0110361 દેવિ કિં તપસા લોકાંસ્તાપયસ્યતિશોભને ।
SP0110362 ત્વયા સૃષ્ટમિદં વિશ્વં મા કૃત્વા તદ્વિનાશય ॥

SP0110371 ત્વં હિ ધારયસે લોકાનિમાન્સર્વાન્સ્વતેજસા ।
SP0110372 બ્રૂહિ કિં તે જગન્માતઃ પ્રાર્થિતં સમ્પ્રસીદ નઃ ॥

SP0110380 દેવ્યુવાચ ।
SP0110381 યદર્થં તપસો હ્યસ્ય ચરણં મે પિતામહ ।
SP0110382 જાનીષે તત્ત્વમેતન્મે તતઃ પૃચ્છસિ કિં પુનઃ ॥

SP0110390 બ્રહ્મોવાચ ।
SP0110391 યદર્થં દેવિ તપસા શ્રામ્યસે લોકભાવનિ ।
SP0110392 સ ત્વાં સ્વયં સમાગમ્ય ઇહૈવ વરયિષ્યતિ ॥

SP0110401 સર્વદેવપતિઃ શ્રેષ્ઠઃ સર્વલોકેશ્વરેશ્વરઃ ।
SP0110402 વયં સદેવા યસ્યેશે વશ્યાઃ કિંકરવાદિનઃ ॥

SP0110411 સ દેવદેવઃ પરમેશ્વરેશ્વરઃ સ્વયં તવાયાસ્યતિ લોકપોઽન્તિકમ્ ।
SP0110412 ઉદારરૂપો વિકૃતાભિરૂપવાન્સમાનરૂપો ન હિ યસ્ય કસ્યચિત્ ॥

SP0110421 મહેશ્વરઃ પર્વતલોકવાસી ચરાચરેશઃ પ્રથમોઽપ્રમેયઃ ।

SP0110422 વિનેન્દુના ઇન્દુસમાનવક્ત્રો વિભીષણં રૂપમિહાસ્થિતોઽગ્રમ્ ॥

SP0119999 ઇતિ સ્કન્દપુરાણે એકાદશોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૨

SP0120010 સનત્કુમાર ઉવાચ ।
SP0120011 તતઃ સ ભગવાન્દેવો બ્રહ્મા તામાહ સુસ્વરમ્ ।
SP0120012 દેવિ યેનૈવ સૃષ્ટાસિ મનસા યસ્ત્વયા વૃતઃ ।
SP0120013 સ ભર્તા તવ દેવેશો ભવિતા મા તપઃ કૃથાઃ ॥

SP0120021 તતઃ પ્રદક્ષિણં કૃત્વા બ્રહ્મા વ્યાસ ગિરેઃ સુતામ્ ।
SP0120022 જગામાદર્શનં તસ્યાઃ સા ચાપિ વિરરામ હ ॥

SP0120031 સા દેવી યુક્તમિત્યેવમુક્ત્વા સ્વસ્યાશ્રમસ્ય હ ।
SP0120032 દ્વારિ જાતમશોકં વૈ સમુપાશ્રિત્ય સંસ્થિતા ॥

SP0120041 અથાગાચ્ચન્દ્રતિલકસ્ત્રિદશાર્તિહરો હરઃ ।
SP0120042 વિકૃતં રૂપમાસ્થાય હ્રસ્વો બાહુક એવ ચ ॥

SP0120051 વિભુગ્નનાસિકો ભૂત્વા કુબ્જઃ કેશાન્તપિશઙ્ગલઃ ।
SP0120052 ઉવાચ વિકૃતાસ્યશ્ચ દેવિ ત્વાં વરયામ્યહમ્ ॥

SP0120061 અથોમા યોગસંસિદ્ધા જ્ઞાત્વા શંકરમાગતમ્ ।
SP0120062 અન્તર્ભાવવિશુદ્ધા સા ક્રિયાનુષ્ઠાનલિપ્સયા ॥

SP0120071 તમુવાચાર્ઘ્યમાનાય્ય મધુપર્કેણ ચૈવ હિ ।
SP0120072 સમ્પૂજ્ય સસુખાસીનં બ્રાહ્મણં બ્રાહ્મણપ્રિયા ॥

SP0120080 દેવ્યુવાચ ।
SP0120081 ભગવન્નસ્વતન્ત્રાસ્મિ પિતા મેઽસ્ત્યરણી તથા ।
SP0120082 તૌ પ્રભૂ મમ દાને વૈ કન્યાહં દ્વિજપુંગવ ॥

SP0120091 ગત્વા યાચસ્વ પિતરં મમ શૈલેન્દ્રમવ્યયમ્ ।
SP0120092 સ ચેદ્દદાતિ માં વિપ્ર તુભ્યં તદ્રુચિતં મમ ॥

SP0120100 સનત્કુમાર ઉવાચ ।

SP0120101 તતઃ સ ભગવાન્દેવસ્તથૈવ વિકૃતઃ પ્રભુઃ ।
SP0120102 ઉવાચ શૈલરાજં તમુમાં મે યચ્છ શૈલરાટ્ ॥

SP0120111 સ તં વિકૃતરૂપેણ જ્ઞાત્વા રુદ્રમથાવ્યયમ્ ।
SP0120112 ભીતઃ શાપાચ્ચ વિમના ઇદં વચનમબ્રવીત્ ॥

SP0120121 ભગવન્નાવમન્યામિ બ્રાહ્મણાન્ભૂમિદૈવતાન્ ।
SP0120122 મનીષિતં તુ યત્પૂર્વં તચ્છૃણુષ્વ મહાતપઃ ॥

SP0120131 સ્વયંવરો મે દુહિતુર્ભવિતા વિપ્રપૂજિતઃ ।
SP0120132 વરયેદ્યં સ્વયં તત્ર સ ભર્તાસ્યા ભવેદિતિ ॥

SP0120140 સનત્કુમાર ઉવાચ ।
SP0120141 તચ્છ્રુત્વા શૈલવચનં ભગવાન્ગોવૃષધ્વજઃ ।
SP0120142 દેવ્યાઃ સમીપમાગત્ય ઇદમાહ મહામનાઃ ॥

SP0120151 દેવિ પિત્રા તવાજ્ઞપ્તઃ સ્વયંવર ઇતિ શ્રુતમ્ ।
SP0120152 તત્ર ત્વં વરયિત્રી યં સ તે ભર્તા કિલાનઘે ॥

SP0120161 તદાપૃચ્છે ગમિષ્યામિ દુર્લભા ત્વં વરાનને ।
SP0120162 રૂપવન્તં સમુત્સૃજ્ય વૃણીથા માદૃશં કથમ્ ॥

SP0120170 સનત્કુમાર ઉવાચ ।
SP0120171 તેનોક્તા સા તદા તત્ર ભાવયન્તી તદીરિતમ્ ।
SP0120172 ભાવં ચ રુદ્રનિહિતં પ્રસાદં મનસસ્તથા ॥

SP0120181 સમ્પ્રાપ્યોવાચ દેવેશં મા તે ભૂદ્બુદ્ધિરન્યથા ।
SP0120182 અહં ત્વાં વરયિષ્યામિ નાન્યદ્ભૂતં કથંચન ॥

SP0120191 અથ વા તેઽસ્તિ સંદેહો મયિ વિપ્ર કથંચન ।
SP0120192 ઇહૈવ ત્વાં મહાભાગ વરયામિ મનોરથમ્ ॥

SP0120200 સનત્કુમાર ઉવાચ ।
SP0120201 ગૃહીત્વા સ્તબકં સા તુ હસ્તાભ્યાં તત્ર સંસ્થિતમ્ ।
SP0120202 સ્કન્ધે શમ્ભોઃ સમાદાય દેવી પ્રાહ વૃતોઽસિ મે ॥

SP0120211 તતઃ સ ભગવાન્દેવસ્તથા દેવ્યા વૃતસ્તદા ।
SP0120212 ઉવાચ તમશોકં વૈ વાચા સંજીવયન્નિવ ॥

SP0120221 યસ્માત્તવ સુપુષ્પેણ સ્તબકેન વૃતો હ્યહમ્ ।

SP0120222 તસ્માત્ત્વં જરયા ત્યક્તઃ અમરઃ સમ્ભવિષ્યસિ ॥

SP0120231 કામરૂપઃ કામપુષ્પઃ કામગો દયિતો મમ ।
SP0120232 સર્વાભરણપુષ્પાઢ્યઃ સર્વવૃક્ષફલોપગઃ ॥

SP0120241 સર્વાન્નભક્ષદશ્ચૈવ અમૃતસ્રવ એવ ચ ।
SP0120242 સર્વગન્ધશ્ચ દેવ્યાસ્ત્વં ભવિષ્યસિ દૃઢં પ્રિયઃ ।
SP0120243 નિર્ભયઃ સર્વલોકેષુ ચરિષ્યસિ સુનિર્વૃતઃ ॥

SP0120251 આશ્રમં ચૈવમત્યર્થં ચિત્રકૂટેતિ વિશ્રુતમ્ ।
SP0120252 યોઽભિયાસ્યતિ પુણ્યાર્થી સોઽશ્વમેધમવાપ્સ્યતિ ।
SP0120253 યત્ર તત્ર મૃતશ્ચાપિ બ્રહ્મલોકં ગમિષ્યતિ ॥

SP0120261 યશ્ચાત્ર નિયમૈર્યુક્તઃ પ્રાણાન્સમ્યક્પરિત્યજેત્ ।
SP0120262 સ દેવ્યાસ્તપસા યુક્તો મહાગણપતિર્ભવેત્ ॥

SP0120270 સનત્કુમાર ઉવાચ ।
SP0120271 એવમુક્ત્વા તદા દેવ આપૃચ્છ્ય હિમવત્સુતામ્ ।
SP0120272 અન્તર્દધે જગત્સ્રષ્ટા સર્વભૂતપ ઈશ્વરઃ ॥

SP0120281 સાપિ દેવી ગતે તસ્મિન્ભગવત્યમિતાત્મનિ ।
SP0120282 તત એવોન્મુખી સ્થિત્વા શિલાયાં સંવિવેશ હ ॥

SP0120291 ઉન્મુખી સા ગતે તસ્મિન્મહેષ્વાસે પ્રજાપતૌ ।
SP0120292 નિશેવ ચન્દ્રરહિતા સા બભૌ વિમનાસ્તદા ॥

SP0120301 અથ શુશ્રાવ સા શબ્દં બાલસ્યાર્તસ્ય શૈલજા ।
SP0120302 સરસ્યુદકસમ્પૂર્ણે સમીપે ચાશ્રમસ્ય હ ॥

SP0120311 સ કૃત્વા બાલરૂપં તુ દેવદેવઃ સ્વયં શિવઃ ।
SP0120312 ક્રીડાહેતોઃ સરોમધ્યે ગ્રાહગ્રસ્તોઽભવત્તદા ॥

SP0120321 યોગમાયામથાસ્થાય પ્રપઞ્ચોદ્ભવકારણમ્ ।
SP0120322 તદ્રૂપં સરસો મધ્યે કૃત્વેદં સમભાષત ।
SP0120323 ત્રાતુ માં કશ્ચિદેત્યેહ ગ્રાહેણ હૃતચેતસમ્ ॥

SP0120331 ધિક્કષ્ટં બાલ એવાહમપ્રાપ્તાર્થમનોરથઃ ।
SP0120332 યાસ્યામિ નિધનં વક્ત્રે ગ્રાહસ્યાસ્ય દુરાત્મનઃ ॥

SP0120341 શોચામિ ન સ્વકં દેહં ગ્રાહગ્રસ્તોઽપિ દુઃખિતઃ ।

SP0120342 યથા શોચામિ પિતરં માતરં ચ તપસ્વિનીમ્ ॥

SP0120351 માં શ્રુત્વા ગ્રાહવદને પ્રાપ્તં નિધનમુત્સુકૌ ।
SP0120352 પ્રિયપુત્રાવેકપુત્રૌ પ્રાણાન્નૂનં વિહાસ્યતઃ ॥

SP0120360 સનત્કુમાર ઉવાચ ।
SP0120361 શ્રુત્વા તુ દેવી તં નાદં વિપ્રસ્યાર્તસ્ય શોભના ।
SP0120362 ઉત્થાય પ્રદ્રુતા તત્ર યત્ર તિષ્ઠત્યસૌ દ્વિજઃ ॥

SP0120371 સાપશ્યદિન્દુવદના બાલકં ચારુરૂપિણમ્ ।
SP0120372 ગ્રાહેણ ગ્રસ્યમાનં તં વેપમાનમવસ્થિતમ્ ॥

SP0120381 સોઽપિ ગ્રાહવરઃ શ્રીમાન્દૃષ્ટ્વા દેવીમુપાગતામ્ ।
SP0120382 તં ગૃહીત્વા દ્રુતં યાતો મધ્યં સરસ એવ હ ॥

SP0120391 સ કૃષ્યમાણસ્તેજસ્વી નાદમાર્તં તદાકરોત્ ।
SP0120392 અથાહ દેવી દુઃખાર્તા બાલં દૃષ્ટ્વા મહાવ્રતા ॥

SP0120401 ગ્રાહરાજ મહાસત્ત્વ બાલકં હ્યેકપુત્રકમ્ ।
SP0120402 વિસૃજૈનં મહાદંષ્ટ્ર ક્ષિપ્રં ભીમપરાક્રમ ॥

SP0120410 ગ્રાહ ઉવાચ ।
SP0120411 યો દેવિ દિવસે ષષ્ઠે પ્રથમં સમુપૈતિ મામ્ ।
SP0120412 સ આહારો મમ પુરા વિહિતો લોકકર્તૃભિઃ ॥

SP0120421 સોઽયં મમ મહાભાગે ષષ્ઠેઽહનિ ગિરીન્દ્રજે ।
SP0120422 બ્રહ્મણા વિહિતો નૂનં નૈનં મોક્ષ્યે કથંચન ॥

SP0120430 દેવ્યુવાચ ।
SP0120431 યન્મયા હિમવચ્છૃઙ્ગે ચરિતં તપ ઉત્તમમ્ ।
SP0120432 તેન બાલમિમં મુઞ્ચ ગ્રાહરાજ નમોઽસ્તુ તે ॥

SP0120440 ગ્રાહ ઉવાચ ।
SP0120441 મા વ્યયં તપસો દેવિ કાર્ષીઃ શૈલેન્દ્રનન્દને ।
SP0120442 નૈનં મોચયિતું શક્તો દેવરાજોઽપિ સ સ્વયમ્ ॥

SP0120451 મહ્યમીશેન તુષ્ટેન શર્વેણોગ્રેણ શૂલિના ।
SP0120452 અમરત્વમવધ્યત્વમક્ષયં બલમેવ ચ ॥

SP0120461 સ્વયંગ્રહણમોક્ષશ્ચ જ્ઞાનં ચૈવાવ્યયં પુનઃ ।

SP0120462 દત્તં તતો બ્રવીમિ ત્વાં નાયં મોક્ષમવાપ્સ્યતિ ॥

SP0120471 અથ વા તે કૃપા દેવિ ભૃશં બાલે શુભાનને ।
SP0120472 બ્રવીમિ યત્કુરુ તથા તતો મોક્ષમવાપ્સ્યતિ ॥

SP0120480 દેવ્યુવાચ ।
SP0120481 ગ્રાહાધિપ વદસ્વાશુ યત્સતામવિગર્હિતમ્ ।
SP0120482 તત્કૃતં નાત્ર સંદેહો માન્યા મે બ્રાહ્મણા દૃઢમ્ ॥

SP0120490 ગ્રાહ ઉવાચ ।
SP0120491 યત્કૃતં વૈ તપઃ કિંચિદ્ભવત્યા સ્વલ્પમન્તશઃ ।
SP0120492 તત્સર્વં મે પ્રયચ્છસ્વ તતો મોક્ષમવાપ્સ્યતિ ॥

SP0120500 દેવ્યુવાચ ।
SP0120501 જન્મપ્રભૃતિ યત્પુણ્યં મહાગ્રાહ કૃતં મયા ।
SP0120502 તત્તે સર્વં મયા દત્તં બાલં મુઞ્ચ મમાગ્રતઃ ॥

SP0120510 સનત્કુમાર ઉવાચ ।
SP0120511 પ્રજજ્વાલ તતો ગ્રાહસ્તપસા તેન બૃંહિતઃ ।
SP0120512 આદિત્ય ઇવ મધ્યાહ્ને દુર્નિરીક્ષ્યસ્તદાભવત્ ॥

SP0120521 ઉવાચ ચેદં તુષ્ટાત્મા દેવીં લોકસ્ય ધારિણીમ્ ।
SP0120522 દેવિ કિં કૃતમેતત્તે અનિશ્ચિત્ય મહાવ્રતે ।
SP0120523 તપસો હ્યર્જનં દુઃખં તસ્ય ત્યાગો ન શસ્યતે ॥

SP0120531 ગૃહાણ તપ એતચ્ચ બાલં ચેમં શુચિસ્મિતે ।
SP0120532 તુષ્ટોઽસ્મિ તે વિપ્રભક્ત્યા વરં તસ્માદ્દદામિ તે ॥

SP0120541 સા ત્વેવમુક્તા ગ્રાહેણ ઉવાચેદં મહાવ્રતા ।
SP0120542 સુનિશ્ચિત્ય મહાગ્રાહ કૃતં બાલસ્ય મોક્ષણમ્ ।
SP0120543 ન વિપ્રેભ્યસ્તપઃ શ્રેષ્ઠં શ્રેષ્ઠા મે બ્રાહ્મણા મતાઃ ॥

SP0120551 દત્ત્વા ચાહં ન ગૃહ્ણામિ ગ્રાહેન્દ્ર વિદિતં હિ તે ।
SP0120552 ન હિ કશ્ચિન્નરો ગ્રાહ પ્રદત્તં પુનરાહરેત્ ॥

SP0120561 દત્તમેતન્મયા તુભ્યં નાદદાનિ હિ તત્પુનઃ ।
SP0120562 ત્વય્યેવ રમતામેતદ્બાલશ્ચાયં વિમુચ્યતામ્ ॥

SP0120571 તથોક્તસ્તાં પ્રશસ્યાથ મુક્ત્વા બાલં નમસ્ય ચ ।

SP0120572 દેવીમાદિત્યસદ્ભાસં તત્રૈવાન્તરધીયત ॥

SP0120581 બાલોઽપિ સરસસ્તીરે મુક્તો ગ્રાહેણ વૈ તદા ।
SP0120582 સ્વપ્નલબ્ધ ઇવાર્થૌઘસ્તત્રૈવાન્તરધીયત ॥

SP0120591 તપસોઽથ વ્યયં મત્વા દેવી હિમગિરીન્દ્રજા ।
SP0120592 ભૂય એવ તપઃ કર્તુમારેભે યત્નમાસ્થિતા ॥

SP0120601 કર્તુકામાં તપો ભૂયો જ્ઞાત્વા તાં શંકરઃ સ્વયમ્ ।
SP0120602 પ્રોવાચ વચનં વ્યાસ મા કૃથાસ્તપ ઇત્યુત ॥

SP0120611 મહ્યમેતત્તપો દેવિ ત્વયા દત્તં મહાવ્રતે ।
SP0120612 તેનૈવમક્ષયં તુભ્યં ભવિષ્યતિ સહસ્રધા ॥

SP0120621 ઇતિ લબ્ધ્વા વરં દેવી તપસોઽક્ષય્યમુત્તમમ્ ।
SP0120622 સ્વયંવરમુદીક્ષન્તી તસ્થૌ પ્રીતિમુદાયુતા ॥

SP0120631 ઇદં પઠેદ્યો હિ નરઃ સદૈવ બાલાનુભાવાચરણં હિ શમ્ભોઃ ।
SP0120632 સ દેહભેદં સમવાપ્ય પૂતો ભવેદ્ગણસ્તસ્ય કુમારતુલ્યઃ ॥

SP0129999 ઇતિ સ્કન્દપુરાણે દ્વાદશમોઽધ્યાયઃ ॥

## સ્કંદપુરાણ અધ્યાય ૧૩

SP0130010 સનત્કુમાર ઉવાચ ।
SP0130011 વિસ્તૃતે હિમવત્પૃષ્ઠે વિમાનશતસંકુલે ।
SP0130012 અભવત્સ તુ કાલેન શૈલપુત્ર્યાઃ સ્વયંવરઃ ॥

SP0130021 અથ પર્વતરાજોઽસૌ હિમવાન્ધ્યાનકોવિદઃ ।
SP0130022 દુહિતુર્દેવદેવેન જ્ઞાત્વા તદભિમન્ત્રિતમ્ ॥

SP0130031 જાનન્નપિ મહાશૈલઃ સમાચારક્રિયેપ્સયા ।
SP0130032 સ્વયંવરં તતો દેવ્યાઃ સર્વલોકેષ્વઘોષયત્ ॥

SP0130041 દેવદાનવસિદ્ધાનાં સર્વલોકનિવાસિનામ્ ।
SP0130042 વૃણુયાત્પરમેશાનં સમક્ષં યેન મે સુતા ॥

SP0130051 તદેવ સુકૃતં શ્લાઘ્યં મમાભ્યુદયસમ્મતમ્ ।

SP0130052 ઇતિ સંચિન્ત્ય શૈલેન્દ્રઃ કૃત્વા હૃદિ મહેશ્વરમ્ ॥

SP0130061 આબ્રહ્મકેષુ લોકેષુ દેવ્યાઃ શૈલેન્દ્રસત્તમઃ ।
SP0130062 કૃત્વા રત્નાકુલં દેશં સ્વયંવરમચીકરત્ ॥

SP0130071 અથૈવમાઘોષિતમાત્ર એવ સ્વયંવરે વ્યાસ મહીધ્રપુત્ર્યાઃ ।
SP0130072 દેવાદયઃ સર્વજગન્નિવાસાઃ સમાયયુર્દિવ્યગૃહીતવેષાઃ ॥

SP0130081 પ્રફુલ્લપદ્માસનસંનિવિષ્ટઃ સિદ્ધૈર્વૃતો યોગિભિરપ્રમેયૈઃ ।
SP0130082 વિજ્ઞાપિતસ્તેન મહીધ્રરાજ્ઞા પિતામહસ્તત્ર સમાજગામ ॥

SP0130091 અક્ષ્ણાં સહસ્રં સુરરાટ્ સ બિભ્રદ્દિવ્યાશ્ઙ્ગહારસ્રગુદાત્તરૂપઃ ।
SP0130092 ઐરાવતં સર્વગજેન્દ્રમુખ્યં સ્રવન્મદાસારકૃતપ્રવાહમ્ ।
SP0130093 આરુહ્ય સર્વામરરાટ્ સ વજ્રં બિભ્રત્સમાગાત્પુરતઃ સુરાણામ્ ॥

SP0130101 તેજઃપ્રતાપાધિકદિવ્યરૂપઃ પ્રોદ્ભાસયન્સર્વદિશો વિવસ્વાન્ ।
SP0130102 હૈમં વિમાનં સચલત્પતાકમારુહ્ય આગાત્ત્વરિતં જવેન ॥

SP0130111 મણિપ્રદીપ્તોજ્જ્વલકુણ્ડલશ્ચ વહ્ન્યર્કતેજઃપ્રતિમે વિમાને ।
SP0130112 સમભ્યગાત્કશ્યપવિપ્રસૂનુરાદિત્ય આગાદ્ભગનામધારી ॥

SP0130121 પીનાશ્ઙ્ગયષ્ટિઃ સુકૃતાશ્ઙ્ગહારસ્તેજોબલાજ્ઞાસદૃશપ્રભાવઃ ।
SP0130122 દણ્ડં સમાદાય કૃતાન્ત આગાદારુહ્ય ભીમં મહિષં જવેન ॥

SP0130131 મહામહીધ્રોચ્છ્રયપીનગાત્રઃ સ્વર્ણાદિરત્નાચિતચારુવેષઃ ।
SP0130132 સમીરણઃ સર્વજગદ્વિભર્તા વિમાનમારુહ્ય સમભ્યગાદ્ધિ ॥

SP0130141 સંતાપયન્સર્વસુરાસુરેશાંસ્તેજોધિકસ્તેજસિ સંનિવિશ્ય ।
SP0130142 વહ્નિઃ સમભ્યેત્ય સુરેન્દ્રમધ્યે જ્વલન્પ્રતસ્થૌ વરવેષધારી ॥

SP0130151 નાનામણિપ્રજ્વલિતાશ્ઙ્ગયષ્ટિર્જગચ્ચરન્દિવ્યવિમાનમગ્ર્યમ્ ।
SP0130152 આરુહ્ય સર્વદ્રવિણાધિપેશઃ સ રાજરાજસ્ત્વરિતોઽભ્યગાચ્ચ ॥

SP0130161 આપ્યાયયન્સર્વસુરાસુરેશાન્કાન્ત્યા ચ વેષેણ ચ ચારુરૂપઃ ।
SP0130162 જ્વલન્મહારત્નવિચિત્રરૂપં વિમાનમારુહ્ય શશી સમાગાત્ ॥

SP0130171 શ્યામાશ્ઙ્ગયષ્ટિઃ સુવિચિત્રવેષઃ સર્વસ્રગાબદ્ધસુગન્ધમાલી ।
SP0130172 તાર્ક્ષ્યં સમારુહ્ય મહીધ્રકલ્પં ગદાધરોઽસૌ ત્વરિતં સમેતઃ ॥

SP0130181 તથાશ્વિનૌ દેવભિષગ્વરૌ તુ એકં વિમાનં ત્વરયાભિરુહ્ય ।
SP0130182 મનોહરાવુજ્જ્વલચારુવેષાવાજગ્મતુર્દેવસદઃ સુવીરૌ ॥

SP0130191 શેષઃ સહસ્રં સ્ફુરદગ્નિવર્ણં બિભ્રત્સ્ફટાનાં જ્વલનાર્કતેજાઃ ।
SP0130192 સાર્ધં સ નાગૈરપરૈર્મહાત્મા વિમાનમારુહ્ય સમભ્યગાચ્ચ ॥

SP0130201 દિતેઃ સુતાનાં ચ મહાસુરાણાં વહ્ન્યર્કશક્રાનિલતુલ્યભાસામ્ ।
SP0130202 વરાનુરૂપં પ્રવિધાય વેષં વૃન્દં સમાગાત્પુરતઃ સુરાણામ્ ॥

SP0130211 ગન્ધર્વરાજઃ સ ચ ચારુરૂપી દિવ્યશૃઙ્ગમો દિવ્યવિમાનચારી ।
SP0130212 ગન્ધર્વસંઘૈઃ સહિતોઽપ્સરોભિઃ શક્રાજ્ઞયા તત્ર સમાજગામ ॥

SP0130221 અન્યે ચ દેવાસ્ત્રિદિવૌકસેશાઃ પૃથક્પૃથક્ચારુગૃહીતવેષાઃ ।
SP0130222 આજગ્મુરારુહ્ય વિમાનપૃષ્ઠં ગન્ધર્વયક્ષોરગકિંનરાશ્ચ ॥

SP0130231 શચીપતિસ્તત્ર સુરેન્દ્રમધ્યે રાજાધિકારાધિકલક્ષ્યમૂર્તિઃ ।
SP0130232 આજ્ઞાબલૈશ્વર્યકૃતપ્રમોહો વૃથાધિકં યત્નમુપાચકાર ॥

SP0130241 હેતુસ્ત્રિલોકસ્ય જગત્પ્રસૂતેર્માતા ચ તેષાં સસુરાસુરાણામ્ ।
SP0130242 પત્ની ચ શમ્ભોઃ પુરુષસ્ય ધામ્નો ગીતા પુરાણે પ્રકૃતિઃ પરાર્થા ।
SP0130243 દક્ષસ્ય કોપાદ્ધિમવદ્ગૃહં સા કાર્યાર્થમાગાત્પરમેશપત્ની ॥

SP0130251 એવં યતસ્તાં ન વિદુઃ સુરેશા મોહસ્તતસ્તાન્પર આવિવેશ ।
SP0130252 વરાર્થમાજગ્મુરતો વિમૂઢા ઈશેન યસ્માદ્ગૃડિતાઃ કૃતાસ્તે ॥

SP0130261 તતઃ પ્રનૃત્તાભિરથાપ્સરોભિર્ગન્ધર્વસંઘૈશ્ચ સુગીતશબ્દૈઃ ।
SP0130262 સ્થિતૈશ્ચ નાનાવિધરૂપવેષૈર્દેવાસુરાદિત્રિદિવૌકસંઘૈઃ ॥

SP0130271 વિમાનપૃષ્ઠે મણિહેમચિત્રે સ્થિતા ચલચ્ચામરવીજિતાઙ્ગી ।
SP0130272 સર્વર્તુપુષ્પાં સુસુગન્ધમાલાં પ્રગૃહ્ય દેવી પ્રસભં પ્રતસ્થે ॥

SP0130280 સનત્કુમાર ઉવાચ ।
SP0130281 માલાં પ્રગૃહ્ય દેવ્યાં તુ સ્થિતાયાં દેવસંસદિ ।
SP0130282 શક્રાદ્યૈરાગતૈર્દેવૈઃ સ્વયંવરમુપાગતૈઃ ॥

SP0130291 દેવ્યા જિજ્ઞાસયા શમ્ભુર્ભૂત્વા પઞ્ચશિખઃ શિશુઃ ।
SP0130292 ઉત્સઙ્ગતલસંસુપ્તો બભૂવ સહસા વિભુઃ ॥

SP0130301 અકસ્માદથ તં દેવી શિશું પઞ્ચશિખં સ્થિતમ્ ।
SP0130302 જ્ઞાત્વા યોગસમાધાનાજ્જહૃષે પ્રીતિસંયુતા ॥

SP0130311 અથ સા શુદ્ધસંકલ્પા કાઙ્ક્ષિતપ્રાપ્તસત્ફલા ।

SP0130312 નિર્વૃતેવ તદા તસ્થૌ કૃત્વા હૃદિ તમેવ તુ ॥

SP0130321 તતો દૃષ્ટ્વા શિશું દેવા દેવ્યા ઉત્સઙ્ગવર્તિનમ્ ।
SP0130322 કોઽયમત્રેતિ સમ્મન્ત્ર્ય ચુક્રુધુર્ભૃશમાર્દિતાઃ ॥

SP0130331 વજ્રમાકારયત્તસ્ય બાહુમુત્ક્ષિપ્ય વૃત્રહા ।
SP0130332 સ બાહુરુત્થિતસ્તસ્ય તથૈવ સમતિષ્ઠત ॥

SP0130341 સ્તમ્ભિતઃ શિશુરૂપેણ દેવદેવેન શમ્ભુના ।
SP0130342 વજ્રં ક્ષેપ્તું ન શશાક બાહું ચાલયિતું ન ચ ॥

SP0130351 ભગો નામ તતો દેવ આદિત્યઃ કાશ્યપો બલી ।
SP0130352 ઉત્ક્ષિપ્ય મુશલં દીપ્તં ક્ષેપ્તુમૈચ્છદ્વિમોહિતઃ ।
SP0130353 તસ્યાપિ ભગવાન્બાહું તથૈવાસ્તમ્ભયત્તદા ॥

SP0130361 શિરઃ પ્રકમ્પયન્વિષ્ણુઃ સક્રોધસ્તમવૈક્ષત ।
SP0130362 તસ્યાપિ શિરસો દેવઃ ખાલિત્યં પ્રચકાર હ ॥

SP0130371 પૂષા દન્તાન્દશન્દન્તૈઃ શર્વમૈક્ષત મોહિતઃ ।
SP0130372 તસ્યાપિ દશનાઃ પેતુર્દૃષ્ટમાત્રસ્ય શમ્ભુના ॥

SP0130381 યમસ્ય સ્તમ્ભિતો દણ્ડસ્તેજો વહ્નેઃ શશેઃ પ્રભા ।
SP0130382 બલં વાયોસ્તથાન્યેષાં તસ્મિન્સર્વદિવૌકસામ્ ।
SP0130383 બલં તેજશ્ચ યોગં ચ તથૈવાસ્તમ્ભયદ્વિભુઃ ॥

SP0130391 અથ તેષુ સ્થિતેષ્વેવં મન્યુમત્સુ સુરેષુ તુ ।
SP0130392 બ્રહ્મા પરમસંવિગ્નો ધ્યાનમાસ્થાય સાદરમ્ ।
SP0130393 બુબુધે દેવદેવેશમુમોત્સઙ્ગસમાસ્થિતમ્ ॥

SP0130401 સ બુદ્ધ્વા પરમેશાનં શીઘ્રમુત્થાય સાદરમ્ ।
SP0130402 વવન્દે ચરણૌ શમ્ભોરસ્તુવચ્ચ પિતામહઃ ।
SP0130403 પૌરાણૈઃ સામસંગીતૈઃ પુણ્યાખ્યૈર્ગુહ્યનામભિઃ ॥

SP0130411 અજસ્ત્વમમરો દેવ સ્રષ્ટા હર્તા વિભુઃ પરઃ ।
SP0130412 પ્રધાનપુરુષસ્તત્ત્વં બ્રહ્મ ધ્યેયં તદક્ષયમ્ ॥

SP0130421 અમૃતં પરમાત્મા ચ ઈશ્વરઃ કારણં મહત્ ।
SP0130422 બ્રહ્મકૃત્પ્રકૃતેઃ સ્રષ્ટા સર્વસૃક્પરમેશ્વરઃ ॥

SP0130431 ઇયં ચ પ્રકૃતિર્દેવી સદા તે સૃષ્ટિકારણમ્ ।

SP0130432 પત્નીરૂપં સમાસ્થાય જગત્કારણમાગતા ॥

SP0130441 નમસ્તુભ્યં સદેશાન દેવ્યાશ્ચૈવ સદા નમઃ ।
SP0130442 પ્રસાદાત્તવ દેવેશ નિયોગાચ્ચ મયા પ્રજાઃ ॥

SP0130451 દેવાદ્યાસ્ત ઇમે સૃષ્ટા મૂઢાસ્ત્વદ્યોગમોહિતાઃ ।
SP0130452 કુરુ પ્રસાદમેતેષાં યથાપૂર્વં ભવન્ત્વિમે ॥

SP0130461 તત એવં તદા બ્રહ્મા વિજ્ઞાપ્ય પરમેશ્વરમ્ ।
SP0130462 સ્તમ્ભિતાન્સર્વદેવાંસ્તાનિદમાહ મહાદ્યુતિઃ ॥

SP0130471 મૂઢાઃ સ્થ દેવતાઃ સર્વે નૈનં બુધ્યત શંકરમ્ ।
SP0130472 દેવદેવમિહાયાતં મમૈવોત્પત્તિકારણમ્ ॥

SP0130481 અયં રુદ્રો મહાદેવઃ શર્વો ભીમઃ કપર્દિમાન્ ।
SP0130482 ઉગ્ર ઈશાન આત્મા ચ અજઃ શંકર એવ ચ ॥

SP0130491 દેવદેવઃ પરં ધામ ઈશઃ પશુપતિઃ પતિઃ ।
SP0130492 જગત્સ્રષ્ટા જગદ્ધર્તા જગત્સંસ્થિતિકારણમ્ ॥

SP0130501 ગચ્છધ્વં શરણં શીઘ્રમેવમેવામરેશ્વરાઃ ।
SP0130502 સાર્ધં મયૈવ દેવેશં પરમાત્માનમવ્યયમ્ ॥

SP0130511 તતસ્તે સ્તમ્ભિતાઃ સર્વે તથૈવ ત્રિદિવૌકસઃ ।
SP0130512 પ્રણેમુર્મનસા શર્વં ભાવશુદ્ધેન ચેતસા ॥

SP0130521 અથ તેષાં પ્રસન્નોઽભૂદ્દેવદેવો મહેશ્વરઃ ।
SP0130522 યથાપૂર્વં ચકારાશુ દેવતાનાં તનૂસ્તદા ॥

SP0130531 તત એવં પ્રવૃત્તે તુ સર્વદેવનિવારણે ।
SP0130532 વપુશ્ચકાર દેવેશસ્ત્ર્યક્ષં પરમમદ્ભુતમ્ ।
SP0130533 તેજસા યસ્ય દેવાસ્તે ચક્ષુરપ્રાર્થયન્વિભુમ્ ॥

SP0130541 તેભ્યઃ પરમકં ચક્ષુઃ સ્વવપુર્દૃષ્ટિશક્તિમત્ ।
SP0130542 પ્રાદાત્પરમદેવેશઃ અપશ્યંસ્તે તદા પ્રભુમ્ ॥

SP0130551 તે દૃષ્ટ્વા પરમેશાનં તૃતીયેક્ષણધારિણમ્ ।
SP0130552 બ્રહ્માદ્યા નેમિરે તૂર્ણં સર્વ એવ સુરેશ્વરાઃ ॥

SP0130561 તસ્ય દેવી તદા હૃષ્ટા સમક્ષં ત્રિદિવૌકસામ્ ।
SP0130562 પાદયોઃ સ્થાપયામાસ સ્રગ્માલામમિતદ્યુતેઃ ॥

SP0130571 સાધુ સાધ્વિતિ સમ્પ્રોચ્ય દેવતાસ્તે પુનર્વિભુમ્ ।
SP0130572 સહ દેવ્યા નમશ્ચક્રુઃ શિરોભિર્ભૂતલાશ્રિતૈઃ ॥

SP0130581 અથાસ્મિન્નન્તરે વ્યાસ બ્રહ્મા લોકપિતામહઃ ।
SP0130582 હિમવન્તં મહાશૈલમિદમાહ મહાદ્યુતિઃ ॥

SP0130591 શ્લાઘ્યઃ પૂજ્યશ્ચ વન્દ્યશ્ચ સર્વેષાં નસ્ત્વમદ્ય હિ ।
SP0130592 શર્વેણ સહ સમ્બન્ધો યસ્ય તેઽભૂદયં મહાન્ ।
SP0130593 ક્રિયતાં ચાશુ ઉદ્વાહઃ કિમર્થં સ્થીયતે પરમ્ ॥

SP0130601 તતઃ પ્રણમ્ય હિમવાંસ્તં દેવં પ્રત્યભાષત ।
SP0130602 ત્વમેવ કારણં દેવ યેન શર્વાદયં મમ ॥

SP0130611 પ્રસાદઃ સહસોત્પન્નો હેતુશ્ચાપિ ત્વમેવ હિ ।
SP0130612 ઉદ્વાહં તુ યથા યાદૃક્તદ્વિધત્સ્વ પિતામહ ॥

SP0130621 તત એવં વચઃ શ્રુત્વા ગિરિરાજ્ઞઃ પિતામહઃ ।
SP0130622 ઉદ્વાહઃ ક્રિયતાં દેવ ઇતિ દેવમુવાચ હ ।
SP0130623 તમાહ શંકરો દેવં યથેષ્ટમિતિ લોકપઃ ॥

SP0130631 તત્ક્ષણાચ્ચ તતો વ્યાસ બ્રહ્મણા કલ્પિતં પુરમ્ ।
SP0130632 ઉદ્વાહાર્થં મહેશસ્ય નાનારત્નોપશોભિતમ્ ॥

SP0130641 રત્નાનિ મણયશ્ચિત્રા હેમ મૌક્તિકમેવ ચ ।
SP0130642 મૂર્તિમન્ત ઉપાગમ્ય અલંચક્રુઃ પુરોત્તમમ્ ॥

SP0130651 ચિત્રા મારકતી ભૂમિઃ સૌવર્ણસ્તમ્ભશોભિતા ।
SP0130652 ભાસ્વત્સ્ફટિકભિત્તીભિર્મુક્તાહારપ્રલમ્બિતા ॥

SP0130661 તસ્મિઞ્છિવપુરે રમ્યે ઉદ્વાહાર્થં વિનિર્મિતે ।
SP0130662 શુશુભે દેવદેવસ્ય મહેશસ્ય મહાત્મનઃ ॥

SP0130671 સોમાદિત્યૌ સમં તત્ર ભાસયન્તૌ મહામણી ।
SP0130672 સૌરભેયં મનોરમ્યં ગન્ધમાઘ્રાય મારુતઃ ।
SP0130673 પ્રવવૌ સુખસંસ્પર્શ ઈશે ભક્તિં પ્રસાદયન્ ॥

SP0130681 સમુદ્રાસ્તત્ર ચત્વારઃ શક્રાદ્યાશ્ચ સુરોત્તમાઃ ।
SP0130682 દેવનદ્યો મહાનદ્યઃ સિદ્ધા મુનય એવ ચ ॥

SP0130691 ગન્ધર્વાપ્સરસઃ સર્વે નાગા યક્ષાઃ સરાક્ષસાઃ ।
SP0130692 ગુહ્યકાઃ ખેચરાશ્ચાન્યે કિંનરા દેવચારણાઃ ॥

SP0130701 તુમ્બુરુર્નારદો હાહા હૂહૂ ચૈવ તુ સામગાઃ ।
SP0130702 રત્નાન્યાદાય વાદ્યાંશ્ચ તત્રાજગ્મુસ્તદા પુરમ્ ॥

SP0130711 ઋષયઃ કૃત્સ્નશસ્તત્ર વેદગીતાંસ્તપોધનાઃ ।
SP0130712 પુણ્યાન્વૈવાહિકાન્મન્ત્રાઞ્જેપુઃ સંહૃષ્ટમાનસાઃ ॥

SP0130721 જગતો માતરઃ સર્વા દેવકન્યાશ્ચ કૃત્સ્નશઃ ।
SP0130722 ગાયન્તિ હૃષિતાઃ સર્વા ઉદ્વાહે પરમેષ્ઠિનઃ ॥

SP0130731 ઋતવઃ ષટ્ સમં તત્ર નાનાગન્ધસુખાવહાઃ ।
SP0130732 ઉદ્વાહઃ શંકરસ્યેતિ મૂર્તિમન્ત ઉપસ્થિતાઃ ॥

SP0130741 નીલજીમૂતસંઘાતમન્દ્રધ્વાનપ્રહર્ષિતૈઃ ।
SP0130742 કેકાયમાનૈઃ શિખિભિર્નૃત્યમાનૈશ્ચ સર્વશઃ ॥

SP0130751 વિલોલપિશઙ્ગલસ્પષ્ટવિદ્યુલ્લેખાવભાસિતા ।
SP0130752 કુમુદાપીતશુક્લાભિર્બલાકાભિશ્ચ શોભિતા ॥

SP0130761 પ્રત્યગ્રસંજાતશિલીન્ધ્રકન્દલા લતાદ્રુમાભ્યુદ્ગતચારુપલ્લવા ।
SP0130762 શુભામ્બુધારાપ્રણયપ્રબોધિતૈર્મદાલસૈર્ભેકગણૈશ્ચ નાદિતા ॥

SP0130771 પ્રિયેષુ માનોન્નતમાનસાનાં સુનિશ્ચિતાનામપિ કામિનીનામ્ ।
SP0130772 મયૂરકેકાભિરુતૈઃ ક્ષણેન મનોહરૈર્માનવિભઙ્ગકર્ત્રી ॥

SP0130781 તથા ત્રિવર્ણોજ્જ્વલચારુમૂર્તિના શશાઙ્કલેખાકુટિલેન સર્વતઃ ।
SP0130782 પયોદસંઘાતસમીપવર્તિના મહેન્દ્રચાપેન ભૃશં વિરાજિતા ॥

SP0130791 વિચિત્રપુષ્પસ્પર્શાત્સુગન્ધિભિર્ઘનામ્બુસમ્પર્કતયા સુશીતલૈઃ ।
SP0130792 વિકમ્પયન્તી પવનૈર્મનોહરૈઃ સુરાઙ્ગનાનામલકાવલીઃ શુભાઃ ॥

SP0130801 ગર્જત્પયોદસ્થગિતેન્દુબિમ્બા નવામ્બુસેકોદ્ગતચારુદૂર્વા ।
SP0130802 નિરીક્ષિતા સાદરમુત્સુકાભિર્નિશ્વાસધૂમ્રં પથિકાઙ્ગનાભિઃ ॥

SP0130811 હંસનૂપુરશબ્દાઢ્યા સમુન્નતપયોધરા ।
SP0130812 ચલદ્વિદ્યુલ્લતાકાઞ્ચી સ્પષ્ટપદ્મવિલોચના ॥

SP0130821 અસિતજલદવૃન્દધ્વાનવિત્રસ્તહંસા
વિમલસલિલધારાપાતનમ્રોત્પલાગ્રા ।

SP0130822 સુરભિકુસુમરેણુક્લૃપ્તસર્વાશણ્ગશોભા ગિરિદુહિતૃવિવાહે પ્રાવૃડાગાદ્વિભૂત્યૈ ॥

SP0130831 મેઘકઞ્ચુકનિર્મુક્તા પદ્મકોશોદ્ધતસ્તની ।
SP0130832 હંસનૂપુરનિર્હ્રાદા સર્વરમ્યદિગન્તરા ॥

SP0130841 વિસ્તીર્ણપુલિનશ્રોણી કૂજત્સારસમેખલા ।
SP0130842 પ્રફુલ્લેન્દીવરાભોગવિલોચનમનોહરા ॥

SP0130851 પક્વબિમ્બાધરપુટા કુન્દદન્તપ્રહાસિની ।
SP0130852 નવશ્યામાલતાશ્યામરોમરાજીપરિષ્કૃતા ॥

SP0130861 ચન્દ્રાંશુહારવર્યેણ સૌધોરઃસ્થલસર્પિણા ।
SP0130862 પ્રહ્લાદયન્તી ચેતાંસિ સર્વેષાં ત્રિદિવૌકસામ્ ॥

SP0130871 સમદાલિકુલોદ્ગીતમધુરસ્વરભાષિણી ।
SP0130872 ચલત્કુમુદસંઘાતચારુકુણ્ડલશોભિની ॥

SP0130881 રક્તાશોકાગ્રશાખોત્થપલ્લવાશણ્ગુલિધારિણી ।
SP0130882 તત્પુષ્પસંચયમયૈર્વાસોભિઃ સમલંકૃતા ॥

SP0130891 રક્તોત્પલાગ્રચરણા જાતીપુષ્પનખાવલી ।
SP0130892 કદલીસ્તમ્ભચારૂરુઃ શશાશણ્કવદના તથા ॥

SP0130901 પદ્મકિઞ્જલ્કસમ્પૃક્તપવનાગ્રકરૈઃ સુરાન્ ।
SP0130902 પ્રેમ્ણા સ્પૃશન્તી કાન્તેવ શરદાગાન્મનોરમા ॥

SP0130911 નિર્મુક્તાસિતમેઘકઞ્ચુકપુટા પૂર્ણેન્દુબિમ્બાનના
SP0130912 નીલામ્ભોજવિલોચનારવિન્દમુકુલપ્રોદ્ભિન્નચારુસ્તની ।
SP0130913 નાનાપુષ્પરજઃસુગન્ધિપવનપ્રહ્લાદની ચેતસાં
SP0130914 તત્રાગાત્કલહંસનૂપુરરવા દેવ્યા વિવાહે શરત્ ॥

SP0130921 અત્યર્થશીતલામ્ભોભિઃ પ્લાવયન્તૌ ગિરેઃ શિલાઃ ।
SP0130922 ઋતૂ શિશિરહેમન્તાવાજગ્મતુરતિદ્યુતી ॥

SP0130931 તાભ્યામૃતુભ્યાં પ્રાપ્તાભ્યાં હિમવાન્સ નગોત્તમઃ ।
SP0130932 પ્રાલેયચૂર્ણવર્ષિભ્યાં ક્ષિપ્રં રૌપ્ય ઇવાબભૌ ॥

SP0130941 તેન પ્રાલેયવર્ષેણ ઘનેન સ હિમાચલઃ ।
SP0130942 અગાધેન તદા રેજે ક્ષીરોદ ઇવ સાગરઃ ॥

SP0130951 હિમસ્થાનેષુ હિમવાન્નાશયામાસ પાદપાન્ ।
SP0130952 સાધૂપચારાન્સહસા કૃતાર્થ ઇવ દુર્જનઃ ॥

SP0130961 પ્રાલેયપટલચ્છન્નૈઃ શ◌ૃશણ્ગૈઃ સ શુશુભે નગઃ ।
SP0130962 છત્રૈરિવ મહાભોગૈઃ પાણ્ડરૈઃ પૃથિવીપતિઃ ॥

SP0130971 પાણ્ડરાણિ વિશાલાનિ શ્રીમન્તિ સુભગાનિ ચ ।
SP0130972 તુશણ્ગાનિ ચાદ્રિશ◌ૃશણ્ગાણિ સૌધાનીવ ચકાશિરે ॥

SP0130981 તસ્યાચલેન્દ્રસ્ય દરીષ્વતીવ વિચિત્રસારશણ્ગકુલાકુલાસુ ।
SP0130982 પ્રાલેયધારાઃ શશિપાદગૌરા ગોક્ષીરધારા ઇવ સંનિપેતુઃ ॥

SP0130991 બહુકુસુમરજોભિરુત્કરાશણ્ગા હિમકણસશણ્ગસુશીતલાઃ સમીરાઃ ।
SP0130992 વવુરમરગણેશ્વરામ્બરાણિ પ્રતનુતમાનિ શનૈર્વિકમ્પયન્તઃ ॥

SP0131001 નિર્ધૂતરૂક્ષાનિલશીતદોષઃ પ્રોદ્ભિન્નચૂતાશણ્કુરકર્ણપૂરઃ ।
SP0131002 વસન્તકાલશ્ચ તમદ્રિપુત્રીસેવાર્થમાગાદ્ધિમવન્તમાશુ ॥

SP0131011 તસ્મિન્નૃતાવદ્રિસુતાવિવાહસિષેવયા તં ગિરિમભ્યુપેતે ।
SP0131012 પ્રાદુર્બભૂવુઃ કુસુમાવતંસાઃ સમન્તતઃ પાદપગુલ્મષણ્ડાઃ ॥

SP0131021 વવુઃ સુગન્ધાઃ સુભગાઃ સુશીતા વિચિત્રપુષ્પાગ્રરજોત્કરાશણ્ગાઃ ।
SP0131022 મનોભવોદ્રેકકરાઃ સુરાણાં સુરાશણ્ગનાનાં ચ મુહુઃ સમીરાઃ ॥

SP0131031 સ્વચ્છામ્બુપૂર્ણાશ્ચ તથા નલિન્યઃ પદ્મોત્પલાનાં મુકુલૈરુપેતાઃ ।
SP0131032 ઈષત્સમુદ્ભિન્નપયોધરાગ્રા નાર્યો યથા રમ્યતમા બભૂવુઃ ॥

SP0131041 ઋતોઃ સ્વભાવાચ્ચ મદોદ્ભવાચ્ચ ફુલ્લાસુ શાખાસુ નિલીનપક્ષાઃ ।
SP0131042 ચેતોભિરામં ત્રિદશાશણ્ગનાનાં પુંસ્કોકિલાશ્ચાતિકલં વિનેદુઃ ॥

SP0131051 નાત્યુષ્ણશીતાનિ સરઃપયાંસિ કિઞ્જલ્કચૂર્ણૈઃ કપિલીકૃતાનિ ।
SP0131052 ચક્રાહ્વયુગ્મૈરુપનાદિતાનિ પપુઃ પ્રહૃષ્ટાઃ સુરદન્તિમુખ્યાઃ ॥

SP0131061 પ્રિયશણ્ગૂશ્ચૂતતરવશ્ચૂતાંશ્ચાપિ પ્રિયશણ્ગવઃ ।
SP0131062 તર્જયન્ત ઇવાન્યોન્યં મઞ્જરીભિશ્ચકાશિરે ॥

SP0131071 હિમશુક્લેષુ શ◌ૃશણ્ગેષુ તિલકાઃ કુસુમોત્કરાઃ ।
SP0131072 શુશુભુઃ કાર્યમુદ્દિશ્ય વૃદ્ધા ઇવ સમાગતાઃ ॥

SP0131081 ફુલ્લાશોકલતાસ્તત્ર રેજિરે શાલસંશ્રિતાઃ ।
SP0131082 કામિન્ય ઇવ કાન્તાનાં કણ્ઠાલમ્બિતમૂર્તયઃ ॥

SP0131091 સમદાલિકુલોદ્ગીતલતાકુસુમસંચયાઃ ।
SP0131092 પરસ્પરં હિ માલત્યો ભાષન્ત્ય ઇવ રેજિરે ॥

SP0131101 નીલાનિ નીલામ્બુરુહૈઃ પયાંસિ ગૌરાણિ ગૌરૈશ્ચ સનાલદણ્ડૈઃ ।
SP0131102 રક્તૈશ્ચ રક્તાનિ ભૃશં કૃતાનિ
મત્તદ્વિરેફાર્ધવિદષ્ટપત્રૈઃ ॥

SP0131111 હૈમાનિ વિસ્તીર્ણજલેષુ કેષુચિન્નિરન્તરં મારકતાનિ કેષુચિત્ ।
SP0131112 વૈદૂર્યનાલાનિ સરઃસુ કેષુચિત્પ્રજજ્ઞિરે પદ્મવનાનિ સર્વતઃ ॥

SP0131121 વાપ્યસ્તત્રાભવન્રમ્યાઃ કમલોત્પલભૂષિતાઃ ।
SP0131122 નાનાવિહગસંઘુષ્ટા હેમસોપાનપણ્ક્તયઃ ॥

SP0131131 શ્ૃણ્ગાણિ તસ્ય તુ ગિરેઃ કર્ણિકારૈઃ સુપુષ્પિતૈઃ ।
SP0131132 સમુચ્છ્રિતાન્યવિરલૈર્હૈમાનીવ બભુર્મુને ॥

SP0131141 ઈષદુદ્ભિન્નકુસુમૈઃ પાટલૈશ્ચાપિ પાટલાઃ ।
SP0131142 સમ્બભૂવુર્દિશઃ સર્વાઃ પવનાકમ્પિમૂર્તિભિઃ ॥

SP0131151 કૃષ્ણાઞ્જનાદ્રિશ્ૃણ્ગાભા નીલાશોકમહીરુહાઃ ।
SP0131152 ગિરૌ વવૃધિરે ફુલ્લાઃ સ્પર્ધયેવ પરસ્પરમ્ ॥

SP0131161 ચીરુવાકવિઘુષ્ટાનિ કિંશુકાનાં વનાનિ ચ ।
SP0131162 પર્વતસ્ય નિતમ્બેષુ સર્વેષ્વેવાભિજજ્ઞિરે ॥

SP0131171 તમાલગુલ્મૈસ્તસ્યાસીચ્છોભા હિમવતસ્તદા ।
SP0131172 નીલજીમૂતસંઘાતૈર્નિલીનૈરિવ સન્ધિષુ ॥

SP0131181 નિકામપુષ્પૈઃ સુવિશાલશાખૈઃ સમુચ્છ્રિતૈશ્ચમ્પકપાદપૈશ્ચ ।
SP0131182 પ્રમત્તપુંસ્કોકિલસમ્પ્રલાપૈર્હિમાચલોઽતીવ તદા રરાજ ॥

SP0131191 શ્રુત્વા શબ્દં ઋતુમદકલં સર્વતઃ કોકિલાનાં
SP0131192 ચઞ્ચત્પક્ષાઃ સુમધુરરુતં નીલકણ્ઠા વિનેદુઃ ।
SP0131193 તેષાં શબ્દૈરુપચિતબલઃ પુષ્પચાપેષુહસ્તઃ
SP0131194 સજ્જીભૂતસ્ત્રિદશવનિતા વેદ્ધુમણ્ગેષ્વનણ્ગઃ ॥

SP0131201 પટુસૂર્યાતપશ્ચાપિ પ્રાયઃ સોષ્ણજલાશયઃ ।
SP0131202 દેવીવિવાહસેવાર્થં ગ્રીષ્મ આગાદ્ધિમાચલમ્ ॥

SP0131211 સ ચાપિ તરુભિસ્તત્ર બહુભિઃ કુસુમોત્કરૈઃ ।
SP0131212 શોભયામાસ શ્ૃશઙ્ગાણિ પ્રાલેયાદ્રેઃ સમન્તતઃ ॥

SP0131221 તસ્યાપિ ચ ઋતોસ્તત્ર વાયવઃ સુમનોહરાઃ ।
SP0131222 વવુઃ પાટલવિસ્તીર્ણકદમ્બાર્જુનગન્ધિનઃ ॥

SP0131231 વાપ્યઃ પ્રફુલ્લપદ્મૌઘાઃ કેસરારુણમૂર્તયઃ ।
SP0131232 અભવંસ્તટસંઘુષ્ટકલહંસકદમ્બકાઃ ॥

SP0131241 તથા કુરવકાશ્ચાપિ કુસુમાપાણ્ડુમૂર્તયઃ ।
SP0131242 સર્વેષુ જજ્ઞુઃ શ્ૃશઙ્ગેષુ ભ્રમરાવલિસેવિતાઃ ॥

SP0131251 બકુલાશ્ચ નિતમ્બેષુ વિશાલેષુ મહીભૃતઃ ।
SP0131252 ઉત્સસર્જુર્મનોજ્ઞાનિ કુસુમાનિ સમન્તતઃ ॥

SP0131261 ઇતિ કુસુમવિચિત્રસર્વવૃક્ષા વિવિધવિહંગમનાદરમ્યદેશાઃ ।
SP0131262 હિમગિરિતનયાવિવાહભૂત્યૈ ષડુપયયુરૃતવો મુનિપ્રવીર ॥

SP0131271 તત એવં પ્રવૃત્તે તુ સર્વભૂતસમાગમે ।
SP0131272 નાનાવાદ્યશતાકીર્ણે બ્રહ્મા મમ પિતા સ્વયમ્ ॥

SP0131281 શૈલપુત્રીમલંકૃત્ય યોગ્યાભરણસમ્પદા ।
SP0131282 પુરં પ્રવેશયામાસ સ્વયમાદાય લોકધૃક્ ॥

SP0131291 તતસ્તુ પુનરેવેશં બ્રહ્મા વ્યજ્ઞાપયદ્વિભુમ્ ।
SP0131292 હવિર્જુહોમિ વહ્નૌ તુ ઉપાધ્યાયપદે સ્થિતઃ ।
SP0131293 દદાસિ મહ્યં યદ્યાજ્ઞાં કર્તવ્યોઽયં ક્રિયાવિધિઃ ॥

SP0131301 તમાહ શંકરો દેવં દેવદેવો જગત્પતિઃ ।
SP0131302 યદ્યદિષ્ટં સુરેશાન તત્કુરુષ્વ યથેપ્સિતમ્ ।
SP0131303 કર્તાસ્મિ વચનં સર્વં બ્રહ્મંસ્તવ જગદ્વિભો ॥

SP0131311 તતઃ પ્રણમ્ય હૃષ્ટાત્મા બ્રહ્મા લોકપિતામહઃ ।
SP0131312 હસ્તં દેવસ્ય દેવ્યાશ્ચ યોગબન્ધે યુયોજ હ ॥

SP0131321 જ્વલનં ચ સ્વયં કૃત્વા કૃતાઞ્જલિમુપસ્થિતમ્ ।
SP0131322 શ્રુતિગીતૈર્મહામન્ત્રૈર્મૂર્તિમદ્ભિરુપસ્થિતૈઃ ॥

SP0131331 યથોક્તવિધિના હુત્વા સર્પિસ્તદમૃતં ચ હિ ।
SP0131332 ત્રિશ્ચ તં જ્વલનં દેવં કારયિત્વા પ્રદક્ષિણમ્ ॥

SP0131341 મુક્ત્વા હસ્તસમાયોગં સહિતઃ સર્વદેવતૈઃ ।
SP0131342 સુતૈશ્ચ માનસૈઃ સર્વૈઃ પ્રહૃષ્ટેનાન્તરાત્મના ।
SP0131343 વૃત્તે ઉદ્વાહકાલે તુ પ્રણનામ વૃષધ્વજમ્ ॥

SP0131351 યોગેનૈવ તયોર્વ્યાસ તદોમાપરમેશયોઃ ।
SP0131352 ઉદ્વાહઃ સ પરો વૃત્તો યં દેવા ન વિદુઃ ક્વચિત્ ॥

SP0131361 ઇતિ તે સર્વમાખ્યાતં સ્વયંવરમિદં શુભમ્ ।
SP0131362 ઉદ્વાહશ્ચૈવ દેવસ્ય શ્ૃણ્વતઃ પરમાદ્ભુતમ્ ॥

SP0139999 ઇતિ સ્કન્દપુરાણે નામ ત્રયોદશોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૪

SP0140010 સનત્કુમાર ઉવાચ ।
SP0140011 અથ વૃત્તે વિવાહે તુ ભવસ્યામિતતેજસઃ ।
SP0140012 પ્રહર્ષમતુલં ગત્વા દેવાઃ સહપિતામહાઃ ।
SP0140013 તુષ્ટુવુર્વાગ્ભિરિષ્ટાભિઃ પ્રણમન્તો મહેશ્વરમ્ ॥

SP0140021 નમઃ પર્વતલિશ્ણ્ગાય પર્વતેશાય વૈ નમઃ ।
SP0140022 નમઃ પવનવેગાય વિરૂપાયાજિતાય ચ ॥

SP0140031 નમઃ ક્લેશવિનાશાય દાત્રે ચ શુભસમ્પદામ્ ।
SP0140032 નમો નીલશિખણ્ડાય અમ્બિકાપતયે નમઃ ॥

SP0140041 નમઃ પવનરૂપાય શતરૂપાય વૈ નમઃ ।
SP0140042 નમો ભૈરવરૂપાય વિરૂપનયનાય ચ ॥

SP0140051 નમઃ સહસ્રનેત્રાય સહસ્રચરણાય ચ ।
SP0140052 નમો વેદરહસ્યાય વેદાશ્ણ્ગાય નમો નમઃ ॥

SP0140061 વિષ્ટમ્ભનાય શક્રસ્ય બાહોર્વેદાશ્ણ્કુરાય ચ ।
SP0140062 ચરાચરાધિપતયે શમનાય નમો નમઃ ॥

SP0140071 સલિલેશયલિશ્ણ્ગાય યુગાન્તાયતલિશ્ણ્ગિને ।
SP0140072 નમઃ કપાલમાલાય કપાલસ્રગ્મિણે નમઃ ॥

SP0140081 નમઃ કપાલહસ્તાય દંષ્ટ્રિણે ગદિને નમઃ ।
SP0140082 નમસ્ત્રૈલોક્યવાહાય સપ્તલોકરથાય ચ ॥

SP0140091 નમઃ ખટ્વાઙ્ગહસ્તાય પ્રમથાર્તિહરાય ચ ।
SP0140092 નમો યજ્ઞશિરોહર્ત્રે કૃષ્ણકેશાપહારિણે ॥

SP0140101 ભગનેત્રનિપાતાય પૂષ્ણો દન્તહરાય ચ ।
SP0140102 નમઃ પિનાકશૂલાસિખડ્ગમુદ્ગરધારિણે ॥

SP0140111 નમોઽસ્તુ કાલકાલાય તૃતીયનયનાય ચ ।
SP0140112 અન્તકાન્તકૃતે ચૈવ નમઃ પર્વતવાસિને ॥

SP0140121 સુવર્ણરેતસે ચૈવ સર્પકુણ્ડલધારિણે ।
SP0140122 વાડ્વલેર્યોગનાશાય યોગિનાં ગુરવે નમઃ ॥

SP0140131 શશાઙ્કાદિત્યનેત્રાય લલાટનયનાય ચ ।
SP0140132 નમઃ શ્મશાનરતયે શ્મશાનવરદાય ચ ॥

SP0140141 નમો દૈવતનાથાય ત્ર્યમ્બકાય નમો નમઃ ।
SP0140142 અશનીશતહાસાય બ્રહ્મણ્યાયાજિતાય ચ ॥

SP0140151 ગૃહસ્થસાધવે નિત્યં જટિને બ્રહ્મચારિણે ।
SP0140152 નમો મુણ્ડાર્ધમુણ્ડાય પશૂનાં પતયે નમઃ ॥

SP0140161 સલિલે તપ્યમાનાય યોગૈશ્વર્યપ્રદાય ચ ।
SP0140162 નમઃ શાન્તાય દાન્તાય પ્રલયોત્પત્તિકારિણે ॥

SP0140171 નમોઽનુગ્રહકર્ત્રે ચ સ્થિતિકર્ત્રે નમો નમઃ ।
SP0140172 નમો રુદ્રાય વસવે આદિત્યાયાશ્વિને નમઃ ॥

SP0140181 નમઃ પિત્રેઽથ સાધ્યાય વિશ્વેદેવાય વૈ નમઃ ।
SP0140182 નમઃ શર્વાય સર્વાય ઉગ્રાય વરદાય ચ ॥

SP0140191 નમો ભીમાય સેનાન્યે પશૂનાં પતયે નમઃ ।
SP0140192 શુચયે રેરિહાણાય સદ્યોજાતાય વૈ નમઃ ॥

SP0140201 મહાદેવાય ચિત્રાય નમશ્ચિત્રરથાય ચ ।
SP0140202 પ્રધાનાય પ્રમેયાય કાર્યાય કરણાય ચ ॥

SP0140211 પુરુષાય નમસ્તેઽસ્તુ પુરુષેચ્છાકરાય ચ ।
SP0140212 નમઃ પુરુષસંયોગપ્રધાનગુણકારિણે ॥

SP0140221 પ્રવર્તકાય પ્રકૃતેઃ પુરુષસ્ય ચ સર્વશઃ ।
SP0140222 કૃતાકૃતસ્ય સંવેત્રે ફલસંયોગદાય ચ ॥

SP0140231 કાલજ્ઞાય ચ સર્વત્ર નમો નિયમકારિણે ।
SP0140232 નમો વૈષમ્યકર્ત્રે ચ ગુણાનાં વૃત્તિદાય ચ ॥

SP0140241 નમસ્તે દેવદેવેશ નમસ્તે ભૂતભાવન ।
SP0140242 શિવઃ સૌમ્યઃ સુખો દ્રષ્ટુ ભવ સોમો હિ નઃ પ્રભો ॥

SP0140250 સનત્કુમાર ઉવાચ ।
SP0140251 એવં સ ભગવાન્દેવો જગત્પતિરુમાપતિઃ ।
SP0140252 સ્તૂયમાનઃ સુરૈઃ સર્વૈરમરાનિદમબ્રવીત્ ॥

SP0140261 દ્રષ્ટું સુખશ્ચ સૌમ્યશ્ચ દેવાનામસ્મિ ભો સુરાઃ ।
SP0140262 વરં બ્રૂત યથેષ્ટં ચ દાતાસ્મિ વદતાનઘાઃ ॥

SP0140271 તતસ્તે પ્રણતાઃ સર્વે ઊચુઃ સબ્રહ્મકાઃ સુરાઃ ।
SP0140272 તવૈવ ભગવન્હસ્તે વર એષોઽવતિષ્ઠતામ્ ।
SP0140273 યદા કાર્યં તદા નસ્ત્વં દાસ્યસે વરમીપ્સિતમ્ ॥

SP0140281 એવમસ્ત્વિતિ તાનુક્ત્વા વિસૃજ્ય ચ સુરાન્હરઃ ।
SP0140282 લોકાંશ્ચ પ્રમથૈઃ સાર્ધં વિવેશ ભવનં તતઃ ॥

SP0140291 યસ્તુ હરોત્સવમદ્ભુતમેતં ગાયતિ દૈવતવિપ્રસમક્ષમ્ ।
SP0140292 સોઽપ્રતિરૂપગણેશસમાનો દેહવિપર્યયમેત્ય સુખી સ્યાત્ ॥

SP0140300 સનત્કુમાર ઉવાચ ।
SP0140301 પારાશર્ય સ્તવં હીદં શ‍ૃણુયાદ્યઃ પઠેત વા ।
SP0140302 સ સ્વર્ગલોકગો દેવૈઃ પૂજ્યતેઽમરરાડિવ ॥

SP0149999 ઇતિ સ્કન્દપુરાણે ચતુર્દશમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૫

SP0150010 સનત્કુમાર ઉવાચ ।
SP0150011 પ્રવિષ્ટે ભવનં દેવે સૂપવિષ્ટે વરાસને ।

SP0150012 સ બહિર્મન્મથઃ ક્રૂરો દેવં વેદ્ધુમનાભવત્ ॥

SP0150021 તમનાચારસંયુક્તં દુરાત્માનં કુલાધમમ્ ।
SP0150022 લોકાન્સર્વાંસ્તાપયાનં સર્વેષ્વકરુણાત્મકમ્ ॥

SP0150031 ઋષીણાં વિઘ્નકર્તારં નિયમાનાં વ્રતૈઃ સહ ।
SP0150032 ચક્રાહ્વયસ્ય રૂપેણ રત્યા સહ તમાગતમ્ ॥

SP0150041 અથાતતાયિનં વ્યાસ વેદ્ધુકામં સુરેશ્વરમ્ ।
SP0150042 નયનેન તૃતીયેન સાવજ્ઞં તમવૈક્ષત ॥

SP0150051 તતોઽસ્ય નેત્રજો વહ્નિર્જ્વાલામાલાસહસ્રવાન્ ।
SP0150052 સંવૃત્ય રતિભર્તારમદહત્સપરિચ્છદમ્ ॥

SP0150061 સ દહ્યમાનઃ કરુણમાર્તોઽક્રોશત વિસ્વરમ્ ।
SP0150062 પ્રસાદયંશ્ચ તં દેવં પપાત સ મહીતલે ॥

SP0150071 આશુ સોઽગ્નિપરીતાઙ્ગો મન્મથો લોકતાપનઃ ।
SP0150072 પપાત ભસ્મસાચ્ચૈવ ક્ષણેન સમપદ્યત ॥

SP0150081 પત્ની તુ કરુણં તસ્ય વિલલાપ સુદુઃખિતા ।
SP0150082 દેવં દેવીં ચ દુઃખાર્તા અયાચત્કરુણાયતી ॥

SP0150091 તસ્યાશ્ચ કરુણાં શ્રુત્વા દેવૌ તૌ કરુણાત્મકૌ ।
SP0150092 ઊચતુસ્તાં સમાલોક્ય સમાશ્વાસ્ય ચ દુઃખિતામ્ ॥

SP0150101 દગ્ધ એષ ધ્રુવં ભદ્રે નાસ્યોત્પત્તિરિહેષ્યતે ।
SP0150102 અશરીરોઽપિ તે કાલે કાર્યં સર્વં કરિષ્યતિ ॥

SP0150111 યદા તુ વિષ્ણુર્ભવિતા વસુદેવસુતઃ શુભે ।
SP0150112 તદા તસ્ય સુતોઽયં સ્યાત્પતિસ્તે સ ભવિષ્યતિ ॥

SP0150120 સનત્કુમાર ઉવાચ ।
SP0150121 તતઃ સા તં વરં લબ્ધ્વા કામપત્ની શુભાનના ।
SP0150122 જગામેષ્ટં તદા દેશં પ્રીતિયુક્તા ગતક્લમા ॥

SP0150130 સનત્કુમાર ઉવાચ ।
SP0150131 એવં દગ્ધ્વા સ કામં તુ શંકરો મૂઢચેતસમ્ ।
SP0150132 પ્રોવાચ હિમવત્પુત્રીં ભક્ત્યા મુનિવરસ્ય હ ॥

SP0150141 વસિષ્ઠો નામ વિપ્રેન્દ્રો માં કૃત્વા હૃદિ તપ્યતે ।

SP0150142 તસ્યાહં વરદાનાય પ્રયાસ્યામિ મહાવ્રતે ॥

SP0150151 એવમુક્ત્વા સ દેવીં તુ ભક્તિપ્રીત્યા તદા વિભુઃ ।
SP0150152 જગામ તપ્યતોઽભ્યાશં વસિષ્ઠસ્ય મુનેર્વિભુઃ ॥

SP0150161 તતો મુનિવરશ્રેષ્ઠં વરિષ્ઠં તપતાં વરમ્ ।
SP0150162 વસિષ્ઠમૃષિશાર્દૂલં તપ્યમાનં પરં તપઃ ॥

SP0150171 પૂર્ણે વર્ષસહસ્રે તુ જ્વલમાનમિવાનલમ્ ।
SP0150172 ઉવાચ ભગવાન્ગત્વા બ્રૂહિ કિં તે દદાનિ તે ।
SP0150173 દદામિ દિવ્યં ચક્ષુસ્તે પશ્ય માં સગણં દ્વિજ ॥

SP0150181 દૃષ્ટ્વા સ તુ તમીશાનં પ્રણમ્ય શિરસા પ્રભુમ્ ।
SP0150182 શિરસ્યઞ્જલિમાધાય તુષ્ટાવ હૃષિતાનનઃ ॥

SP0150190 વસિષ્ઠ ઉવાચ ।
SP0150191 નમઃ કનકલિઙ્ગાય વેદલિઙ્ગાય વૈ નમઃ ।
SP0150192 નમઃ સહસ્રલિઙ્ગાય વહ્નિલિઙ્ગાય વૈ નમઃ ॥

SP0150201 નમઃ પુરાણલિઙ્ગાય શ્રુતિલિઙ્ગાય વૈ નમઃ ।
SP0150202 નમઃ પવનલિઙ્ગાય બ્રહ્મલિઙ્ગાય વૈ નમઃ ॥

SP0150211 નમસ્ત્રૈલોક્યલિઙ્ગાય દાહલિઙ્ગાય વૈ નમઃ ।
SP0150212 નમઃ પર્વતલિઙ્ગાય સ્થિતિલિઙ્ગાય વૈ નમઃ ॥

SP0150221 નમો રહસ્યલિઙ્ગાય સપ્તદ્વીપોર્ધ્વલિઙ્ગિને ।
SP0150222 નમઃ સર્વાર્થલિઙ્ગાય સર્વલોકાઙ્ગલિઙ્ગિને ॥

SP0150231 નમોઽસ્ત્વવ્યક્તલિઙ્ગાય બુદ્ધિલિઙ્ગાય વૈ નમઃ ।
SP0150232 નમોઽહંકારલિઙ્ગાય ભૂતલિઙ્ગાય વૈ નમઃ ॥

SP0150241 નમ ઇન્દ્રિયલિઙ્ગાય નમસ્તન્માત્રલિઙ્ગિને ।
SP0150242 નમઃ પુરુષલિઙ્ગાય ભાવલિઙ્ગાય વૈ નમઃ ॥

SP0150251 નમઃ સર્વાર્થલિઙ્ગાય તમોલિઙ્ગાય વૈ નમઃ ।
SP0150252 નમો રજોર્ધ્વલિઙ્ગાય સત્ત્વલિઙ્ગાય વૈ નમઃ ॥

SP0150261 નમો ગગનલિઙ્ગાય તેજોલિઙ્ગાય વૈ નમઃ ।
SP0150262 નમો વાયૂર્ધ્વલિઙ્ગાય શબ્દલિઙ્ગાય વૈ નમઃ ॥

SP0150271 નમો ઋક્સ્તુતલિઙ્ગાય યજુર્લિઙ્ગાય વૈ નમઃ ।

SP0150272 નમસ્તેઽથર્વલિશ્ણ્ગાય સામલિશ્ણ્ગાય વૈ નમઃ ॥

SP0150281 નમો યજ્ઞાશ્ણ્ગલિશ્ણ્ગાય યજ્ઞલિશ્ણ્ગાય વૈ નમઃ ।
SP0150282 નમસ્તેઽનન્તલિશ્ણ્ગાય દેવાનુગતલિશ્ણ્ગને ॥

SP0150291 દિશ નઃ પરમં યોગમપત્યં મત્સમં તથા ।
SP0150292 બ્રહ્મ ચૈવાક્ષયં દેવ શમં ચૈવ પરં વિભો ।
SP0150293 અક્ષયત્વં ચ વંશસ્ય ધર્મે ચ મતિમક્ષયામ્ ॥

SP0150300 સનત્કુમાર ઉવાચ ।
SP0150301 એવં સ ભગવાન્વ્યાસ વસિષ્ઠેનામિતાત્મના ।
SP0150302 સ્તૂયમાનસ્તુતોષાથ તુષ્ટશ્ચેદં તમબ્રવીત્ ॥

SP0150310 ભગવાનુવાચ ।
SP0150311 તુષ્ટસ્તેઽહં દદાન્યેતત્તવ સર્વં મનોગતમ્ ।
SP0150312 યોગં ચ પરમં સૂક્ષ્મમક્ષયં સર્વકામિકમ્ ॥

SP0150321 પૌત્રં ચ ત્વત્સમં દિવ્યં તપોયોગબલાન્વિતમ્ ।
SP0150322 દદાનિ તે ઋષિશ્રેષ્ઠ પ્રતિભાસ્યન્તિ ચૈવ તે ॥

SP0150331 દમઃ શમસ્તથા કીર્તિસ્તુષ્ટિરક્રોધ એવ ચ ।
SP0150332 નિત્યં તવ ભવિષ્યન્તિ અમરત્વં ચ સર્વશઃ ॥

SP0150341 અવધ્યત્વમસહ્યત્વમક્ષયત્વં ચ સર્વદા ।
SP0150342 વંશસ્ય ચાક્ષતિર્વિપ્ર ધર્મે ચ રતિરવ્યયા ।
SP0150343 બ્રૂહિ ચાન્યાનપિ વરાન્દદામિ ઋષિસત્તમ ॥

SP0150350 વસિષ્ઠ ઉવાચ ।
SP0150351 ભગવન્વિદિતં સર્વં ભવિષ્યં દેવસત્તમ ।
SP0150352 ન સ્યાદ્ધિ તત્તથા દેવ યથા વા મન્યસે પ્રભો ॥

SP0150360 દેવ ઉવાચ ।
SP0150361 ભવિષ્યં નાન્યથા કુર્યાદિતિ મે નિશ્ચિતા મતિઃ ।
SP0150362 અહં કર્તા ભવિષ્યસ્ય કથં કુર્યાત્તદન્યથા ॥

SP0150371 તથા તન્નાત્ર સંદેહો વિહિતં યદ્યથા મયા ।
SP0150372 તસ્માત્તેઽનુગ્રહં કર્તા ભૂયઃ પુત્રસ્તવાવ્યયઃ ॥

SP0150380 સનત્કુમાર ઉવાચ ।

SP0150381 એવમુક્ત્વા તતો દેવઃ કપર્દી નીલલોહિતઃ ।
SP0150382 પશ્યતસ્તસ્ય વિપ્રર્ષેઃ ક્ષણાદન્તરધીયત ॥

SP0159999 ઇતિ સ્કન્દપુરાણે પઞ્ચદશમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૬

SP0160010 વ્યાસ ઉવાચ ।
SP0160011 વરાન્સ લબ્ધ્વા ભગવાન્વસિષ્ઠોઽસ્મત્પિતામહઃ ।
SP0160012 કં પુત્રં જનયામાસ આત્મનઃ સદૃશદ્યુતિમ્ ॥

SP0160020 સનત્કુમાર ઉવાચ ।
SP0160021 તેનાસૌ વરદાનેન દેવદેવસ્ય શૂલિનઃ ।
SP0160022 અરુન્ધત્યામજનયત્તપોયોગબલાન્વિતમ્ ।
SP0160023 બ્રહ્મિષ્ઠં શક્તિનામાનં પુત્રં પુત્રશતાગ્રજમ્ ॥

SP0160031 તસ્ય બાલ્યાત્પ્રભૃત્યેવ વાસિષ્ઠસ્ય મહાત્મનઃ ।
SP0160032 પરેણ ચેતસા ભક્તિરભવદ્ગોવૃષધ્વજે ॥

SP0160041 સ કદાચિદપત્યાર્થમારાધયદુમાપતિમ્ ।
SP0160042 તસ્ય તુષ્ટો મહાદેવો વરદોઽસ્મીત્યભાષત ॥

SP0160051 અથ દૃષ્ટ્વા તમીશાનમિદમાહાનતાનનઃ ।
SP0160052 કેન સ્તોષ્યામિ તે દેવ યસ્ત્વં સર્વજગત્પતિઃ ।
SP0160053 સર્વાન્ધારયસે લોકાનાત્મના સમયાદ્વિભો ॥

SP0160061 ત્વમેવ ભોક્તા ભોજ્યં ચ કર્તા કાર્યં તથા ક્રિયા ।
SP0160062 ઉત્પાદકસ્તથોત્પાદ્ય ઉત્પત્તિશ્ચૈવ સર્વશઃ ॥

SP0160071 આત્માનં પુત્રનામાનં મમ તુલ્યં ગુણૈર્વિભો ।
SP0160072 ઇચ્છામિ દત્તં દેવેશ એષ મે દીયતાં વરઃ ॥

SP0160080 સનત્કુમાર ઉવાચ ।
SP0160081 તમેવંવાદિનં દેવઃ પ્રહસ્ય વદતાં વરઃ ।
SP0160082 ઉવાચ વચસા વ્યાસ દિશઃ સર્વા વિનાદયન્ ॥

SP0160091 ત્વયાહં યાચિતઃ શક્તે સ ચ તે સમ્ભવિષ્યતિ ।

SP0160092 ત્વત્સમઃ સર્વવેદજ્ઞસ્ત્વદીયો મુનિપુંગવ ॥

SP0160101 બીજાત્મા ચ તથોદ્ભૂતઃ સ્વયમેવાશણ્કુરાત્મના ।
SP0160102 બીજાત્મના ન ભવતિ પરિણામાન્તરં ગતઃ ॥

SP0160111 એવં સ આત્મનાત્મા વઃ સમ્ભૂતોઽપત્યસંજ્ઞિતઃ ।
SP0160112 સ્વેનાત્મના ન ભવિતા પરિણામાન્તરં ગતઃ ॥

SP0160120 સનત્કુમાર ઉવાચ ।
SP0160121 એવમુક્ત્વા તુ તં દેવઃ પ્રહસ્ય ચ નિરીક્ષ્ય ચ ।
SP0160122 જગામ સહસા યોગી અદૃશ્યત્વમતિદ્યુતિઃ ॥

SP0160131 તસ્મિન્ગતે મહાદેવે શક્તિસ્તવ પિતામહઃ ।
SP0160132 વચસ્તત્પરિનિશ્ચિન્ત્ય એવમેવેત્યમન્યત ॥

SP0160141 અથ કાલેઽતિમહતિ સમતીતે શુભવ્રતે ।
SP0160142 તપસા ભાવિતશ્ચાપિ મહતાગ્નિસમપ્રભઃ ।
SP0160143 અદૃશ્યન્ત્યાં મહાપ્રજ્ઞ આદધે ગર્ભમુત્તમમ્ ॥

SP0160151 તસ્યામાપન્નસત્ત્વાયાં રાજા કલ્માષપાદૃષિમ્ ।
SP0160152 ભક્ષયામાસ સંરબ્ધો રક્ષસા હૃતચેતનઃ ॥

SP0169999 ઇતિ સ્કન્દપુરાણે ષોડશોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૭

SP0170010 વ્યાસ ઉવાચ ।
SP0170011 કસ્માત્સ રાજા તમૃષિં ચખાદ તપસાન્વિતમ્ ।
SP0170012 રક્ષસા સ કિમર્થં ચ હૃતચેતાભવન્નૃપઃ ॥

SP0170020 સનત્કુમાર ઉવાચ ।
SP0170021 વસિષ્ઠયાજ્યો રાજાસીન્નામ્ના મિત્રસહઃ પ્રભુઃ ।
SP0170022 સુદાસપુત્રો બલવાનિન્દ્રચન્દ્રસમદ્યુતિઃ ॥

SP0170031 તમાગમ્યોચિવાઞ્છક્તિશ્ચરિષ્યે દીક્ષિતો વ્રતમ્ ।
SP0170032 તત્ર મે નિશિ રાજેન્દ્ર સદૈવ પિશિતાશનમ્ ॥

SP0170041 ઇહાગતસ્ય યચ્છસ્વ શુચિ સર્વગુણાન્વિતમ્ ।
SP0170042 અપ્રતીકારસંયુક્તમેકદૈકાન્ત એવ ચ ॥

SP0170051 એવમસ્ત્વિતિ તેનોક્તો જગામ સ મહામનાઃ ।
SP0170052 અથાસ્યાન્તર્હિતં રક્ષો નૃપતેરભવત્તદા ।
SP0170053 નાજ્ઞાપયત્તદા સૂદં તસ્યાર્થે મુનિસત્તમ ॥

SP0170061 ગતેઽથ દિવસે તાત સંસ્મૃત્ય પ્રયતાત્મવાન્ ।
SP0170062 સૂદમાહૂય ચોવાચ આર્તવત્સ નરાધિપઃ ॥

SP0170070 સૌદાસ ઉવાચ ।
SP0170071 મયામૃતવસો પ્રાતર્ગુરુપુત્રસ્ય ધીમતઃ ।
SP0170072 પિશિતં સમ્પ્રતિજ્ઞાતં ભોજનં નિશિ સંસ્કૃતમ્ ।
SP0170073 તત્કુરુષ્વ તથા ક્ષિપ્રં કાલો નો નાત્યગાદ્યથા ॥

SP0170081 સ એવમુક્તઃ પ્રોવાચ સૂદોઽમૃતવસુસ્તદા ।
SP0170082 રાજંસ્ત્વયા નો નાખ્યાતં પ્રાગેવ નરપુંગવ ।
SP0170083 સામ્પ્રતં નાસ્તિ પિશિતં સ્તોકમપ્યભિકાશ્ણિક્ષતમ્ ॥

SP0170091 પિશિતસ્યૈવ ચાલ્પત્વાદ્બહૂનાં ચૈવ તદ્ભુજામ્ ।
SP0170092 અમિતસ્ય પ્રદાનાચ્ચ ન કિંચિદવશિષ્યતે ॥

SP0170100 રાજોવાચ ।
SP0170101 જાને સર્વોપયોગં ચ જાને ચાદુષ્ટતાં તવ ।
SP0170102 જાને સ્તોકં ચ પિશિતં કાર્યં ચેદં તથાવિધમ્ ।
SP0170103 મૃગ્યતાં પિશિતં ક્ષિપ્રં લબ્ધવ્યં યત્ર મન્યસે ॥

SP0170110 સનત્કુમાર ઉવાચ ।
SP0170111 એવમુક્તોઽમૃતવસુઃ પ્રયત્નં મહદાસ્થિતઃ ।
SP0170112 પિશિતં મૃગયન્સમ્યગ્યશણનાપ્યવિન્દત કર્હિચિત્ ॥

SP0170121 યદા ન લબ્ધવાન્માંસં તદોવાચ નરાધિપમ્ ।
SP0170122 ગત્વા નિશિ મહારાજમિદં વચનમર્થવત્ ॥

SP0170131 રાજન્ન પિશિતં ત્વસ્તિ પુરેઽસ્મિઞ્છુચિ કર્હિચિત્ ।
SP0170132 મૃગયન્પરિખિન્નોઽસ્મિ શાધિ કિં કરવાણિ તે ॥

SP0170140 સનત્કુમાર ઉવાચ ।
SP0170141 સ એવમુક્તઃ સૂદેન તસ્મિન્કાલે નરાધિપઃ ।

SP0170142 નોવાચ કિંચિત્તં સૂદં તૂષ્ણીમેવ બભૂવ હ ॥

SP0170151 તદન્તરમભિપ્રેક્ષ્ય વિશ્વામિત્રસમીરિતઃ ।
SP0170152 રાક્ષસો રુધિરો નામ સંવિવેશ નરાધિપમ્ ॥

SP0170161 રક્ષસા સ તદાવિષ્ટો રુધિરેણ દુરાત્મના ।
SP0170162 ઉવાચ સૂદં શનકૈઃ કર્ણમૂલે મહાદ્યુતિઃ ॥

SP0170171 ગચ્છ યત્કિંચિદાનીય માંસં માનુષમન્તતઃ ।
SP0170172 ગાર્દભં વાપ્યથૌષ્ટ્રં વા સર્વં સંસ્કર્તુમર્હસિ ॥

SP0170181 કિમસૌ જ્ઞાસ્યતે રાત્રૌ ત્વયા ભૂયશ્ચ સંસ્કૃતમ્ ।
SP0170182 રસવદ્ગન્ધવચ્ચૈવ ક્ષિપ્રમેવ સમાચર ॥

SP0170190 સનત્કુમાર ઉવાચ ।
SP0170191 સ એવમુક્તસ્તેનાથ માનુષં માંસમાદદે ।
SP0170192 રાજાપકારિણો વ્યાસ મૃતોત્સૃષ્ટસ્ય કસ્યચિત્ ॥

SP0170201 અથાર્ધરાત્રસમયે ભાસ્કરાકારવર્ચસમ્ ।
SP0170202 શતાનલસમપ્રખ્યમપશ્યન્મુનિસત્તમમ્ ॥

SP0170211 સ તમર્ઘ્યેણ પાદ્યેન આસનાગ્ર્યવરેણ ચ ।
SP0170212 સમર્ચયિત્વા વિધિવદન્નમસ્યોપપાદયત્ ॥

SP0170221 સ તદન્નં સમાનીતં સમાલભ્ય મહાતપાઃ ।
SP0170222 ચુકોપ કુપિતશ્ચાહ પાર્થિવં પ્રદહન્નિવ ॥

SP0170230 શક્તિરુવાચ ।
SP0170231 પાર્થિવાધમ વિપ્રાણાં ભોજનં રાક્ષસોચિતમ્ ।
SP0170232 ન દીયતે વિધિજ્ઞેન ત્વં તુ મામવમન્યસે ॥

SP0170241 યસ્માત્ત્વં રાક્ષસમિદં મહ્યં દિત્સસિ ભોજનમ્ ।
SP0170242 તસ્માત્ત્વં કર્મણા તેન પુરુષાદો ભવિષ્યસિ ॥

SP0170250 સનત્કુમાર ઉવાચ ।
SP0170251 એવમુક્તસ્તુ તેજસ્વી રાજા સંચિન્ત્ય તત્તદા ।
SP0170252 ઉવાચ ક્રોધરક્તાક્ષો રાક્ષસાવિષ્ટચેતનઃ ॥

SP0170261 પુરુષાદો ભવેત્યેવં મામવોચદ્ભવાન્યતઃ ।
SP0170262 તતસ્ત્વાં ભક્ષયિષ્યામિ ભ્રાતૃભિઃ સહિતં દ્વિજ ॥

SP0170271 ભક્ષયિત્વા વિશુદ્ધ્યર્થં મુક્તશાપસ્તતઃ પરમ્ ।
SP0170272 ચરિષ્યામિ તપઃ શુદ્ધં સંયમ્યેન્દ્રિયસંહતિમ્ ।
SP0170273 પિત્રા તવાભ્યનુજ્ઞાતઃ સ્વર્ગં વત્સ્યે યથેપ્સિતમ્ ॥

SP0179999 ઇતિ સ્કન્દપુરાણે સપ્તદશમોऽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૮

SP0180010 સનત્કુમાર ઉવાચ ।
SP0180011 તતઃ સ રાજા સ્વં રાજ્યમુત્સૃજ્ય સહ ભાર્યયા ।
SP0180012 વનં વિવેશ તત્રાભૂત્પુરુષાદો મહાબલઃ ॥

SP0180021 સોऽભક્ષયત તત્રાગ્રે શક્તિમેવ મહામુનિમ્ ।
SP0180022 તતો ભ્રાતૃશતં તસ્ય વસિષ્ઠસ્યૈવ પશ્યતઃ ॥

SP0180031 તતઃ પુત્રવધં ઘોરં દૃષ્ટ્વા બ્રહ્મસુતઃ પ્રભુઃ ।
SP0180032 નોત્સસર્જ તદા ક્રોધં વસિષ્ઠઃ કૌશિકં પ્રતિ ।
SP0180033 પુત્રશોકેન મહતા ભૃશમેવાન્વકીર્યત ॥

SP0180041 સ બદ્ધ્વા મહતીં કણ્ઠે શિલાં બ્રહ્મસુતઃ પ્રભુઃ ।
SP0180042 નદ્યામાત્માનમુત્સૃજ્ય શતધા સાદ્રવદ્ભયાત્ ।
SP0180043 શતદ્રૂરિતિ તાં પ્રાહુર્મુનયઃ સંશિતવ્રતાઃ ॥

SP0180051 પુનઃ પાશૈર્દૃઢૈર્બદ્ધ્વા અન્યસ્યામસૃજદ્વશી ।
SP0180052 તસ્યાં વિપાશઃ સંવૃત્તો વિપાશા સાભવત્તતઃ ॥

SP0180061 તતોऽટવીં સમાસાદ્ય નિરાહારો જિતેન્દ્રિયઃ ।
SP0180062 વાયુભક્ષસ્તદા તસ્થૌ સ્વં દેહં પરિતાપયન્ ॥

SP0180071 અથ શુશ્રાવ વેદાનાં ધ્વનિમેકસ્ય સુસ્વરમ્ ।
SP0180072 અધીયાનસ્ય તત્રાશુ ધ્યાનમેવાન્વપદ્યત ॥

SP0180081 અથૈનં ચારુસર્વાઙ્ગી પીનોન્નતપયોધરા ।
SP0180082 ઉપતસ્થેऽગ્રતઃ પત્ની શક્તેર્દીનાનનેક્ષણા ॥

SP0180091 તામુવાચ કુતસ્ત્વં વૈ કસ્યૈષ શ્રૂયતે ધ્વનિઃ ।
SP0180092 સોવાચ દીનયા વાચા રુદતી શ્વશુરં તદા ॥

SP0180100 અદૃશ્યન્ત્યુવાચ ।
SP0180101 યદૈવ સુતદુઃખેન નિર્ગતોऽસ્યાશ્રમાદ્ગુરો ।
SP0180102 તદાપ્રભૃત્યેવાદૃશ્યા ભગવન્તમનુવ્રતા ॥

SP0180111 અધીયાનસ્ય ચૈવાયં ધ્વનિઃ પુત્રસ્ય તે વિભો ।
SP0180112 ઉદરસ્થસ્ય તે સૂનોર્મા દુઃખે ત્વં મનઃ કૃથાઃ ॥

SP0180120 સનત્કુમાર ઉવાચ ।
SP0180121 ઇદાનીમસ્તિ મે વત્સે જીવિતાશેતિ સોऽબ્રવીત્ ।
SP0180122 ક્ષાન્તિં ધૃતિં ચ સંસ્થિત્ય પ્રયયાવાશ્રમં મુનિઃ ॥

SP0180131 તદાશ્રમપદં ગચ્છન્પથિ રાજાનમૈક્ષત ।
SP0180132 વસારુધિરદિગ્ધાશઙ્ગં સૌદાસં રક્તલોચનમ્ ॥

SP0180141 અભિદ્રવન્તં વેગેન મન્ત્રૈરસ્તમ્ભયન્મુનિઃ ।
SP0180142 તતોऽસ્ય નિર્ગતઃ કાયાદ્રક્ષઃ પરમદારુણઃ ॥

SP0180151 ઉવાચ ચૈનં દુષ્ટાત્મન્દહેયં ત્વાં સબાન્ધવમ્ ।
SP0180152 દગ્ધેન ચ ત્વયા કિં મે ગચ્છ મુક્તોऽસિ દુર્મતે ॥

SP0180161 તતઃ સ મુક્તો દીનાત્મા રાક્ષસઃ ક્રૂરકર્મકૃત્ ।
SP0180162 પ્રણમ્ય શિરસા ભીતો જગામ કુશિકાન્તિકમ્ ॥

SP0180171 ગતે નિશાચરે રાજા પ્રણમ્ય શિરસા મુનિમ્ ।
SP0180172 પ્રસાદયામાસ તદા સ ચોવાચેદમર્થવત્ ॥

SP0180181 ન દોષસ્તવ રાજેન્દ્ર રક્ષસાધિષ્ઠિતસ્ય વૈ ।
SP0180182 કૃતાન્તેન હતાઃ પુત્રા નિમિત્તં તત્ર રાક્ષસઃ ॥

SP0180191 પ્રશાધિ રાજ્યં રાજેન્દ્ર પિતૃપૈતામહં વિભો ।
SP0180192 બ્રૂહિ કિં વા પ્રિયં તેऽદ્ય કરોમિ નરપુંગવ ॥

SP0180200 રાજોવાચ ।
SP0180201 ઇચ્છામિ ભગવન્પુત્રં ત્વયોત્પાદિતમચ્યુત ।
SP0180202 દેવ્યામસ્યાં મહાસત્ત્વં તત્કુરુષ્વ મમ પ્રિયમ્ ॥

SP0180210 સનત્કુમાર ઉવાચ ।
SP0180211 એવમસ્ત્વિત્યથોક્ત્વાસૌ તસ્યાં પત્ન્યાં મહાવ્રતઃ ।

SP0180212 પુત્રં ચ શોણકં નામ જનયામાસ નિર્વૃતઃ ॥

SP0180221 તં શોણકં તતો રાજ્યે સ્વં પુત્રમભિષિચ્ય સઃ ।
SP0180222 જગામ વનમેવાશુ સભાર્યસ્તપસિ સ્થિતઃ ॥

SP0180231 વસિષ્ઠસ્યાપિ કાલેન શક્તેઃ પુત્રઃ પ્રતાપવાન્ ।
SP0180232 અદૃશ્યન્ત્યાં સમભવત્પુત્રો નામ્ના પરાશરઃ ॥

SP0180241 વસિષ્ઠં તુ તદા ધીમાંસ્તાતમેવાભ્યમન્યત ।
SP0180242 તાત તાતેતિ ચ મુહુર્વ્યાજહાર પિતુર્ગુરુમ્ ॥

SP0180251 તતઃ કદાચિદ્વિજ્ઞાય ભક્ષિતં રક્ષસા શુચિમ્ ।
SP0180252 પિતરં તપસા મન્ત્રૈરીજે રક્ષઃક્રતૌ તદા ॥

SP0180261 તત્ર કોટીઃ સ પઞ્ચાશદ્રક્ષસાં ક્રૂરકર્મણામ્ ।
SP0180262 જુહાવાગ્નૌ મહાતેજાસ્તતો બ્રહ્માભ્યગાદ્દ્રુતમ્ ॥

SP0180271 સુતમભ્યેત્ય સમ્પૂજ્ય વસિષ્ઠસહિતઃ પ્રભુઃ ।
SP0180272 ઋષિભિર્દૈવતૈશ્ચૈવ ઇદમાહ પરાશરમ્ ॥

SP0180280 બ્રહ્મોવાચ ।
SP0180281 દેવતાસ્તે પતન્તિ સ્મ યજ્ઞૈર્મન્ત્રપુરસ્કૃતૈઃ ।
SP0180282 અષ્ટમં સ્થાનમેતદ્ધિ દેવાનામાદ્યમીદૃશમ્ ॥

SP0180290 પરાશર ઉવાચ ।
SP0180291 સહ દેવૈરહં સર્વા/લ્લોકાન્ધક્ષ્યામિ પાવકૈઃ ।
SP0180292 દગ્ધ્વાન્યાન્પ્રથયિષ્યામિ તત્ર લોકાન્ન સંશયઃ ॥

SP0180300 સનત્કુમાર ઉવાચ ।
SP0180301 તસ્યૈવં ગર્વિતં વાક્યં શ્રુત્વા દેવઃ પિતામહઃ ।
SP0180302 ઉવાચ શ્લક્ષ્ણયા વાચા સાન્ત્વયંસ્તમિદં વચઃ ॥

SP0180310 પિતામહ ઉવાચ ।
SP0180311 કૃતમેતન્ન સંદેહો યથા બ્રૂષે મહામતે ।
SP0180312 ક્ષન્તવ્યં સર્વમેતત્તુ અસ્મત્પ્રિયચિકીર્ષયા ॥

SP0180321 યૈસ્તે પિતા મહાભાગ ભક્ષિતઃ સહ સોદરૈઃ ।
SP0180322 ત એવાગ્નૌ ચ હોતવ્યા વિશ્વામિત્રસ્ય પશ્યતઃ ।
SP0180323 અન્યેષાં સ્વસ્તિ સર્વત્ર દેવાનાં સહ રાક્ષસૈઃ ॥

SP0180331 તસ્ય સંકલ્પસંતમો મન્યુમૂલમુદાહરત્ ।
SP0180332 વસિષ્ઠસ્ય મહાભાગ ત્વં નિવારય પુત્રક ॥

SP0180341 દેવાઃ પ્રાઞ્જલયઃ સર્વે પ્રણેમુસ્તે મહામુનિમ્ ।
SP0180342 ઋષયશ્ચૈવ તે સર્વે વાગ્ભિસ્તુષ્ટુવિરે તદા ॥

SP0180351 તતસ્તેષાં મહાતેજા વચાંસિ પ્રત્યપૂજયત્ ।
SP0180352 વિશ્વામિત્રસ્ય મિષત ઇદં પ્રોવાચ સુસ્વરમ્ ॥

SP0180361 ય એષાં બ્રાહ્મણો વાપિ ક્ષત્રિયો વા દુરાત્મવાન્ ।
SP0180362 રક્ષસાં પક્ષમાસ્થાય પ્રતીકારં કરિષ્યતિ ॥

SP0180371 તમપ્યત્રાપિ સંક્રુદ્ધસ્તપોયોગબલાન્વિતઃ ।
SP0180372 વિહત્ય તપસો યોગાદ્ધોષ્યે દીપ્તે વિભાવસૌ ॥

SP0180380 સનત્કુમાર ઉવાચ ।
SP0180381 તતો દેવાઃ સગન્ધર્વાઃ પિતામહપુરઃસરાઃ ।
SP0180382 પ્રભાવં તસ્ય તં જ્ઞાત્વા પરાશરમપૂજયન્ ॥

SP0180391 હુતેષુ ચ તતસ્તેષુ રાક્ષસેષુ દુરાત્મસુ ।
SP0180392 સંજહાર તતઃ સત્રં બ્રહ્મણોઽનુમતે તદા ॥

SP0180400 સનત્કુમાર ઉવાચ ।
SP0180401 ય ઇમં શ્રાદ્ધકાલે વા દૈવે કર્મણિ વા દ્વિજાન્ ।
SP0180402 શ્રાવયીત શુચિર્ભૂત્વા ન તં હિંસન્તિ રાક્ષસાઃ ॥

SP0180411 પરાશરસ્યેદમદીનસમ્ભવં વિશુદ્ધવાક્કર્મવિધાનસમ્ભવમ્ ।
SP0180412 નિશામ્ય વિપ્રઃ કુલસિદ્ધિસમ્ભવં ન રાક્ષસં ગચ્છતિ
યોનિસમ્ભવમ્ ॥

SP0189999 ઇતિ સ્કન્દપુરાણેઽષ્ટાદશમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૧૯

SP0190010 સનત્કુમાર ઉવાચ ।
SP0190011 એવં તવ પિતા વ્યાસ રક્ષઃસત્રં સમાહરત્ ।
SP0190012 સમાપયિત્વા ચ પુનસ્તપસ્તેપે ચ ભાસ્વરમ્ ॥

SP0190021 તમાગત્ય વસિષ્ઠસ્તુ તપસા ભાસ્કરદ્યુતિમ્ ।
SP0190022 ઉવાચ પ્રીતિસમ્પન્નમિદમર્થવદવ્યયઃ ॥

SP0190030 વસિષ્ઠ ઉવાચ ।
SP0190031 પિતરઃ પુત્રકામા વૈ તપઃ કૃત્વાતિદુશ્ચરમ્ ।
SP0190032 પુત્રમુત્પાદયન્તિ સ્મ તપોજ્ઞાનસમન્વિતમ્ ॥

SP0190041 અયં નઃ સંતતિં ચૈવ જ્ઞાનવાંસ્તપસાન્વિતઃ ।
SP0190042 કરિષ્યતિ ગતિં ચૈવ ઇતિ વેદવિદો વિદુઃ ॥

SP0190051 સ ત્વં તપોન્વિતશ્ચૈવ જ્ઞાનવાન્યશસાન્વિતઃ ।
SP0190052 પુત્રઃ પુત્રવતાં શ્રેષ્ઠો વિહીનઃ પ્રજયા વિભો ॥

SP0190061 તસ્માત્પિત્।ૠ્ણામાનૃણ્યં ગચ્છ વ્રતવતાં વર ।
SP0190062 સુતમુત્પાદય ક્ષિપ્રમધિકં સમમેવ વા ॥

SP0190070 સનત્કુમાર ઉવાચ ।
SP0190071 સ એવમુક્તસ્તેજસ્વી વસિષ્ઠેનામિતાત્મના ।
SP0190072 મૈનાકં પર્વતં પ્રાપ્ય તપસ્તેપે સુદુશ્ચરમ્ ॥

SP0190081 તસ્ય કાલેન મહતા તપસા ભાવિતસ્ય તુ ।
SP0190082 ઉમાપતિર્વરં પ્રાદાત્સ ચ વવ્રે સુતં શુભમ્ ॥

SP0190091 સ લબ્ધવર આગમ્ય યયાચે પુત્રકારણાત્ ।
SP0190092 ક્ષેત્રં સુપરિશુદ્ધં ચ સ્વપુત્રો યત્ર સમ્ભવેત્ ॥

SP0190101 સમ્ભ્રમન્દાશરાજસ્ય દુહિતૃત્વમુપાગતામ્ ।
SP0190102 પિતૃકન્યાં તતઃ કાલીમપશ્યદ્દિવ્યરૂપિણીમ્ ॥

SP0190111 મત્સીગર્ભસમુત્પન્નાં વસોર્બીજાશનાત્પુરા ।
SP0190112 અદ્રિકામપ્સરઃશ્રેષ્ઠાં બ્રહ્મતેજોમયીં શુભામ્ ॥

SP0190121 તસ્યાં સ જનયામાસ વરં દત્ત્વા મહાતપાઃ ।
SP0190122 ભવન્તં તપસાં યોનિં શ્રૌતસ્માર્તપ્રવર્તકમ્ ॥

SP0190131 તવ પુત્રોઽભવચ્ચાપિ શુકો યોગવિદાં વરઃ ।
SP0190132 તસ્ય પુત્રાશ્ચ ચત્વારઃ કન્યા ચૈકા સુમધ્યમા ॥

SP0190140 વ્યાસ ઉવાચ ।

SP0190141 કથં વૈરં સમભવદ્વિશ્વામિત્રવસિષ્ઠયોઃ ।
SP0190142 કથં ચાપગતં ભૂય એતદિચ્છામિ વેદિતુમ્ ॥

SP0190150 સનત્કુમાર ઉવાચ ।
SP0190151 પરાશરે તુ ગર્ભસ્થે વિપ્રત્વં ગાધિજે ગતે ।
SP0190152 સરસ્વત્યાં કુરુક્ષેત્રે દ્વયોરપ્યાશ્રમૌ તયોઃ ॥

SP0190161 તત્ર વૈરમનુસ્મૃત્ય વિશ્વામિત્રેણ ધીમતા ।
SP0190162 મિષતસ્તુ વસિષ્ઠસ્ય હતં પુત્રશતં રુષા ॥

SP0190171 મુનિરપ્યાહ તત્રાસૌ વિશ્વામિત્રઃ પ્રતાપવાન્ ।
SP0190172 સરસ્વતીમથૈકાન્તે વસિષ્ઠં મે મહાપગે ।
SP0190173 સ્રોતસા મહતાક્ષિપ્ય સ્નાયમાનમિહાનય ॥

SP0190181 સૈવમુક્તા તુ તં ગત્વા વસિષ્ઠં પ્રાહ દુઃખિતા ।
SP0190182 યદુક્તવાંસ્તુ ગાધેયઃ સ ચોવાચ મહાનદીમ્ ॥

SP0190191 એવં કુરુ મહાભાગે માં નયસ્વ યથેપ્સિતમ્ ।
SP0190192 મા તે ક્રૂરઃ સ ગાધેયઃ શાપં દદ્યાત્સુદુસ્તરમ્ ॥

SP0190200 સનત્કુમાર ઉવાચ ।
SP0190201 ગાધેયસ્ય તતઃ સા તુ જુહ્વતોઽગ્નિં દિવાકરે ।
SP0190202 મધ્યં પ્રાપ્તેઽનયદ્વેગાદ્વસિષ્ઠં સ્રોતસા શુભા ॥

SP0190211 તં દૃષ્ટ્વાપહૃતં વ્યાસ સ્રોતસા મુનિસત્તમમ્ ।
SP0190212 ઉવાચ ચ્છદ્મના યસ્માદ્વેગેનાપહૃતસ્ત્વયા ।
SP0190213 તસ્માત્ત્વં કર્મણાનેન સાસૃક્તોયા ભવિષ્યસિ ॥

SP0190221 વિશ્વામિત્રેણ સા શપ્તા નદી લોકસુખપ્રદા ।
SP0190222 અવહદ્રુધિરં ચૈવ માંસમેદસ્તથૈવ ચ ॥

SP0190231 અથ તીર્થપ્રસઙ્ગેન મુનિભિઃ સમુપાગતૈઃ ।
SP0190232 અનુગ્રહઃ કૃતસ્તસ્યા યેન સ્વચ્છજલાભવત્ ॥

SP0190241 મહતસ્તપસઃ શક્ત્યા કાલેન મહતા તદા ।
SP0190242 વસિષ્ઠસ્ય ચ તાં ક્ષાન્તિં જ્ઞાત્વા સ ઋષિપુંગવઃ ॥

SP0190251 વિશ્વામિત્રો મહાતેજા વસિષ્ઠે વૈરમત્યજત્ ।
SP0190252 એવં તૌ વૈરમન્યોન્યં જહતુર્મુનિસત્તમૌ ॥

SP0190260 સનત્કુમાર ઉવાચ ।
SP0190261 ય ઇમં શ ૃણુયાન્નિત્યં બ્રાહ્મણાઞ્છ્રાવયીત વા ।
SP0190262 સ દુસ્તરાણિ દુર્ગાણિ તરત્યશ્રાન્તપૌરુષઃ ॥

SP0190271 હ્રીપૌરુષૌદાર્યવિહારસત્ત્વૈઃ સમન્વિતઃ સોજ્જ્વલચારુવેષઃ ।
SP0190272 ભવેચ્ચ સર્વામરરાજતુલ્યસ્ત્રિપિષ્ટપે ક્રીડતિ ચેચ્છયા સ્વયમ્ ॥

SP0190281 એવં તદભવદ્વ્યાસ વિશ્વામિત્રવસિષ્ઠયોઃ ।
SP0190282 વૈરં સમાપ્તં લોકાનાં હિતાર્થં પુનરેવ ચ ॥

SP0199999 ઇતિ સ્કન્દપુરાણે ઊનવિંશતિતમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૨૦

SP0200010 વ્યાસ ઉવાચ ।
SP0200011 ઉમાહરૌ તુ દેવેશૌ ચક્રતુર્યચ્ચ સંગતૌ ।
SP0200012 તન્મે સર્વમશેષેણ કથયસ્વ મહામુને ॥

SP0200020 સનત્કુમાર ઉવાચ ।
SP0200021 ઉમાહરૌ તુ સંગમ્ય પરસ્પરમનિન્દિતૌ ।
SP0200022 શાલશણ્કસ્યાન્વયે વિપ્રં યુયુજાતે વરેણ હ ॥

SP0200031 સ ચાપ્યયોનિજઃ પુત્ર આરાધ્ય પરમેશ્વરમ્ ।
SP0200032 રુદ્રેણ સમતાં લબ્ધ્વા મહાગણપતિર્બભૌ ॥

SP0200040 વ્યાસ ઉવાચ ।
SP0200041 કથં નન્દી સમુત્પન્નઃ કથં ચારાધ્ય શંકરમ્ ।
SP0200042 સમાનત્વમગાચ્છમ્ભોઃ પ્રતીહારત્વમેવ ચ ॥

SP0200050 સનત્કુમાર ઉવાચ ।
SP0200051 અભૂદૃષિઃ સ ધર્માત્મા શિલાદો નામ વીર્યવાન્ ।
SP0200052 તસ્યાભૂચ્છિલકૈર્વૃત્તિઃ શિલાદસ્તેન સોઽભવત્ ॥

SP0200061 અપશ્યલ્લમ્બમાનાંસ્તુ ગર્તાયાં સ પિત્।ૠ્ન્દ્વિજઃ ।
SP0200062 વિચ્છિન્નસંતતીન્ઘોરં નિરયં વૈ પ્રપેતુષઃ ॥

SP0200071 તૈરુક્તોઽપત્યકામૈસ્તુ દેવં લોકેશમવ્યયમ્ ।

SP0200072 આરાધય મહાદેવં સુતાર્થં દ્વિજસત્તમ ॥

SP0200081 તસ્ય વર્ષસહસ્રેણ તપ્યમાનસ્ય શૂલધૃક્ ।
SP0200082 શર્વઃ સોમો ગણવૃતો વરદોઽસ્મીત્યભાષત ॥

SP0200091 તં દૃષ્ટ્વા સોમમીશેશં પ્રણતઃ પાદયોર્વિભોઃ ।
SP0200092 હર્ષગદ્ગદયા વાચા તુષ્ટાવ વિબુધેશ્વરમ્ ॥

SP0200101 નમઃ પરમદેવાય મહેશાય મહાત્મને ।
SP0200102 સ્રષ્ટ્રે સર્વસુરેશાનાં બ્રહ્મણઃ પતયે નમઃ ॥

SP0200111 નમઃ કામાઙ્ગનાશાય યોગસમ્ભવહેતવે ।
SP0200112 નમઃ પર્વતવાસાય ધ્યાનગમ્યાય વેધસે ॥

SP0200121 ઋષીણાં પતયે નિત્યં દેવાનાં પતયે નમઃ ।
SP0200122 વેદાનાં પતયે ચૈવ યોગિનાં પતયે નમઃ ॥

SP0200131 પ્રધાનાય નમો નિત્યં તત્ત્વાયામરસંજ્ઞિણે ।
SP0200132 વરદાય ચ ભક્તાનાં નમઃ સર્વગતાય ચ ॥

SP0200141 તન્માત્રેન્દ્રિયભૂતાનાં વિકારાણાં ગુણૈઃ સહ ।
SP0200142 સ્રષ્ટ્રે ચ પતયે ચૈવ નમશ્ચ પ્રભવિષ્ણવે ॥

SP0200151 જગતઃ પતયે ચૈવ જગત્સ્રષ્ટ્રે નમઃ સદા ।
SP0200152 પ્રકૃતેઃ પતયે નિત્યં પુરુષાત્પરગામિને ॥

SP0200161 ઈશ્વરાય નમો નિત્યં યોગગમ્યાય રંહસે ।
SP0200162 સંસારોત્પત્તિનાશાય સર્વકામપ્રદાય ચ ॥

SP0200171 શરણ્યાય નમો નિત્યં નમો ભસ્માઙ્ગરાગિણે ।
SP0200172 નમસ્તેઽયોગ્રહસ્તાય તેજસાં પતયે નમઃ ॥

SP0200181 સૂર્યાનિલહુતાશામ્બુચન્દ્રાકાશધરાય ચ ।
SP0200182 સ્થિતાય સર્વદા નિત્યં નમસ્ત્રૈલોકવેધસે ॥

SP0200191 સ્તોતવ્યસ્ય કુતો દેવ વિશ્રામસ્તવ વિદ્યતે ।
SP0200192 યદા હેતુસ્ત્વમેવાસ્ય જગતઃ સ્થિતિનાશયોઃ ॥

SP0200201 અશરણ્યસ્ય દેવેશ ત્વત્તશ્ચ શરણાર્થિનઃ ।
SP0200202 પ્રસાદં પરમાલમ્બ્ય વરદો ભવ વિશ્વકૃત્ ॥

SP0200210 સનત્કુમાર ઉવાચ ।
SP0200211 યઃ સ્તોત્રમેતદખિલં પઠતે દ્વિજન્મા પ્રાતઃ શુચિર્નિયમવાન્પુરતો દ્વિજાનામ્ ।
SP0200212 તં બ્રહ્મરાક્ષસનિશાચરભૂતયક્ષા હિંસન્તિ નો દ્વિપદપન્નગપૂતનાશ્ચ ॥

SP0200221 તતઃ સ ભગવાન્દેવઃ સ્તૂયમાનઃ સહોમયા ।
SP0200222 ઉવાચ વરદોઽસ્મીતિ બ્રૂહિ યત્તે મનોગતમ્ ॥

SP0200231 તમેવંવાદિનં દેવં શિલાદોઽભ્યર્ચયત્તદા ।
SP0200232 ઉવાચ ચેદં દેવેશં સ વાચા સજ્જમાનયા ॥

SP0200241 ભગવન્યદિ તુષ્ટોઽસિ યદિ દેયો વરશ્ચ મે ।
SP0200242 ઇચ્છામ્યાત્મસમં પુત્રં મૃત્યુહીનમયોનિજમ્ ॥

SP0200251 એવમુક્તસ્તતો દેવઃ પ્રીયમાણસ્ત્રિલોચનઃ ।
SP0200252 એવમસ્ત્વિતિ તં પ્રોચ્ય તત્રૈવાન્તરધીયત ॥

SP0200261 ગતે તસ્મિન્મહેષ્વાસે ઋષિઃ પરમપૂજિતઃ ।
SP0200262 સ્વમાશ્રમમુપાગમ્ય ઋષિભ્યોઽકથયત્તતઃ ॥

SP0200271 તૈઃ પ્રશસ્તસ્તતશ્ચૈવ કાલેન મુનિસત્તમ ।
SP0200272 યિયક્ષુર્યજ્ઞભૂમિં સ્વાં લાઙ્ગલેન ચકર્ષ તામ્ ॥

SP0200281 તસ્યાં તુ કૃષ્યમાણાયાં સીતાયાં તત્સમુત્થિતઃ ।
SP0200282 સંવર્તકાનલપ્રખ્યઃ કુમારઃ પ્રત્યદૃશ્યત ॥

SP0200291 સ તં દૃષ્ટ્વા તથોદ્ભૂતં કુમારં દીપ્તતેજસમ્ ।
SP0200292 રાક્ષસોઽયમિતિ જ્ઞાત્વા ભયાન્નોપસસાર તમ્ ॥

SP0200301 કુમારોઽપિ તથોદ્ભૂતઃ પિતરં દીપ્તતેજસમ્ ।
SP0200302 ઉપાસર્પત દીનાત્મા તાત તાતેતિ ચાબ્રવીત્ ॥

SP0200311 સ તાતેત્યુચ્યમાનોઽપિ યદા તં નાભ્યનન્દત ।
SP0200312 તતો વાયુસ્તમાકાશે શિલાદં પ્રાહ સુસ્વરમ્ ॥

SP0200320 વાયુરુવાચ ।
SP0200321 શાલઙ્કાયન પુત્રસ્તે યોઽસૌ દેવેન શમ્ભુના ।
SP0200322 અયોનિજઃ પુરા દત્તઃ સ એષ પ્રતિનન્દય ॥

SP0200331 યસ્માન્નન્દીકરસ્તેઽયં સદૈવ દ્વિજસત્તમ ।
SP0200332 તસ્માન્નન્દીતિ નામ્નાયં ભવિષ્યતિ સુતસ્તવ ॥

SP0200340 સનત્કુમાર ઉવાચ ।
SP0200341 તતઃ સ વાયુવચનાન્નન્દિનં પરિષસ્વજે ।
SP0200342 ગૃહીત્વા ચાશ્રમં સ્વેન સોઽનયત્તુષ્ટિવર્ધનમ્ ।
SP0200343 ચૂડોપનયનાદીનિ કર્માણ્યસ્ય ચકાર સઃ ॥

SP0200351 કૃત્વા ચાધ્યાપયામાસ વેદાન્સાશણ્ગાનશેષતઃ ।
SP0200352 આયુર્વેદં ધનુર્વેદં ગાન્ધર્વં શબ્દલક્ષણમ્ ॥

SP0200361 હસ્તિનાં ચરિતં યચ્ચ નરનાર્યોશ્ચ લક્ષણમ્ ।
SP0200362 શિલ્પાનિ ચૈવ સર્વાણિ નિમિત્તજ્ઞાનમેવ ચ ॥

SP0200371 ભૂતગ્રામચિકિત્સાં ચ માત્।ૅ્ણાં ચરિતં ચ યત્ ।
SP0200372 ભુજંગાનાં ચ સર્વેષાં યચ્ચ કિંચિદ્વિચેષ્ટિતમ્ ।
SP0200373 અબ્દૈરધીતવાન્સર્વં વ્યાસ પઞ્ચભિરેવ ચ ॥

SP0200381 દક્ષઃ શુચિરદીનાત્મા પ્રિયવાગનસૂયકઃ ।
SP0200382 સર્વલોકપ્રિયો નિત્યં મનોનયનનન્દનઃ ॥

SP0200391 તસ્યાથ સપ્તમે વર્ષે ઋષી દિવ્યૌ તપોધનૌ ।
SP0200392 આશ્રમં સમનુપ્રાપ્તૌ શિલાદસ્ય મહૌજસૌ ॥

SP0200401 તાવભ્યર્ચ્ય યથાન્યાયં શિલાદઃ સુમહાતપાઃ ।
SP0200402 સુખાસીનૌ સમાલક્ષ્ય આસને પરમાર્ચિતૌ ॥

SP0200411 મિત્રાવરુણનામાનૌ તપોયોગબલાન્વિતૌ ।
SP0200412 અભિજ્ઞૌ સર્વભૂતાનાં ત્રૈલોક્યે સચરાચરે ॥

SP0200421 તાભ્યામનુજ્ઞાતશ્ચૈવ નિષસાદ વરાસને ।
SP0200422 ઉપવિષ્ટસ્તતઃ પ્રીત ઇષ્ટાભિર્વાગ્ભિરસ્તુવત્ ॥

SP0200431 તાભ્યાં પૃષ્ટશ્ચ કચ્ચિત્તે પુત્રસ્તુષ્ટિપ્રદઃ શુભઃ ।
SP0200432 સ્વાધ્યાયનિયતઃ કચ્ચિત્કચ્ચિદ્ધર્મસ્ય સંતતિઃ ॥

SP0200441 કચ્ચિન્ન વૃદ્ધાન્બાલો ન ગુરૂન્વાપ્યવમન્યતે ।
SP0200442 કચ્ચિન્નિયમવાંશ્ચૈવ કચ્ચિત્તુષ્ટિપ્રદઃ સતામ્ ॥

SP0200451 સ એવમુક્તસ્તેજસ્વી શિલાદઃ પુત્રવત્સલઃ ।

SP0200452 ઉવાચ ગુણવાન્સમ્યક્કુલવંશવિવર્ધનઃ ॥

SP0200461 તમાહૂય સ તુષ્ટ્યા તુ પુત્રં નન્દિનમચ્યુતમ્ ।
SP0200462 તયોઃ પાદેષુ શિરસા અપાતયત નન્દિનમ્ ॥

SP0200471 તૌ તુ તસ્યાશિષં દેવૌ પ્રયુશ્ણ્ક્તો ધર્મનિત્યતામ્ ।
SP0200472 ગુરુશુશ્રૂષણે ભાવં લોકાંશ્ચૈવ તથાક્ષયાન્ ॥

SP0200480 સનત્કુમાર ઉવાચ ।
SP0200481 શિલાદસ્તામથાલક્ષ્ય આશિષં દેવયોસ્તદા ।
SP0200482 વિસૃજ્ય નન્દિનં ભીતઃ સોઽપૃચ્છદૃષિસત્તમૌ ॥

SP0200490 શિલાદ ઉવાચ ।
SP0200491 ભગવન્તાવૃષી સત્યૌ ગતિજ્ઞૌ સર્વદેહિનામ્ ।
SP0200492 કિમર્થં મમ પુત્રસ્ય દીર્ઘમાયુરુભાવપિ ।
SP0200493 પ્રયુક્તવન્તૌ સમ્યક્તુ નાશિષં મુનિસત્તમૌ ॥

SP0200500 મિત્રાવરુણાવૂચતુઃ ।
SP0200501 તવૈષ તનયસ્તાત અલ્પાયુઃ સર્વસમ્મતઃ ।
SP0200502 અતોઽન્યદ્વર્ષમેકં વૈ જીવિતં ધારયિષ્યતિ ॥

SP0200510 સનત્કુમાર ઉવાચ ।
SP0200511 તતઃ સ શોકસંતપ્તો ન્યપતદ્ભુવિ દુઃખિતઃ ।
SP0200512 વિસૃજ્ય ઋષિશાર્દૂલાવેકાકી વિલલાપ ચ ॥

SP0200521 તસ્ય શોકાદ્વિલપતઃ સ્વરં શ્રુત્વા સુતઃ શુભઃ ।
SP0200522 નન્ધાગાત્તમથાપશ્યત્પિતરં દુઃખિતં ભૃશમ્ ॥

SP0200530 નન્દ્યુવાચ ।
SP0200531 કેન ત્વં તાત દુઃખેન દૂયમાનઃ પ્રરોદિષિ ।
SP0200532 દુઃખં તે કુત ઉદ્ભૂતં જ્ઞાતુમિચ્છામ્યહં પિતઃ ॥

SP0200540 શિલાદ ઉવાચ ।
SP0200541 પુત્ર ત્વં કિલ વર્ષેણ જીવિતં સમ્પ્રહાસ્યસિ ।
SP0200542 ઊચતુસ્તાવૃષીત્યેવં તતો માં કૃચ્છ્રમાવિશત્ ॥

SP0200550 નન્દ્યુવાચ ।
SP0200551 સત્યં દેવઋષી તાત ન તાવનૃતમૂચતુઃ ।
SP0200552 તથાપિ તુ ન મૃત્યુર્મે પ્રભવિષ્યતિ મા શુચઃ ॥

SP0200560 શિલાદ ઉવાચ ।
SP0200561 કિં તપઃ કિં પરિજ્ઞાનં કો યોગઃ કઃ શ્રમશ્ચ તે ।
SP0200562 યેન ત્વં મૃત્યુમુદ્યુક્તં વઞ્ચયિષ્યસિ કથ્યતામ્ ॥

SP0200570 નન્દ્યુવાચ ।
SP0200571 ન તાત તપસા મૃત્યું વઞ્ચયિષ્યે ન વિદ્યયા ।
SP0200572 મહાદેવપ્રસાદેન મૃત્યું જેષ્યામિ નાન્યથા ॥

SP0200581 દ્રક્ષ્યામિ શંકરં દેવં તતો મૃત્યુર્ન મે ભવેત્ ।
SP0200582 નષ્ટે મૃત્યૌ ત્વયા સાર્ધં ચિરં વત્સ્યામિ નિર્વૃતઃ ॥

SP0200590 શિલાદ ઉવાચ ।
SP0200591 મયા વર્ષસહસ્રેણ તપસ્તપ્ત્વા સુદુશ્ચરમ્ ।
SP0200592 મહાદેવઃ પુરા દૃષ્ટો લબ્ધસ્ત્વં મે યતઃ સુતઃ ॥

SP0200601 ભવાંસ્તુ વર્ષેણૈકેન તપસા નાતિભાવિતઃ ।
SP0200602 કથં દ્રષ્ટા મહાદેવમેતદિચ્છામિ વેદિતુમ્ ॥

SP0200610 નન્દ્યુવાચ ।
SP0200611 ન તાત તપસા દેવો દૃશ્યતે ન ચ વિદ્યયા ।
SP0200612 શુદ્ધેન મનસા ભક્ત્યા દૃશ્યતે પરમેશ્વરઃ ॥

SP0200621 ત્વયા વિસૃષ્ટો ગત્વાહમચિરેણ ત્રિલોચનમ્ ।
SP0200622 દ્રષ્ટા તાત ન સંદેહો વિસૃજાશુ તતસ્તુ મામ્ ॥

SP0200631 તિષ્ઠન્તં માં યમોઽભ્યેત્ય પશ્યતસ્તેઽભિસમ્મતમ્ ।
SP0200632 ન હિંસતિ તથા તસ્માદિતસ્તાત વ્રજામ્યહમ્ ॥

SP0200641 તિષ્ઠન્તં વા શયાનં વા ધાવન્તં પતિતં તથા ।
SP0200642 ન પ્રતીક્ષતિ વૈ મૃત્યુરિતિ બુદ્ધ્વા શમં વ્રજ ॥

SP0200651 અવતીર્ય જલં દિવ્યં ભાવં શુદ્ધં સમાસ્થિતઃ ।
SP0200652 અભ્યસ્ય રૌદ્રમધ્યાયં તતો દ્રક્ષ્યામિ શંકરમ્ ॥

SP0200661 જપતશ્ચાપિ યુક્તસ્ય રુદ્રભાવાર્પિતસ્ય ચ ।
SP0200662 ન મૃત્યુકાલા બહવઃ કરિષ્યન્તિ મમ વ્યથામ્ ॥

SP0200670 સનત્કુમાર ઉવાચ ।

SP0200671 તમેવંવાદિનં મત્વા બ્રુવાણં શુદ્ધયા ગિરા ।
SP0200672 વ્યસર્જયદદીનાત્મા કૃચ્છ્રાત્પુત્રં મહાતપાઃ ॥

SP0200681 અભિવન્દ્ય પિતુઃ પાદૌ શિરસા સ મહાયશાઃ ।
SP0200682 પ્રદક્ષિણં સમાવૃત્ય સમ્પ્રતસ્થેઽતિનિશ્ચિતઃ ॥

SP0200691 અભિવાદ્ય ઋષીન્સર્વાન્સ દિદૃક્ષુરુદારધીઃ ।
SP0200692 મુનિઃ સ દેવમગમત્પ્રણતાર્તિહરં હરમ્ ॥

SP0209999 ઇતિ સ્કન્દપુરાણે વિંશતિતમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૨૧

SP0210010 સનત્કુમાર ઉવાચ ।
SP0210011 નિર્ગતોઽથ તતો નન્દી જગામ સરિતાં વરામ્ ।
SP0210012 ભુવનામિતિ વિખ્યાતાં સર્વલોકસુખાવહામ્ ॥

SP0210021 તાં પ્રવિશ્ય તતો ધીમાનેકાગ્રો હ્રદમાસ્થિતઃ ।
SP0210022 સ જજાપ તદા રુદ્રાન્મૃત્યોર્ભીતઃ સમાહિતઃ ॥

SP0210031 જપતા તેન તત્રૈવ તત્પરેણ તદાશિષા ।
SP0210032 કોટિરેકા યદા જપ્તા તદા દેવસ્તુતોષ હ ॥

SP0210041 તમાગત્યાહ ભગવાઞ્છર્વ ઉગ્રઃ કપર્દિમાન્ ।
SP0210042 નન્દિંસ્તુષ્ટોઽસ્મિ ભદ્રં તે વરં વૃણુ યથેપ્સિતમ્ ॥

SP0210051 ઉવાચ પ્રણતો ભૂત્વા પ્રણતાર્તિહરં હરમ્ ।
SP0210052 દ્વિતીયાં જપ્તુમિચ્છામિ કોટિં ભગવતાં વિભો ।
SP0210053 એવમસ્ત્વિતિ દેવોઽપિ પ્રોચ્યાગચ્છદ્યથાગતમ્ ॥

SP0210060 સનત્કુમાર ઉવાચ ।
SP0210061 સોઽવતીર્ય તતો ભૂયઃ પ્રયતાત્મા તથૈવ હ ।
SP0210062 જજાપ કોટિમન્યાં તુ રુદ્રમેવાનુચિન્તયન્ ॥

SP0210071 દ્વિતીયાયાં તતઃ કોટ્યાં સમ્પૂર્ણાયાં વૃષધ્વજઃ ।
SP0210072 અભ્યાજગામ તં ચૈવ વરદોઽસ્મીત્યભાષત ॥

SP0210081 સ પ્રાહ ભગવન્કોટિં તૃતીયામપિ કાલહન્ ।
SP0210082 જપ્તુમિચ્છામિ દેવેશ ત્વત્પ્રસાદાદહં વિભો ॥

SP0210091 એવમસ્ત્વિતિ ભૂયોઽપિ ભગવાન્પ્રત્યુવાચ હ ।
SP0210092 ઉક્ત્વા જગામ સ્વં વેશ્મ દેવ્યા સહ મહાદ્યુતિઃ ॥

SP0210101 તતસ્તૃતીયાં રુદ્રાણાં કોટિમન્યાં જજાપ હ ।
SP0210102 યુગાન્તાદિત્યસંકાશસ્તતઃ સમભવદ્દ્વિજઃ ॥

SP0210111 તસ્ય કોટીત્રયે વ્યાસ સમાપ્તે જ્વલનત્વિષઃ ।
SP0210112 સોમઃ સહ ગણૈર્દેવસ્તં દેશમુપચક્રમે ॥

SP0210121 સ તં કરેણ સંગૃહ્ય ઉદ્ધૃત્ય સલિલાચ્ચ હ ।
SP0210122 સમ્મૃજાનોઽગ્રહસ્તેન નન્દિનં કાલહાબ્રવીત્ ॥

SP0210130 દેવ ઉવાચ ।
SP0210131 શૈલાદે વરદોઽહં તે તપસાનેન તોષિતઃ ।
SP0210132 સાધુ જપ્તં ત્વયા ધીમન્બ્રૂહિ યત્તે મનોગતમ્ ॥

SP0210140 શૈલાદિરુવાચ ।
SP0210141 જપેયં કોટિમન્યાં તુ ભૂયોઽપિ તવ તેજસા ।
SP0210142 વરમેતં વૃણે દેવ યદિ તુષ્ટોઽસિ મે વિભો ॥

SP0210150 ભગવાનુવાચ ।
SP0210151 કિં તે જપ્તેન ભૂયોઽપિ તુષ્ટોઽસ્મિ તવ સર્વથા ।
SP0210152 યદ્યત્ત્વં વૃણુષે કામં સર્વં તત્પ્રદદાનિ તે ॥

SP0210161 બ્રહ્મત્વમથ વિષ્ણુત્વમિન્દ્રત્વમથ વાયુતામ્ ।
SP0210162 આદિત્યો ભવ રુદ્રો વા બ્રૂહિ કિં વા દદાનિ તે ॥

SP0210170 સનત્કુમાર ઉવાચ ।
SP0210171 સ એવમુક્તો દેવેન શિરસા પાદયોર્નતઃ ।
SP0210172 તુષ્ટાવ પુરકામાશઙ્ગક્રતુપર્વતનાશનમ્ ॥

SP0210180 નન્દ્યુવાચ ।
SP0210181 નમો દેવાતિદેવાય મહાદેવાય વૈ નમઃ ।
SP0210182 નમઃ કામાશઙ્ગનાશાય નીલકણ્ઠાય વૈ નમઃ ॥

SP0210191 નમસ્તુષિતનાશાય ત્રૈલોક્યદહનાય ચ ।

SP0210192 નમઃ કાલોગ્રદણ્ડાય ઉગ્રદણ્ડાય વૈ નમઃ ॥

SP0210201 નમો નીલશિખણ્ડાય સહસ્રશિરસે નમઃ ।
SP0210202 સહસ્રપાણયે ચૈવ સહસ્રચરણાય ચ ॥

SP0210211 સર્વતઃપાણિપાદાય સર્વતોક્ષિમુખાય ચ ।
SP0210212 સર્વતઃશ્રુતયે ચૈવ સર્વમાવૃત્ય તિષ્ઠતે ॥

SP0210221 નમસ્તે રુક્મવર્ણાય તથૈવાતીન્દ્રિયાય ચ ।
SP0210222 નમઃ કનકલિઙ્ગાય સર્વલિઙ્ગાય વૈ નમઃ ॥

SP0210231 નમશ્ચન્દ્રાર્કવર્ણાય યોગેશાયાજિતાય ચ ।
SP0210232 પિનાકપાણયે ચૈવ શૂલમુદ્ગરપાણયે ॥

SP0210241 ગદિને ખડ્ગિને ચૈવ પરશ્વધધરાય ચ ।
SP0210242 રથિને વર્મિણે ચૈવ મહેષ્વાસાય વૈ નમઃ ॥

SP0210251 નમસ્ત્રિશૂલહસ્તાય ઉગ્રદણ્ડધરાય ચ ।
SP0210252 નમો ગણાધિપતયે રુદ્રાણાં પતયે નમઃ ॥

SP0210261 નમઃ સહસ્રનેત્રાય શતનેત્રાય વૈ નમઃ ।
SP0210262 આદિત્યાનાં ચ પતયે વસૂનાં પતયે નમઃ ॥

SP0210271 નમઃ પૃથિવ્યાઃ પતયે આકાશપતયે નમઃ ।
SP0210272 નમઃ સ્વર્લોકપતયે ઉમાયાઃ પતયે નમઃ ॥

SP0210281 નમો યોગાધિપતયે સર્વયોગપ્રદાય ચ ।
SP0210282 ધ્યાનિને ધ્યાયમાનાય ધ્યાનિભિઃ સંસ્તુતાય ચ ॥

SP0210291 મૃત્યવે કાલદણ્ડાય યમાય ચ મહાત્મને ।
SP0210292 દેવાધિપતયે ચૈવ દિવ્યસંહનનાય ચ ॥

SP0210301 યજ્ઞાય વસુદાનાય સ્વર્ગાયાજન્મદાય ચ ।
SP0210302 સવિત્રે સર્વદેવાનાં ધર્માયાનેકરૂપિણે ॥

SP0210311 અમૃતાય વરેણ્યાય સર્વદેવસ્તુતાય ચ ।
SP0210312 બ્રહ્મણશ્ચ શિરોહર્ત્રે યજ્ઞસ્ય ચ મહાત્મનઃ ॥

SP0210321 ત્રિપુરઘ્નાય ચોગ્રાય સર્વાશુભહરાય ચ ।
SP0210322 ઉમાદેહાર્ધરૂપાય લલાટનયનાય ચ ॥

SP0210331 મહિષાન્ધકભેત્તાય સ્રષ્ટ્રે વૈ પરમેષ્ઠિને ।
SP0210332 બ્રહ્મણો ગુરવે ચૈવ બ્રહ્મણો જનકાય ચ ॥

SP0210341 કુમારગુરવે ચૈવ કુમારવરદાય ચ ।
SP0210342 હલિને મુષલધ્રાય મહાહાસાય વૈ નમઃ ॥

SP0210351 મૃત્યુપાશોગ્રહસ્તાય તક્ષકબ્રહ્મસૂત્રિણે ।
SP0210352 સવિદ્યુદ્ધનવાહાય તથૈવ વૃષયાયિને ॥

SP0210361 હિમવદ્વિન્ધ્યવાસાય મેરુપર્વતવાસિને ।
SP0210362 કૈલાસવાસિને ચૈવ ધનેશ્વરસખાય ચ ॥

SP0210371 વિષ્ણોર્દેહાર્ધદત્તાય તસ્યૈવ વરદાય ચ ।
SP0210372 સર્વભૂતાસમજ્ઞાય સર્વભૂતાનુકમ્પિને ॥

SP0210381 અન્તર્ભૂતાધિભૂતાય પ્રાણિનાં જીવદાય ચ ।
SP0210382 મનસે મન્યમાનાય અતિમાનાય ચૈવ હિ ॥

SP0210391 બુધ્યમાનાય બુદ્ધાય દ્રષ્ટ્રે વૈ ચક્ષુષે નમઃ ।
SP0210392 નમસ્તે સ્પર્શયિત્રે ચ તથૈવ સ્પર્શનાય ચ ॥

SP0210401 નમસ્તે રસયિત્રે ચ તથૈવ રસનાય ચ ।
SP0210402 નમો ઘ્રાણાય ઘ્રાત્રે ચ શ્રોત્રે શ્રોત્રાય ચૈવ હિ ।
SP0210403 હસ્તિને ચૈવ હસ્તાય તથા પાદાય પાદિને ॥

SP0210411 નમોઽસ્ત્વાનન્દકર્ત્રે ચ આનન્દાય ચ વૈ નમઃ ।
SP0210412 વાચેઽથ વાગ્મિને ચૈવ તન્માત્રાય મહાત્મને ॥

SP0210421 સૂક્ષ્માય ચૈવ સ્થૂલાય સત્ત્વાય રજસે નમઃ ।
SP0210422 નમશ્ચ તમસે નિત્યં ક્ષેત્રજ્ઞાયાજિતાય ચ ॥

SP0210431 વિષ્ણવે લોકતન્ત્રાય પ્રજાનાં પતયે નમઃ ।
SP0210432 મનવે સપ્તઋષયે તપ્યમાનાય તાપિને ॥

SP0210441 બ્રહ્મણ્યાયાથ શુદ્ધાય તથા દુર્વાસસે નમઃ ।
SP0210442 શિલ્પિને શિલ્પનાથાય વિદુષે વિશ્વકર્મણે ॥

SP0210451 અત્રયે ભૃગવે ચૈવ તથૈવાશિણ્ગરસે નમઃ ।
SP0210452 પુલહાય પુલસ્ત્યાય ક્રતુદક્ષાનલાય ચ ॥

SP0210461 ધર્માય રુચયે ચૈવ વસિષ્ઠાય નમોઽસ્તુ તે ।

SP0210462 ભૂતાય ભૂતનાથાય કુષ્માણ્ડપતયે નમઃ ॥

SP0210471 તિષ્ઠતે દ્રવતે ચૈવ ગાયતે નૃત્યતેઽપિ ચ ।
SP0210472 અવશ્યાયાપ્યવધ્યાય અજરાયામરાય ચ ॥

SP0210481 અક્ષયાયાવ્યયાયૈવ તથાપ્રતિહતાય ચ ।
SP0210482 અનાવેશ્યાય સર્વેષાં દૃશ્યાયાદૃશ્યરૂપિણે ॥

SP0210491 સૂક્ષ્મેભ્યશ્ચાપિ સૂક્ષ્માય સર્વગાય મહાત્મને ।
SP0210492 નમસ્તે ભગવંસ્ત્ર્યક્ષ નમસ્તે ભગવઞ્છિવ ।
SP0210493 નમસ્તે સર્વલોકેશ નમસ્તે લોકભાવન ॥

SP0210501 ન મે દેવાધિપત્યેન બ્રહ્મત્વેનાથવા પુનઃ ।
SP0210502 ન વિષ્ણુત્વેન દેવેશ નાપીન્દ્રત્વેન ભૂતપ ।
SP0210503 ઇચ્છામ્યહં તવેશાન ગણત્વં નિત્યમવ્યયમ્ ॥

SP0210511 નિત્યં ત્વાં સગણં સામ્બં પ્રસન્નં સપરિચ્છદમ્ ।
SP0210512 દ્રષ્ટુમિચ્છામિ દેવેશ એષ મે દીયતાં વરઃ ॥

SP0210521 ત્વં નો ગતિઃ પુરા દેવ ત્વં ચૈવાર્તાયનં પ્રભુઃ ।
SP0210522 શરણં ચ ત્વમેવાથ નાન્યં પશ્યામિ કર્હિચિત્ ॥

SP0210531 ત્વયા ત્યક્તસ્ય ચૈવાશુ વિનાશો નાત્ર સંશયઃ ।
SP0210532 અન્યાં ગતિં ન પશ્યામિ યસ્યા આત્યન્તિકં શુભમ્ ॥

SP0210541 અનુરક્તં ચ ભક્તં ચ ત્વત્પરં ત્વદપાશ્રયમ્ ।
SP0210542 પ્રતીચ્છ માં સદા દેવ એષ મે દીયતાં વરઃ ॥

SP0210550 સનત્કુમાર ઉવાચ ।
SP0210551 ય ઇમં પ્રાતરુત્થાય પઠેદવિમના નરઃ ।
SP0210552 સ દેહભેદમાસાદ્ય નન્દીશ્વરસમો ભવેત્ ॥

SP0210561 યશ્ચેમં શ ृણુયાન્નિત્યં શ્રાવયેદ્વા દ્વિજાતિષુ ।
SP0210562 સોઽશ્વમેધફલં પ્રાપ્ય રુદ્રલોકે મહીયતે ॥

SP0210571 શ્રુત્વા સકૃદપિ હ્યેતં સ્તવં પાપપ્રણાશનમ્ ।
SP0210572 યત્ર તત્ર મૃતો વ્યાસ ન દુર્ગતિમવાપ્નુયાત્ ॥

SP0210581 યોઽધીત્ય નિત્યં સ્તવમેતમગ્ર્યં દેવં સદાભ્યર્ચયતે યતાત્મા ।
SP0210582 કિં તસ્ય યજ્ઞૈર્વિવિધૈશ્ચ દાનૈસ્તીર્થૈઃ સુતપ્તૈશ્ચ

તથા તપોભિઃ ॥

SP0219999 ઇતિ સ્કન્દપુરાણ એકવિંશતિમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૨૨

SP0220010 સનત્કુમાર ઉવાચ ।
SP0220011 તતસ્તુ દેવદેવેશો ભક્ત્યા પરમયા યુતમ્ ।
SP0220012 અશ્રુપૂર્ણેક્ષણં દીનં પાદયોઃ શિરસા નતમ્ ॥

SP0220021 કરાભ્યાં સુસુખાભ્યાં તુ સંગૃહ્ય પરમાર્તિહા ।
SP0220022 ઉત્થાપ્ય નયને સોમઃ અશ્રુપૂર્ણે મમાર્જ હ ॥

SP0220031 ઉવાચ ચૈનં તુષ્ટાત્મા વચસાપ્યાયયન્નિવ ।
SP0220032 નિરીક્ષ્ય ગણપાન્સર્વાન્દેવ્યા સહ તદા પ્રભુઃ ॥

SP0220040 દેવ ઉવાચ ।
SP0220041 જાને ભક્તિં તવ મયિ જાને ચાર્તિં તવાનઘ ।
SP0220042 તસ્ય સર્વસ્ય શૈલાદે ઉદર્કં સંનિશામય ॥

SP0220051 અમરો જરયા ત્યક્તો નિત્યં દુઃખવિવર્જિતઃ ।
SP0220052 અક્ષયશ્ચાવ્યયશ્ચૈવ સપિતા સસુહૃજ્જનઃ ॥

SP0220061 મમેષ્ટો ગણપશ્ચૈવ મદ્વીર્યો મત્પરાક્રમઃ ।
SP0220062 ઇષ્ટો મમ સદા ચૈવ મમ પાર્શ્વગતઃ સદા ।
SP0220063 મદ્રૂપશ્ચૈવ ભવિતા મહાયોગબલાન્વિતઃ ॥

SP0220071 ઋદ્ધિમચ્ચૈવ તે દ્વીપં ક્ષીરોદમમૃતાકરમ્ ।
SP0220072 સંવાસં સમ્પ્રયચ્છામિ તત્ર રંસ્યસિ સર્વદા ॥

SP0220081 કુશેશયમયીં માલામવમુચ્યાત્મનસ્તતઃ ।
SP0220082 આબબન્ધ મહાતેજા નન્દિને દિવ્યરૂપિણીમ્ ॥

SP0220091 સ તયા માલયા નન્દી બભૌ કણ્ઠાવસક્તયા ।
SP0220092 ત્ર્યક્ષો દશભુજઃ શ્રીમાન્દ્વિતીય ઇવ શંકરઃ ॥

SP0220101 તતસ્તં વૈ સમાદાય હસ્તેન ભગવાન્હરઃ ।

SP0220102 ઉવાચ બ્રૂહિ કિં તેઽદ્ય દદાનિ વરમુત્તમમ્ ॥

SP0220111 આશ્રમશ્ચાયમત્યર્થં તપસા તવ ભાવિતઃ ।
SP0220112 જપ્યેશ્વર ઇતિ ખ્યાતો મમ ગુહ્યો ભવિષ્યતિ ॥

SP0220121 સમન્તાદ્યોજનં ક્ષેત્રં દિવ્યં દેવગણૈર્વૃતમ્ ।
SP0220122 સિદ્ધચારણસંકીર્ણમપ્સરોગણસેવિતમ્ ।
SP0220123 સિદ્ધિક્ષેત્રં પરં ગુહ્યં ભવિષ્યતિ ન સંશયઃ ॥

SP0220131 કર્મણા મનસા વાચા યત્કિંચિત્કુરુતે નરઃ ।
SP0220132 શુભં વાપ્યશુભં વાત્ર સર્વં ભવિતૃ તચ્છુભમ્ ॥

SP0220141 જાપ્યં માનસં તુલ્યં વૈ રુદ્રાણાં તદ્ભવિષ્યતિ ।
SP0220142 યત્ર તત્ર મૃતા મર્ત્યા યાસ્યન્તિ તવ લોકતામ્ ॥

SP0220151 તતો જટાસ્રુતં વારિ ગૃહીત્વા હારનિર્મલમ્ ।
SP0220152 ઉક્ત્વા નદી ભવસ્વેતિ વિસસર્જ મહાતપાઃ ॥

SP0220161 સા તતો દિવ્યતોયા ચ પુણ્યા મણિજલા શુભા ।
SP0220162 હંસકારણ્ડવાકીર્ણા ચક્રવાકોપશોભિતા ।
SP0220163 પદ્મોત્પલવનોપેતા પ્રાવર્તત મહાનદી ॥

SP0220171 સ્ત્રીરૂપધારિણી ચૈવ પ્રાઞ્જલિઃ શિરસા નતા ।
SP0220172 પદ્મોત્પલદલાભાક્ષી મહાદેવમુપસ્થિતા ॥

SP0220181 તામુવાચ તતો દેવો નદીં સ્વયમુપસ્થિતામ્ ।
SP0220182 યસ્માજ્જટોદકાદ્દેવિ પ્રવૃત્તા ત્વં શુભાનને ।
SP0220183 તસ્માજ્જટોદા નામ્ના ત્વં ભવિષ્યસિ સરિદ્વરા ॥

SP0220191 ત્વયિ સ્નાનં તુ યઃ કુર્યાચ્છુચિઃ પ્રયતમાનસઃ ।
SP0220192 સોઽશ્વમેધફલં પ્રાપ્ય રુદ્રલોકે મહીયતે ॥

SP0220200 સનત્કુમાર ઉવાચ ।
SP0220201 તતો દેવ્યા મહાદેવો નન્દીશ્વરમતિપ્રભમ્ ।
SP0220202 પુત્રસ્તેઽયમિતિ પ્રોચ્ય પાદયોસ્તં વ્યનામયત્ ॥

SP0220211 સા તમાઘ્રાય શિરસિ પાણિભ્યાં પરિમાર્જતી ।
SP0220212 પુત્રપ્રેમ્ણાભ્યષિઞ્ચત્તં સ્રોતોભિઃ સ્તનજૈસ્ત્રિભિઃ ।
SP0220213 પયસા શશઙ્ખગૌરેણ દેવી દેવં નિરીક્ષતી ॥

SP0220221 તાનિ સ્રોતાંસિ ત્રીણ્યસ્યાઃ સ્રુતાન્યોઘવતી નદી ।
SP0220222 નદીં ત્રિસ્રોતસીં પુણ્યાં તતસ્તામવદદ્ધરઃ ॥

SP0220231 ત્રિસ્રોતસં નદીં દૃષ્ટ્વા વૃષઃ પરમહર્ષિતઃ ।
SP0220232 નનર્દ નાદાત્તસ્માચ્ચ સરિદન્યા તતોઽભવત્ ॥

SP0220241 યસ્માદ્વૃષભનાદેન પ્રવૃત્તા સા મહાનદી ।
SP0220242 તસ્માડ્ઢિક્લિરિકાં તાં વૈ ઉવાચ વૃષભધ્વજઃ ॥

SP0220251 જામ્બૂનદમયં ચિત્રં સ્વં દેવઃ પરમાદ્ભુતમ્ ।
SP0220252 મુકુટં ચાબબન્ધાસ્મૈ કુણ્ડલે ચામૃતોદ્ભવે ॥

SP0220261 તં તથાભ્યર્ચિતં વ્યોમ્નિ દૃષ્ટ્વા મેઘઃ પ્રભાકરઃ ।
SP0220262 દેવોપવાહ્યઃ સિષિચે સનાદઃ સતડિદ્ગુણઃ ॥

SP0220271 તસ્યાભિષિક્તસ્ય તદા પ્રવૃત્તે સ્રોતસી ભૃશમ્ ।
SP0220272 યસ્માત્સુવર્ણાન્નિઃસૃત્ય નદ્યેકા સમ્પ્રવર્તત ।
SP0220273 સ્વર્ણોદકેતિ નામ્ના તાં મહાદેવોઽભ્યભાષત ॥

SP0220281 જામ્બૂનદમયાદ્યસ્માદ્વિતીયા મુકુટાચ્છુભાત્ ।
SP0220282 પ્રાવર્તત નદી પુણ્યા ઊચુર્જમ્બૂનદીતિ તામ્ ॥

SP0220291 એતત્પઞ્ચનદં નામ જપ્યેશ્વરસમીપગમ્ ।
SP0220292 વ્યાખ્યાતં ફલમેતાસાં જટોદાયાં મહાત્મના ॥

SP0220301 તચ્ચ પઞ્ચનદં દિવ્યં દેવં જપ્યેશ્વરં ચ તમ્ ।
SP0220302 ત્રિરાત્રોપોષિતો ગત્વા સ્નાત્વાભ્યર્ચ્ય ચ શૂલિનમ્ ॥

SP0220311 નન્દીશ્વરસ્યાનુચરઃ ક્ષીરોદનિલયો ભવેત્ ॥

SP0220321 યસ્તુ જપ્યેશ્વરે પ્રાણાન્પરિત્યજતિ દુસ્ત્યજાન્ ।
SP0220322 નિયમેનાન્યથા વાપિ સ મે ગણપતિર્ભવેત્ ॥

SP0220331 નન્દીશ્વરસમો નિત્યઃ શાશ્વતઃ અક્ષયોઽવ્યયઃ ।
SP0220332 મમ પાર્શ્વાદનપગઃ પ્રિયઃ સમ્મત એવ ચ ॥

SP0220341 જપ્યેશ્વરં પઞ્ચનદં ચ તદ્વૈ યો માનવોઽભ્યેત્ય જહાતિ દેહમ્ ।
SP0220342 સ મે સદા સ્યાદ્ગણપો વરિષ્ઠસ્ત્વયા સમઃ કાન્તિવપુશ્ચ નિત્યમ્ ॥

SP0229999 ઇતિ સ્કન્દપુરાણે દ્વાવિંશતિમોઽધ્યાયઃ ॥

## સ્કંદપુરાણ અધ્યાય  ૨૩

SP0240010 સનત્કુમાર ઉવાચ ।
SP0240011 તે ગણેશા મહાસત્ત્વાઃ સર્વે દેવેશ્વરેશ્વરાઃ ।
SP0240012 પ્રણમ્ય દેવં દેવીં ચ ઇદં વચનમબ્રુવન્ ॥

SP0240021 ભગવન્દેવતારિઘ્ન દેવદેવામ્બિકાપતે ।
SP0240022 કિમર્થં વયમાહૂતા આજ્ઞાપય કૃતં હિ તત્ ॥

SP0240031 કિં સાગરાઞ્છોષયામો યમં વા સહ કિંકરૈઃ ।
SP0240032 હન્મો મૃત્યુમુતામૃત્યુર્ન ભવત્વદ્ય પદ્મજઃ ॥

SP0240041 બદ્ધ્વેન્દ્રં સહ દેવૈશ્ચ સવિષ્ણું સહ વાયુના ।
SP0240042 આનયામઃ સુસંક્રુદ્ધા દૈત્યાન્વા સહ દાનવૈઃ ॥

SP0240051 કસ્યાદ્ય વ્યસનં ઘોરં કરિષ્યામસ્તવાજ્ઞયા ।
SP0240052 કસ્ય વાદ્યોત્સવં દેવ સર્વકામસમૃદ્ધિમત્ ॥

SP0240061 તાંસ્તથાવાદિનઃ સર્વાન્નમતો ભક્તવત્સલઃ ।
SP0240062 ઉવાચ દેવઃ સમ્પૂજ્ય ગણાન્ગણપતિર્ભવઃ ॥

SP0240070 દેવ ઉવાચ ।
SP0240071 શ ૃણુધ્વં યત્કૃતે યૂયમિહાહૂતા જગદ્ધિતાઃ ।
SP0240072 શ્રુત્વા ચ પ્રયતાત્માનઃ કુરુધ્વં તદશઙ્કિતાઃ ॥

SP0240081 નન્દીશ્વરોઽયં પુત્રો નઃ સર્વેષામીશ્વરેશ્વરઃ ।
SP0240082 પ્રિયોઽગ્રનાયકશ્ચૈવ સેનાનીર્વઃ સમાહિતઃ ॥

SP0240091 તમિમં મમ સંદેશાદ્યૂયં સર્વેઽભિસમ્મતાઃ ।
SP0240092 સેનાન્યમભિષિઞ્ચધ્વં મહાયોગપતિં પતિમ્ ॥

SP0240101 અદ્યપ્રભૃતિ યુષ્માકમયં નન્દીશ્વરઃ શુભઃ ।
SP0240102 પ્રિયો ગૌરવયુક્તશ્ચ સેનાનીરમરઃ પ્રભુઃ ॥

SP0240110 સનત્કુમાર ઉવાચ ।
SP0240111 એવમુક્તે ભગવતા ગણપાઃ સર્વ એવ તે ।
SP0240112 એવમસ્ત્વિતિ સમ્મન્ત્ર્ય સમ્ભારાનાહરંસ્તતઃ ॥

SP0240121 તસ્ય રૂપાશ્રયં દિવ્યં જામ્બૂનદમયં શુભમ્ ।
SP0240122 આસનં મેરુસંકાશં મનોરમમથાહરન્ ॥

SP0240131 શાતકુમ્ભમયં ચાપિ ચારુચામીકરપ્રભમ્ ।
SP0240132 મુક્તાદામાવલમ્બં ચ મણિરત્નાવભાસિતમ્ ॥

SP0240141 સ્તમ્ભૈશ્ચ વૈડૂર્યમયૈઃ કિઙ્કિણીજાલસંવૃતમ્ ।
SP0240142 ચારુરત્નકસંયુક્તં મણ્ડપં વિશ્વતોમુખમ્ ।
SP0240143 કૃત્વા ચક્રુશ્ચ તન્મધ્યે તદાસનવરં શુભમ્ ॥

SP0240151 તસ્યાગ્રતઃ પાદપીઠં નીલં વજ્રાવભાસિતમ્ ।
SP0240152 ચક્રુઃ પાદપ્રતિષ્ઠાર્થં કલશૌ ચાસ્ય પાર્શ્વગૌ ।
SP0240153 સમ્પૂર્ણૌ પરમામ્ભોભિરરવિન્દાવૃતાનનૌ ॥

SP0240161 અગ્રતોઽગ્નિં સમાધાય વૃષભં ચાપિ પાર્શ્વતઃ ।
SP0240162 સવત્સાં સુરભિં ચાપિ તસ્ય પાર્શ્વેઽથ દક્ષિણે ॥

SP0240171 છત્રં શતશલાકં ચ જામ્બૂનદમયં શુભમ્ ।
SP0240172 શઙ્ખહારામ્બુગૌરેણ પૃષ્ઠેનાભિવિરાજિતમ્ ॥

SP0240181 વ્યજનં ચન્દ્રશુભ્રં ચ હેમદણ્ડં સુચારુમત્ ।
SP0240182 માલાં કુશેશયાનાં ચ ભ્રમરાવલિસેવિતામ્ ॥

SP0240191 આનિન્યુસ્તત્ર ગણપા નન્દ્યાવર્તાંશ્ચ કાઞ્ચનાન્ ।
SP0240192 પુનર્વસું ચ પુષ્યં ચ દ્વૌ મત્સ્યૌ વરુણાલયૌ ॥

SP0240201 સ્વસ્તિકં વર્ધમાનં ચ શ્રીવત્સં ચૈવ કાઞ્ચનમ્ ।
SP0240202 કીચકા વેણવશ્ચૈવ કન્યા ચૈવાભિપૂજિતા ॥

SP0240211 ઐરાવતં સુપ્રતીકં ગજાવેતૌ ચ પૂજિતૌ ।
SP0240212 ધ્વજં ચ પૂજિતં દિવ્યં શઙ્ખં ચૈવેન્દુવર્ચસમ્ ॥

SP0240221 કલશાનાં સહસ્રં ચ કાઞ્ચનાનાં સુવર્ચસામ્ ।
SP0240222 રાજતાનાં સહસ્રં ચ પાર્થિવાનાં તથૈવ ચ ॥

SP0240231 તામ્રાણામથ દિવ્યાનાં સહસ્રમનલત્વિષામ્ ।
SP0240232 વાસોયુગં વૃક્ષજં ચ વિરજઃ સૂક્ષ્મમેવ ચ ॥

SP0240241 મુકુટં કાઞ્ચનં ચૈવ સુકૃતં વિશ્વકર્મણા ।

SP0240242 કુણ્ડલે ચામલે દિવ્યે વજ્રં ચૈવ વરાયુધમ્ ॥

SP0240251 પટ્ટિસં ચ મહદ્દિવ્યં શૂલં ચાશનિમેવ ચ ।
SP0240252 જામ્બૂનદમયં સૂત્રં કેયૂરદ્વયમેવ ચ ॥

SP0240261 હારં ચ મણિચિત્રાશણ્ગં રોચનારુચકં તથા ।
SP0240262 નલભાં પારિયાત્રં ચ વર્ષં કશણ્કણિમેવ ચ ॥

SP0240271 દર્ભાંશ્ચ દિવ્યાં સમિધમાજ્યં ધૂપમથાપિ ચ ।
SP0240272 સમન્તાન્નિન્યુરવ્યગ્રા ગણપા દેવસમ્મતાઃ ॥

SP0240281 તતો દિશઃ સમુદ્રાશ્ચ વરુણઃ સધનેશ્વરઃ ।
SP0240282 યમોઽગ્નિર્વસવશ્ચૈવ ચન્દ્રાદિત્યૌ ગ્રહૈઃ સહ ॥

SP0240291 તારારૂપાણિ સર્વાણિ નક્ષત્રાણિ ધ્રુવસ્તથા ।
SP0240292 રુદ્રા રક્ષાંસિ યક્ષાશ્ચ અશ્વિનૌ દૈત્યદાનવાઃ ॥

SP0240301 ગન્ધર્વાપ્સરસશ્ચૈવ નારદઃ પર્વતસ્તથા ।
SP0240302 પૃથિવી ચ સમુદ્રાશ્ચ વર્ષાણિ ગિરયસ્તથા ॥

SP0240311 વૃક્ષાશ્ચ વીરુધશ્ચૈવ ઓષધ્યશ્ચ મહાબલાઃ ।
SP0240312 નદ્યઃ સર્વાઃ સમાજગ્મુઃ પશવશ્ચૈવ સર્વશઃ ॥

SP0240321 લોકસ્ય માતરશ્ચૈવ પૃથિવી સ્વર્ગ એવ ચ ।
SP0240322 ભૂતાનિ પ્રકૃતિશ્ચૈવ ઇન્દ્રિયાણિ ચ સર્વશઃ ॥

SP0240331 તીર્થાનિ ચૈવ સર્વાણિ દાનાનિ વિવિધાનિ ચ ।
SP0240332 ઋચો યજૂંષિ સામાનિ અથર્વાશિણ્ગરસાવપિ ॥

SP0240341 યજ્ઞાશ્ચ ક્રતવશ્ચૈવ ઇષ્ટયો નિયમાસ્તથા ।
SP0240342 છન્દાંસિ ચૈવ સર્વાણિ પિશાચા દેવયોનયઃ ।
SP0240343 બ્રહ્મા ચ ઋષયશ્ચૈવ વિષ્ણુઃ સાનુચરસ્તથા ॥

SP0240351 તેષ્વાગતેષુ સર્વેષુ ભગવાન્ગોવૃષધ્વજઃ ।
SP0240352 સર્વકાર્યવિધિં કર્તુમાદિદેશ પિતામહમ્ ॥

SP0240361 એકૈકં કલશં તત્ર સર્વૌષધિસમન્વિતમ્ ।
SP0240362 કૃત્વાદ્ભિઃ પૂરયિત્વા ચ કુશેશયમુખાવૃતમ્ ॥

SP0240371 જયાં ચ વિજયાં ચૈવ સિંહીં વ્યાઘ્રીં તથૈવ ચ ।
SP0240372 સુવર્ચલાં શશણ્ખપુષ્પીં વિષ્ણુક્રાન્તાં પુનર્નવામ્ ॥

SP0240381 કુમારીં ચન્દ્રકાન્તાં ચ મૃતસંજીવનીમપિ ।
SP0240382 આદિત્યવર્ચસં ચૈવ અમૃતાં શ્રીનિકેતનામ્ ॥

SP0240391 તથા કુમુદ્વતીં ચૈવ પ્રાક્ષિપંસ્તેષ્વથૌષધીઃ ।
SP0240392 પાર્થિવેષુ તદા વ્યાસ સર્વેષ્વેવ ગણેશ્વરાઃ ॥

SP0240401 સૌવર્ણેષુ તુ સર્વેષુ તીર્થાનિ વિવિધાનિ ચ ।
SP0240402 દાનાનિ ચૈવ સર્વાણિ ભગવાન્સંન્યવેશયત્ ॥

SP0240411 રાજતેષુ ચ કુમ્ભેષુ મન્ત્રાંશ્છન્દાંસિ ચૈવ હ ।
SP0240412 ક્રતૂનન્યાંશ્ચ વિવિધા ઇષ્ટીઃ કામ્યાંસ્તથેતરાન્ ॥

SP0240421 ઔદુમ્બરેષુ સર્વેષુ સરિતઃ સાગરાંસ્તથા ।
SP0240422 તપાંસિ નિયમાંશ્ચૈવ ભગવાનભ્યવિન્યસત્ ॥

SP0240431 એકૈકં કલશં તત્ર અભિપૂર્યાભિમન્ત્ર્ય ચ ।
SP0240432 વેષ્ટયિત્વા ચ સૂત્રેણ દેવેભ્યઃ પ્રદદૌ વિભુઃ ॥

SP0240441 સ જગ્રાહ તદા બ્રહ્મા એકં કલશમાત્મના ।
SP0240442 વિષ્ણવે ચ દદાવેકમેકમિન્દ્રાય ધીમતે ।
SP0240443 ગણપેભ્યસ્તથા ચાન્યાનૃષિભ્યશ્ચ પિતામહઃ ॥

SP0240451 તતસ્તમાસને તસ્મિન્નુપવેશ્ય મહામનાઃ ।
SP0240452 અર્ચયિત્વા તતો બ્રહ્મા સ્વયમેવાભ્યષિઞ્ચત ॥

SP0240461 તતો વિષ્ણુસ્તતઃ શક્રો ઋષયશ્ચ સહામરૈઃ ।
SP0240462 ગણાધિપાશ્ચ સર્વે તે અભ્યષિઞ્ચન્ત નન્દિનમ્ ॥

SP0240471 વાસોયુગં ચ તદ્દિવ્યં ગન્ધાન્દિવ્યાંસ્તથૈવ ચ ।
SP0240472 કેયૂરે કુણ્ડલે ચૈવ મુકુટં હારમેવ ચ ।
SP0240473 પટ્ટિસં શૂલવજ્રે ચ અશનીં ચ દદૌ સ્વયમ્ ॥

SP0240481 છત્રં જગ્રાહ દેવેન્દ્રો વાયુર્વ્યજનમેવ ચ ।
SP0240482 ઋષયસ્તુષ્ટુવુશ્ચૈવ પિતામહપુરોગમાઃ ॥

SP0240490 વિષ્ણુરુવાચ ।
SP0240491 નમઃ કુષ્માણ્ડરાજાય વજ્રોદ્યતકરાય ચ ।
SP0240492 શાલશણ્કાયનપૌત્રાય હલમાર્ગોત્થિતાય ચ ॥

SP0240501 શિલાદસ્ય ચ પુત્રાય રુદ્રજપ્યકરાય ચ ।
SP0240502 રુદ્રભક્તાય દેવાય નમોઽન્તર્જલશાયિને ॥

SP0240511 ગણાનાં પતયે ચૈવ ભૂતાનાં પતયે નમઃ ।
SP0240512 ઉમાપુત્રાય દેવાય પટ્ટિસાયુધધારિણે ॥

SP0240521 નમો દંષ્ટ્રાકરાલાય લલાટનયનાય ચ ।
SP0240522 પ્રમથાય વરેણ્યાય ઈશાનાયાર્પિતાય ચ ॥

SP0240531 દ્વારાધ્યક્ષાય શૂરાય સુયશાપતયે નમઃ ।
SP0240532 નમઃ પ્રવરમાલાય ક્ષીરોદનિલયાય ચ ॥

SP0240541 મહાગણાધિપતયે મહાયોગેશ્વરાય ચ ।
SP0240542 દિણ્ડિમુણ્ડાય ચણ્ડાય એકાક્ષરરતાય ચ ॥

SP0240551 અક્ષયાયામૃતાયૈવ અજરાયામરાય ચ ।
SP0240552 પશૂનાં પતયે ચૈવ જેત્રે મૃત્યોસ્તથૈવ ચ ॥

SP0240561 નમઃ પવનવેગાય સર્વજ્ઞાયાજિતાય ચ ।
SP0240562 અનેકશિરસે ચૈવ અનેકચરણાય ચ ॥

SP0240571 કિરીટિને કુણ્ડલિને મહાપરિઘબાહવે ।
SP0240572 સર્વાન્દેવાન્ગણાંશ્ચૈવ પાહિ દેવ નમોઽસ્તુ તે ॥

SP0240580 સનત્કુમાર ઉવાચ ।
SP0240581 એવં સ્તુત્વા તતો દેવસ્તસ્મૈ વ્યાસ મહાત્મને ।
SP0240582 પ્રાઞ્જલિઃ પ્રયતો ભૂત્વા જયશબ્દં ચકાર હ ॥

SP0240591 તતો ગણા જયેત્યૂચુસ્તતો દેવાસ્તતોઽસુરાઃ ।
SP0240592 તતઃ સર્વાણિ ભૂતાનિ બ્રહ્મા શક્રસ્તથૈવ ચ ॥

SP0240601 તતઃ શશ્ણખાંશ્ચ ભેરીંશ્ચ પટહાડમ્બરાંસ્તથા ।
SP0240602 વંશાંશ્ચ પણવાંશ્ચૈવ કૃકવાન્ગોવિષાણિકાન્ ॥

SP0240611 દિણ્ડિમાન્વેણુકાંશ્ચૈવ મર્દલાંશ્ચૈવ સર્વશઃ ।
SP0240612 અવાદયન્ત ગણપા હર્ષયન્તો મુદા યુતાઃ ॥

SP0240620 સનત્કુમાર ઉવાચ ।
SP0240621 નન્દીશ્વરસ્ય ય ઇમં સ્તવં દેવાભિનિર્મિતમ્ ।
SP0240622 પઠેત સતતં મર્ત્યઃ સ ગચ્છેન્મમ લોકતામ્ ॥

SP0240631 નમો નન્દીશ્વરાયેતિ કૃત્વા યઃ સ્વપ્નમાચરેત્ ।
SP0240632 તસ્ય કુષ્માણ્ડરાજેભ્યો ન ભયં વિદ્યતે ક્વચિત્ ॥

SP0240641 યત્રાયં સ્થાપ્યતે નિત્યં સ્તવઃ પરમપૂજિતઃ ।
SP0240642 ન ભયં તત્ર ભવતિ ગ્રહેભ્યો વ્યાસ સર્વદા ॥

SP0240651 નન્દીશ્વરં યે પ્રણમન્તિ મર્ત્યા નિત્યં પ્રસન્નેન્દ્રિયશુદ્ધસત્ત્વાઃ ।
SP0240652 તે દેવદેવસ્ય સહાદ્રિપુત્ર્યા ઇષ્ટા વરિષ્ઠાશ્ચ ગણા ભવન્તિ ॥

SP0249999 ઇતિ સ્કન્દપુરાણે ચતુર્વિંશતિમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૨૪

SP0240010 સનત્કુમાર ઉવાચ ।
SP0240011 તે ગણેશા મહાસત્ત્વાઃ સર્વે દેવેશ્વરેશ્વરાઃ ।
SP0240012 પ્રણમ્ય દેવં દેવીં ચ ઇદં વચનમબ્રુવન્ ॥

SP0240021 ભગવન્દેવતારિઘ્ન દેવદેવામ્બિકાપતે ।
SP0240022 કિમર્થં વયમાહૂતા આજ્ઞાપય કૃતં હિ તત્ ॥

SP0240031 કિં સાગરાઞ્છોષયામો યમં વા સહ કિંકરૈઃ ।
SP0240032 હન્મો મૃત્યુમુતામૃત્યુર્ન ભવત્વદ્ય પદ્મજઃ ॥

SP0240041 બદ્ધ્વેન્દ્રં સહ દેવૈશ્ચ સવિષ્ણું સહ વાયુના ।
SP0240042 આનયામઃ સુસંક્રુદ્ધા દૈત્યાન્વા સહ દાનવૈઃ ॥

SP0240051 કસ્યાદ્ય વ્યસનં ઘોરં કરિષ્યામસ્તવાજ્ઞયા ।
SP0240052 કસ્ય વાદ્યોત્સવં દેવ સર્વકામસમૃદ્ધિમત્ ॥

SP0240061 તાંસ્તથાવાદિનઃ સર્વાન્નમતો ભક્તવત્સલઃ ।
SP0240062 ઉવાચ દેવઃ સમ્પૂજ્ય ગણાન્ગણપતિર્ભવઃ ॥

SP0240070 દેવ ઉવાચ ।
SP0240071 શ ૃણુધ્વં યત્કૃતે યૂયમિહાહૂતા જગદ્ધિતાઃ ।
SP0240072 શ્રુત્વા ચ પ્રયતાત્માનઃ કુરુધ્વં તદશશિણ્કતાઃ ॥

SP0240081 નન્દીશ્વરોઽયં પુત્રો નઃ સર્વેષામીશ્વરેશ્વરઃ ।

SP0240082 પ્રિયોऽગ્રનાયકશ્ચૈવ સેનાનીર્વઃ સમાહિતઃ ॥

SP0240091 તમિમં મમ સંદેશાદ્યૂયં સર્વેऽભિસમ્મતાઃ ।
SP0240092 સેનાન્યમભિષિઞ્ચધ્વં મહાયોગપતિં પતિમ્ ॥

SP0240101 અદ્યપ્રભૃતિ યુષ્માકમયં નન્દીશ્વરઃ શુભઃ ।
SP0240102 પ્રિયો ગૌરવયુક્તશ્ચ સેનાનીરમરઃ પ્રભુઃ ॥

SP0240110 સનત્કુમાર ઉવાચ ।
SP0240111 એવમુક્તે ભગવતા ગણપાઃ સર્વ એવ તે ।
SP0240112 એવમસ્ત્વિતિ સમ્મન્ત્ર્ય સમ્ભારાનાહરંસ્તતઃ ॥

SP0240121 તસ્ય રૂપાશ્રયં દિવ્યં જામ્બૂનદમયં શુભમ્ ।
SP0240122 આસનં મેરુસંકાશં મનોરમમથાહરન્ ॥

SP0240131 શાતકુમ્ભમયં ચાપિ ચારુચામીકરપ્રભમ્ ।
SP0240132 મુક્તાદામાવલમ્બં ચ મણિરત્નાવભાસિતમ્ ॥

SP0240141 સ્તમ્ભૈશ્ચ વૈડૂર્યમયૈઃ કિઙ્કિણીજાલસંવૃતમ્ ।
SP0240142 ચારુરત્નકસંયુક્તં મણ્ડપં વિશ્વતોમુખમ્ ।
SP0240143 કૃત્વા ચક્રુશ્ચ તન્મધ્યે તદાસનવરં શુભમ્ ॥

SP0240151 તસ્યાગ્રતઃ પાદપીઠં નીલં વજ્રાવભાસિતમ્ ।
SP0240152 ચક્રુઃ પાદપ્રતિષ્ઠાર્થં કલશૌ ચાસ્ય પાર્શ્વગૌ ।
SP0240153 સમ્પૂર્ણૌ પરમામ્ભોભિરરવિન્દાવૃતાનનૌ ॥

SP0240161 અગ્રતોऽગ્નિં સમાધાય વૃષભં ચાપિ પાર્શ્વતઃ ।
SP0240162 સવત્સાં સુરભિં ચાપિ તસ્ય પાર્શ્વેऽથ દક્ષિણે ॥

SP0240171 છત્રં શતશલાકં ચ જામ્બૂનદમયં શુભમ્ ।
SP0240172 શઙ્ખહારામ્બુગૌરેણ પૃષ્ઠેનાભિવિરાજિતમ્ ॥

SP0240181 વ્યજનં ચન્દ્રશુભ્રં ચ હેમદણ્ડં સુચારુમત્ ।
SP0240182 માલાં કુશેશયાનાં ચ ભ્રમરાવલિસેવિતામ્ ॥

SP0240191 આનિન્યુસ્તત્ર ગણપા નન્દ્યાવર્તાંશ્ચ કાઞ્ચનાન્ ।
SP0240192 પુનર્વસું ચ પુષ્યં ચ દ્વૌ મત્સ્યૌ વરુણાલયૌ ॥

SP0240201 સ્વસ્તિકં વર્ધમાનં ચ શ્રીવત્સં ચૈવ કાઞ્ચનમ્ ।
SP0240202 કીચકા વેણવશ્ચૈવ કન્યા ચૈવાભિપૂજિતા ॥

SP0240211 ઐરાવતં સુપ્રતીકં ગજાવેતૌ ચ પૂજિતૌ ।
SP0240212 ધ્વજં ચ પૂજિતં દિવ્યં શશણ્ખં ચૈવેન્દુવર્ચસમ્ ॥

SP0240221 કલશાનાં સહસ્રં ચ કાઞ્ચનાનાં સુવર્ચસામ્ ।
SP0240222 રાજતાનાં સહસ્રં ચ પાર્થિવાનાં તથૈવ ચ ॥

SP0240231 તામ્રાણામથ દિવ્યાનાં સહસ્રમનલત્વિષામ્ ।
SP0240232 વાસોયુગં વૃક્ષજં ચ વિરજઃ સૂક્ષ્મમેવ ચ ॥

SP0240241 મુકુટં કાઞ્ચનં ચૈવ સુકૃતં વિશ્વકર્મણા ।
SP0240242 કુણ્ડલે ચામલે દિવ્યે વજ્રં ચૈવ વરાયુધમ્ ॥

SP0240251 પટ્ટિસં ચ મહદ્દિવ્યં શૂલં ચાશનિમેવ ચ ।
SP0240252 જામ્બૂનદમયં સૂત્રં કેયૂરદ્વયમેવ ચ ॥

SP0240261 હારં ચ મણિચિત્રાશણ્ગં રોચનારુચકં તથા ।
SP0240262 નલભાં પારિયાત્રં ચ વર્ષં કશણ્કણિમેવ ચ ॥

SP0240271 દર્ભાંશ્ચ દિવ્યાં સમિધમાજ્યં ધૂપમથાપિ ચ ।
SP0240272 સમન્તાન્નિન્યુરવ્યગ્રા ગણપા દેવસમ્મતાઃ ॥

SP0240281 તતો દિશઃ સમુદ્રાશ્ચ વરુણઃ સધનેશ્વરઃ ।
SP0240282 યમોઽગ્નિર્વસવશ્ચૈવ ચન્દ્રાદિત્યૌ ગ્રહૈઃ સહ ॥

SP0240291 તારારૂપાણિ સર્વાણિ નક્ષત્રાણિ ધ્રુવસ્તથા ।
SP0240292 રુદ્રા રક્ષાંસિ યક્ષાશ્ચ અશ્વિનૌ દૈત્યદાનવાઃ ॥

SP0240301 ગન્ધર્વાપ્સરસશ્ચૈવ નારદઃ પર્વતસ્તથા ।
SP0240302 પૃથિવી ચ સમુદ્રાશ્ચ વર્ષાણિ ગિરયસ્તથા ॥

SP0240311 વૃક્ષાશ્ચ વીરુધશ્ચૈવ ઓષધ્યશ્ચ મહાબલાઃ ।
SP0240312 નદ્યઃ સર્વાઃ સમાજગ્મુઃ પશવશ્ચૈવ સર્વશઃ ॥

SP0240321 લોકસ્ય માતરશ્ચૈવ પૃથિવી સ્વર્ગ એવ ચ ।
SP0240322 ભૂતાનિ પ્રકૃતિશ્ચૈવ ઇન્દ્રિયાણિ ચ સર્વશઃ ॥

SP0240331 તીર્થાનિ ચૈવ સર્વાણિ દાનાનિ વિવિધાનિ ચ ।
SP0240332 ઋચો યજૂંષિ સામાનિ અથર્વાશિણ્ગરસાવપિ ॥

SP0240341 યજ્ઞાશ્ચ ક્રતવશ્ચૈવ ઇષ્ટયો નિયમાસ્તથા ।
SP0240342 છન્દાંસિ ચૈવ સર્વાણિ પિશાચા દેવયોનયઃ ।

SP0240343 બ્રહ્મા ચ ઋષયશ્ચૈવ વિષ્ણુઃ સાનુચરસ્તથા ॥

SP0240351 તેષ્વાગતેષુ સર્વેષુ ભગવાન્ગોવૃષધ્વજઃ ।
SP0240352 સર્વકાર્યવિધિં કર્તુમાદિદેશ પિતામહમ્ ॥

SP0240361 એકૈકં કલશં તત્ર સર્વૌષધિસમન્વિતમ્ ।
SP0240362 કૃત્વાદ્ભિઃ પૂરયિત્વા ચ કુશેશયમુખાવૃતમ્ ॥

SP0240371 જયાં ચ વિજયાં ચૈવ સિંહીં વ્યાઘ્રીં તથૈવ ચ ।
SP0240372 સુવર્ચલાં શશણ્ખપુષ્પીં વિષ્ણુક્રાન્તાં પુનર્નવામ્ ॥

SP0240381 કુમારીં ચન્દ્રકાન્તાં ચ મૃતસંજીવનીમપિ ।
SP0240382 આદિત્યવર્ચસં ચૈવ અમૃતાં શ્રીનિકેતનામ્ ॥

SP0240391 તથા કુમુદ્વતીં ચૈવ પ્રાક્ષિપંસ્તેષ્વથૌષધીઃ ।
SP0240392 પાર્થિવેષુ તદા વ્યાસ સર્વેષ્વેવ ગણેશ્વરાઃ ॥

SP0240401 સૌવર્ણેષુ તુ સર્વેષુ તીર્થાનિ વિવિધાનિ ચ ।
SP0240402 દાનાનિ ચૈવ સર્વાણિ ભગવાન્સંન્યવેશયત્ ॥

SP0240411 રાજતેષુ ચ કુમ્ભેષુ મન્ત્રાંશ્છન્દાંસિ ચૈવ હ ।
SP0240412 ક્રતૂનન્યાંશ્ચ વિવિધા ઇષ્ટીઃ કામ્યાંસ્તથેતરાન્ ॥

SP0240421 ઔદુમ્બરેષુ સર્વેષુ સરિતઃ સાગરાંસ્તથા ।
SP0240422 તપાંસિ નિયમાંશ્ચૈવ ભગવાનભ્યવિન્યસત્ ॥

SP0240431 એકૈકં કલશં તત્ર અભિપૂર્યાભિમન્ત્ર્ય ચ ।
SP0240432 વેષ્ટયિત્વા ચ સૂત્રેણ દેવેભ્યઃ પ્રદદૌ વિભુઃ ॥

SP0240441 સ જગ્રાહ તદા બ્રહ્મા એકં કલશમાત્મના ।
SP0240442 વિષ્ણવે ચ દદાવેકમેકમિન્દ્રાય ધીમતે ।
SP0240443 ગણપેભ્યસ્તથા ચાન્યાનૃષિભ્યશ્ચ પિતામહઃ ॥

SP0240451 તતસ્તમાસને તસ્મિન્નુપવેશ્ય મહામનાઃ ।
SP0240452 અર્ચયિત્વા તતો બ્રહ્મા સ્વયમેવાભ્યષિઞ્ચત ॥

SP0240461 તતો વિષ્ણુસ્તતઃ શક્રો ઋષયશ્ચ સહામરૈઃ ।
SP0240462 ગણાધિપાશ્ચ સર્વે તે અભ્યષિઞ્ચન્ત નન્દિનમ્ ॥

SP0240471 વાસોયુગં ચ તદ્દિવ્યં ગન્ધાન્દિવ્યાંસ્તથૈવ ચ ।
SP0240472 કેયૂરે કુણ્ડલે ચૈવ મુકુટં હારમેવ ચ ।

SP0240473 પટ્ટિસં શૂલવજ્રે ચ અશનીં ચ દદૌ સ્વયમ્ ॥

SP0240481 છત્રં જગ્રાહ દેવેન્દ્રો વાયુર્વ્યજનમેવ ચ ।
SP0240482 ઋષયસ્તુષ્ટુવુશ્ચૈવ પિતામહપુરોગમાઃ ॥

SP0240490 વિષ્ણુરુવાચ ।
SP0240491 નમઃ કુષ્માણ્ડરાજાય વજ્રોદ્યતકરાય ચ ।
SP0240492 શાલશણ્કાયનપૌત્રાય હલમાર્ગોત્થિતાય ચ ॥

SP0240501 શિલાદસ્ય ચ પુત્રાય રુદ્રજપ્યકરાય ચ ।
SP0240502 રુદ્રભક્તાય દેવાય નમોઽન્તર્જલશાયિને ॥

SP0240511 ગણાનાં પતયે ચૈવ ભૂતાનાં પતયે નમઃ ।
SP0240512 ઉમાપુત્રાય દેવાય પટ્ટિસાયુધધારિણે ॥

SP0240521 નમો દંષ્ટ્રાકરાલાય લલાટનયનાય ચ ।
SP0240522 પ્રમથાય વરેણ્યાય ઈશાનાયાર્પિતાય ચ ॥

SP0240531 દ્વારાધ્યક્ષાય શૂરાય સુયશાપતયે નમઃ ।
SP0240532 નમઃ પ્રવરમાલાય ક્ષીરોદનિલયાય ચ ॥

SP0240541 મહાગણાધિપતયે મહાયોગેશ્વરાય ચ ।
SP0240542 દિણ્ડિમુણ્ડાય ચણ્ડાય એકાક્ષરરતાય ચ ॥

SP0240551 અક્ષયાયામૃતાયૈવ અજરાયામરાય ચ ।
SP0240552 પશૂનાં પતયે ચૈવ જેત્રે મૃત્યોસ્તથૈવ ચ ॥

SP0240561 નમઃ પવનવેગાય સર્વજ્ઞાયાજિતાય ચ ।
SP0240562 અનેકશિરસે ચૈવ અનેકચરણાય ચ ॥

SP0240571 કિરીટિને કુણ્ડલિને મહાપરિઘબાહવે ।
SP0240572 સર્વાન્દેવાન્ગણાંશ્ચૈવ પાહિ દેવ નમોઽસ્તુ તે ॥

SP0240580 સનત્કુમાર ઉવાચ ।
SP0240581 એવં સ્તુત્વા તતો દેવસ્તસ્મૈ વ્યાસ મહાત્મને ।
SP0240582 પ્રાઞ્જલિઃ પ્રયતો ભૂત્વા જયશબ્દં ચકાર હ ॥

SP0240591 તતો ગણા જયેત્યૂચુસ્તતો દેવાસ્તતોઽસુરાઃ ।
SP0240592 તતઃ સર્વાણિ ભૂતાનિ બ્રહ્મા શક્રસ્તથૈવ ચ ॥

SP0240601 તતઃ શશ્ણખાંશ્ચ ભેરીંશ્ચ પટહાડમ્બરાંસ્તથા ।

SP0240602 વંશાંશ્ચ પણવાંશ્ચૈવ કૃકવાન્ગોવિષાણિકાન્ ॥

SP0240611 દિણ્ડિમાન્વેણુકાંશ્ચૈવ મર્દલાંશ્ચૈવ સર્વશઃ ।
SP0240612 અવાદયન્ત ગણપા હર્ષયન્તો મુદા યુતાઃ ॥

SP0240620 સનત્કુમાર ઉવાચ ।
SP0240621 નન્દીશ્વરસ્ય ય ઇમં સ્તવં દેવાભિનિર્મિતમ્ ।
SP0240622 પઠેત સતતં મર્ત્યઃ સ ગચ્છેન્મમ લોકતામ્ ॥

SP0240631 નમો નન્દીશ્વરાયેતિ કૃત્વા યઃ સ્વપ્નમાચરેત્ ।
SP0240632 તસ્ય કુષ્માણ્ડરાજેભ્યો ન ભયં વિદ્યતે ક્વચિત્ ॥

SP0240641 યત્રાયં સ્થાપ્યતે નિત્યં સ્તવઃ પરમપૂજિતઃ ।
SP0240642 ન ભયં તત્ર ભવતિ ગ્રહેભ્યો વ્યાસ સર્વદા ॥

SP0240651 નન્દીશ્વરં યે પ્રણમન્તિ મર્ત્યા નિત્યં પ્રસન્નેન્દ્રિયશુદ્ધસત્ત્વાઃ ।
SP0240652 તે દેવદેવસ્ય સહાદ્રિપુત્ર્યા ઇષ્ટા વરિષ્ઠાશ્ચ ગણા ભવન્તિ ॥

SP0249999 ઇતિ સ્કન્દપુરાણે ચતુર્વિંશતિમોઽધ્યાયઃ ॥

---

## સ્કંદપુરાણ અધ્યાય ૨૫

SP0250010 સનત્કુમાર ઉવાચ ।
SP0250011 તતસ્તત્રાગતાન્દેવાન્દેવતાધિપતિર્ભવઃ ।
SP0250012 મરુતઃ પ્રાહ સમ્પૂજ્ય કન્યાર્થં સદસત્પતિઃ ॥

SP0250021 મરુતો યે મહાવેગા મહાસત્ત્વા મહૌજસઃ ।
SP0250022 આમન્ત્ર્ય નામ્ના તાનીશઃ સશક્રઃ સપિતામહઃ ॥

SP0250031 યુષ્માકં સુયશા કન્યા સુભગા દિવ્યરૂપિણી ।
SP0250032 દાતુમર્હથ તાં સુભ્રૂં સ્નુષાં મહ્યં મહાબલાઃ ॥

SP0250040 મરુત ઊચુઃ ।
SP0250041 ત્વમસ્માકં ચ તસ્યાશ્ચ સર્વસ્ય જગતસ્તથા ।
SP0250042 પ્રભવિષ્ણુસ્ત્રિલોકેશ ન તુ યાચિતુમર્હસિ ॥

SP0250051 ત્વયૈવ દેયા ગ્રાહ્યા ચ ત્વં નો ગતિરનુત્તમા ।

SP0250052 મા નઃ પરાનિવેશાન યાચનેન વિભાવય ॥

SP0250061 પિતા નઃ કશ્યપઃ શ્રીમાન્મરીચિશ્ચ પિતામહઃ ।
SP0250062 પિતામહપિતા બ્રહ્મા તસ્યાપિ ત્વં પિતામહઃ ।
SP0250063 સ ત્વં પિતામહોઽસ્માકં ન પરાન્કર્તુમર્હસિ ॥

SP0250071 સ એવમુક્તો દેવેશો મરુદ્ભિર્દેવસત્તમૈઃ ।
SP0250072 સુયશાં મરુતાં કન્યામાનયામાસ તત્ક્ષણાત્ ॥

SP0250081 સ્વયં હોતાસ્ય તત્રાસીદ્બ્રહ્મા લોકપિતામહઃ ।
SP0250082 કશ્યપશ્ચ તથોદ્ગાતા અત્રિઃ સામ સ્વયં જગૌ ।
SP0250083 અથર્વાશિઙ્ગરસૌ દેવૌ બ્રહ્મત્વમપિ ચક્રતુઃ ॥

SP0250091 નારદઃ પર્વતશ્ચૈવ ચિત્રસેનશ્ચ ગાયનઃ ।
SP0250092 વિશ્વાવસૂ રુચિશ્ચૈવ હાહા હૂહૂ તથૈવ ચ ॥

SP0250101 તથા શાલિશિરા યશ્ચ વિશ્રુતો ગણ્ડમણ્ડકઃ ।
SP0250102 ઈતિશ્ચૈવેન્દ્રવાહશ્ચ યજ્ઞવાહોઽથ દક્ષિણઃ ।
SP0250103 એતે ચાન્યે ચ ગન્ધર્વા જગુર્મધુરકણ્ઠિનઃ ॥

SP0250111 ઉર્વશી ચૈવ રમ્ભા ચ ઘૃતાચી પૂર્વચિત્ત્યપિ ।
SP0250112 તિલોત્તમા ચ વિશ્વાચી અન્યાશ્ચાપ્સરસઃ શુભાઃ ।
SP0250113 અનૃત્યન્ત મહાભાગા નૃત્તં સુરમનોહરમ્ ॥

SP0250120 સનત્કુમાર ઉવાચ ।
SP0250121 સ એવમભવદ્વ્યાસ વિવાહસ્તસ્ય ધીમતઃ ।
SP0250122 નન્દિનો ગણમુખ્યસ્ય અનૌપમ્યો હ્યનિન્દિતઃ ॥

SP0250131 તતઃ સ તુ કૃતોદ્વાહો નન્દી ગત્વા મહામનાઃ ।
SP0250132 પાદાન્વવન્દે દેવસ્ય દેવ્યા બ્રહ્મણ એવ ચ ।
SP0250133 શિલાદસ્ય ચ લોકેશઃ શ્રિયા પરમયા યુતઃ ॥

SP0250140 દેવ ઉવાચ ।
SP0250141 વરં વૃણીષ્વ પુત્ર ત્વં સ્નુષા ચેયં તવ પ્રિયા ।
SP0250142 વરં દદામિ તે વત્સ અનયા સહમીપ્સિતમ્ ॥

SP0250150 નન્દ્યુવાચ ।
SP0250151 ભગવન્યદિ તુષ્ટોઽસિ ત્વયિ ભક્તિર્દૃઢાસ્તુ મે ।
SP0250152 સદા ચ તુષ્ટો ભવ મે સામ્બઃ સહ ગણેશ્વરૈઃ ॥

SP0250161 પિતરં ચૈવ મે દેવ ઉત્પાદકમિમં પ્રભો ।
SP0250162 અનુગ્રહેણ યુક્તેન યોક્તુમર્હસિ કામદ ॥

SP0250170 દેવ ઉવાચ ।
SP0250171 સદાહં તવ નન્દીશ સુતુષ્ટઃ સગણેશ્વરઃ ।
SP0250172 પાર્વત્યા સહિતો ધીમન્નિદં ચ શ◌ૃણુ મે વચઃ ॥

SP0250181 સદેષ્ટશ્ચ વરિષ્ઠશ્ચ પરમૈશ્વર્યસંયુતઃ ।
SP0250182 મહાયોગી મહેષ્વાસો મહાબલપરાક્રમઃ ॥

SP0250191 અજય્યશ્ચૈવ જેતા ચ પૂજ્યેજ્યશ્ચ સદા ભવ ।
SP0250192 અહં યત્ર ભવાંસ્તત્ર યત્ર ત્વં તત્ર ચાપ્યહમ્ ॥

SP0250201 અયં ચ તે પિતા વિપ્રઃ પરમૈશ્વર્યસંયુતઃ ।
SP0250202 ભવિષ્યતિ ગણાધ્યક્ષો મહાગણપતિર્મમ ॥

SP0250211 પર્વતં ચાસ્ય વૈભ્રાજં કામગં સર્વકાઞ્ચનમ્ ।
SP0250212 ઉપેતં ભવનૈર્દિવ્યૈઃ પ્રયચ્છામિ જનાવૃતમ્ ।
SP0250213 તેનાયં સર્વલોકેષુ ચરિષ્યતિ યથેપ્સિતમ્ ॥

SP0250221 સ્થાનં શ્રીપર્વતે ચાસ્ય ભવિષ્યતિ સુપૂજિતમ્ ।
SP0250222 ભૃગૌ તસ્મિંશ્ચ યઃ પ્રાણાંસ્ત્યક્ષ્યતે વૈ સુધાર્મિકઃ ।
SP0250223 સ કામચારી વૈભ્રાજે ગણપોઽસ્ય ભવિષ્યતિ ॥

SP0250230 સનત્કુમાર ઉવાચ ।
SP0250231 તતો દેવી મહાભાગા શૈલાદેરદદદ્વરમ્ ।
SP0250232 સોઽબ્રવીત્ત્વયિ ભક્તિર્મે સદૈવાનપગા ભવેત્ ॥

SP0250241 તતો મરુત્સુતા ચૈવ ઉભાભ્યામપિ ચોદિતા ।
SP0250242 વરં વૃણુ યથેષ્ટં વૈ તાવિદં પ્રત્યુવાચ હ ॥

SP0250251 યુવયોરસ્તુ ભક્તિર્મે તથા ભર્તરિ ચૈવ હિ ।
SP0250252 નિત્યં ચાનપગા સ્યાન્મે ધર્મે ચ મતિરુત્તમા ।
SP0250253 એતદિચ્છામિ દેવેશૌ વરં વરસહસ્રદૌ ॥

SP0250260 સનત્કુમાર ઉવાચ ।
SP0250261 તતસ્તાવેવમેતત્તે ભવિતેતિ શુચિસ્મિતે ।
SP0250262 ઊચતુર્મુદિતૌ દેવૌ સ્નુષાં તાં વરવર્ણિનીમ્ ॥

SP0250271 ગણાશ્ચાસ્ય તતોઽભ્યેત્ય સર્વે દેવપ્રિયેપ્સયા ।
SP0250272 વરં દદુર્મહાસત્ત્વાઃ સ વવ્રે કાઞ્ચનપ્રભઃ ॥

SP0250281 યુષ્માસુ મમ ભક્તિશ્ચ ઐશ્વર્યં ચાપિ સમ્મતમ્ ।
SP0250282 વશ્યાશ્ચ યૂયં સર્વે મે પ્રિયો યુષ્માકમેવ ચ ॥

SP0250290 ગણા ઊચુઃ ।
SP0250291 ભવાન્મન્તાનુમન્તા ચ ગતિરાગતિરેવ ચ ।
SP0250292 અસ્માકમીશઃ સર્વેષાં દેવાનામપિ ચેશ્વરઃ ॥

SP0250301 કુષ્માણ્ડાનાં વરિષ્ઠશ્ચ રુદ્રાણાં ત્વં મહાબલઃ ।
SP0250302 ઈતીનાં દ્વારપાલશ્ચ પ્રમથાનાં તથૈવ ચ ॥

SP0250311 મહાબલો મહાયોગી સેનાનીસ્ત્વં હિ નો મતઃ ।
SP0250312 ત્વં ભૂતો ભૂતનેતા ચ નાયકોઽથ વિનાયકઃ ॥

SP0250321 ગ્રહાણામધિપશ્ચૈવ ઉગ્રદણ્ડધરસ્તથા ।
SP0250322 ત્વમગ્રયોધી શત્રુઘ્નસ્ત્વં વીરસ્ત્વં દિવસ્પતિઃ ॥

SP0250331 મહાનુભાવસ્ત્વં ચૈવ ક્ષીરોદનિલયશ્ચ હ ।
SP0250332 જપ્યેશ્વરનિકેતશ્ચ જપ્યેશ્વરવિભાવિતઃ ॥

SP0250341 ભાવનઃ સર્વભૂતાનાં વરદો વરદાર્ચિતઃ ।
SP0250342 અસ્માકં વરદશ્ચૈવ ભવ ભૂતેશ્વર પ્રભો ॥

SP0250350 સનત્કુમાર ઉવાચ ।
SP0250351 સ એવં ગણપૈઃ સર્વૈઃ સ્તુતો નન્દીશ્વરો વિભુઃ ।
SP0250352 ઉવાચ પ્રણતઃ સર્વાન્બ્રૂત કિં કરવાણિ વઃ ॥

SP0250361 ત એવમુક્તા ગણપાઃ સર્વ એવ મહાબલાઃ ।
SP0250362 ઊચુસ્તં દિવ્યભાવજ્ઞા દેવદેવસ્ય સંનિધૌ ॥

SP0250371 ત્વમસ્માકં ગણાધ્યક્ષઃ કૃતો દેવેન શમ્ભુના ।
SP0250372 અસ્માભિશ્ચાભિષિક્તસ્ત્વં નાયકો ધર્મદાયકઃ ॥

SP0250381 સ ત્વં શિવશ્ચ સૌમ્યશ્ચ ગુણવાનગુણેષ્વપિ ।
SP0250382 ક્ષમાશૌચદમોપેતો ભવ નઃ પ્રિયકૃત્સદા ॥

SP0250390 સનત્કુમાર ઉવાચ ।

SP0250391 એવમુક્તસ્તદા સર્વાન્પ્રણમ્ય બહુમાનતઃ ।
SP0250392 શિરસ્યઞ્જલિમાધાય ગણપાનસ્તુવત્તદા ॥

SP0250400 નન્દ્યુવાચ ।
SP0250401 નમો વઃ સર્વભૂતેભ્યો નમો યોગિભ્ય એવ ચ ।
SP0250402 નમશ્ચાપ્યનિકેતેભ્યો યોગીશેભ્યો નમસ્તથા ॥

SP0250411 નમઃ કામચરેભ્યશ્ચ નમ ઉગ્રેભ્ય એવ ચ ।
SP0250412 મૃત્યુભ્યશ્ચ યમેભ્યશ્ચ કાલેભ્યશ્ચ નમો નમઃ ॥

SP0250421 નમઃ કાઞ્ચનમાલેભ્યઃ સર્વધર્મિભ્ય એવ ચ ।
SP0250422 નમો વો વધકેભ્યશ્ચ અવધ્યેભ્યસ્તથૈવ ચ ॥

SP0250431 નમઃ પરમયોગિભ્યો જટિભ્યશ્ચ નમો નમઃ ।
SP0250432 નમો વોઽદૃશ્યરૂપેભ્યો વિકૃતેભ્યસ્તથૈવ ચ ॥

SP0250441 નમો વલ્કલવાસેભ્યઃ કૃત્તિવાસેભ્ય એવ ચ ।
SP0250442 નમઃ શ્વેતામ્બરસ્રગ્ભ્યશ્ચિત્રસ્રગ્ભ્યો નમો નમઃ ॥

SP0250451 ધાવદ્ભ્યશ્ચ દ્રવદ્ભ્યશ્ચ પ્રસ્થિતેભ્યો નમો નમઃ ।
SP0250452 નમો મુનિભ્યો ગાયદ્ભ્યો જપદ્ભ્યશ્ચ નમો નમઃ ॥

SP0250461 નમઃ શરભરૂપેભ્યઃ શતરૂપેભ્ય એવ ચ ।
SP0250462 નમઃ પર્વતવાસેભ્યો વ્યાઘ્રરૂપેભ્ય એવ ચ ॥

SP0250471 નમો માર્જારરૂપેભ્યઃ કાકકોકેભ્ય એવ ચ ।
SP0250472 નમો દૈવતરૂપેભ્યઃ પવનેભ્યસ્તથૈવ ચ ॥

SP0250481 નમોઽગ્નિભ્યસ્તથાદ્ભ્યશ્ચ વરુણેભ્યસ્તથૈવ ચ ।
SP0250482 નમો ધનેશરૂપેભ્યઃ સર્વરૂપિભ્ય એવ ચ ॥

SP0250491 નમશ્ચોદરવક્ત્રેભ્યઃ સર્વવક્ત્રેભ્ય એવ ચ ।
SP0250492 નમો વામનરૂપેભ્યો વામરૂપેભ્ય એવ ચ ॥

SP0250501 દેવાસુરમનુષ્યાણામાપ્યાયિભ્યો નમો નમઃ ।
SP0250502 નમો વઃ સર્વભૂતાનાં નમો વઃ સર્વતઃ શુભાઃ ॥

SP0250511 ગ્રહેભ્યશ્ચ નમો વોઽસ્તુ મોક્ષેભ્યશ્ચ નમસ્તથા ।
SP0250512 શુભેભ્યશ્ચ નમો વોઽસ્તુ અશુભેભ્યસ્તથૈવ ચ ।
SP0250513 મમ સૌમ્યાઃ શિવાશ્ચૈવ ભવન્તુ ગણનાયકાઃ ॥

SP0250521 ઇતિ સ્તુતા ગણપતયો મહાબલાઃ શુભૈર્વચોભિઃ સુરશત્રુનાશનાઃ ।
SP0250522 દિશન્તુ મે સુખમતુલં સુખપ્રદા બલં ચ વીર્યં સ્થિરતાં
ચ સંયુગે ॥

SP0250531 તપોઽક્ષયં સ્થાનમથાતુલાં ગતિં યશસ્તથાગ્ર્યં બહુ
ધર્મનિત્યતામ્ ।
SP0250532 દિશન્તુ સર્વં મનસેપ્સિતં ચ મે સુરેશ્વરાઃ પુષ્ટિમનુત્તમાં
તથા ॥

SP0250540 સનત્કુમાર ઉવાચ ।
SP0250541 ઇમૌ નન્દિગણેન્દ્રાણાં સ્તવૌ યોઽધ્યેતિ નિત્યશઃ ।
SP0250542 સોઽશ્વમેધાવભૃથવત્સર્વપાપૈઃ પ્રમુચ્યતે ॥

SP0250551 સન્ધ્યાયામપરસ્યાં તુ જપન્પાપં દિવાકૃતમ્ ।
SP0250552 પૂર્વસ્યાં સંત્યજેદ્વાપિ સર્વરાત્રિકૃતં જપન્ ॥

SP0250560 સનત્કુમાર ઉવાચ ।
SP0250561 તતસ્તે ગણપાઃ સર્વે સંસ્તુતાસ્તેન ધીમતા ।
SP0250562 નિસૃષ્ટાશ્ચ તદા જગ્મુઃ પ્રણિપત્ય વૃષધ્વજમ્ ॥

SP0250571 દેવાશ્ચ સર્વલોકાશ્ચ તતો દેવઃ સ્વયં પ્રભુઃ ।
SP0250572 સૃષ્ટ્વા નન્દીશ્વરગૃહં પ્રદાય ચ મહામનાઃ ।
SP0250573 ઈપ્સિતં સહ દેવ્યા વૈ જગામ સ્થાનમવ્યયમ્ ॥

SP0250581 ય ઇમં નન્દિનો જન્મ વરદાનં તથૈવ ચ ।
SP0250582 અભિષેકં વિવાહં ચ પઠેદ્વા શ્રાવયીત વા ।
SP0250583 બ્રાહ્મણઃ સ મૃતો યાતિ નન્દીશ્વરસલોકતામ્ ॥

SP0250591 યો નિયતસ્તુ પઠેત્પ્રયતાત્મા સર્વમિમં પ્રણતો ભવભક્ત્યા ।
SP0250592 સોઽપિ ગતઃ પરલોકવિચારી નન્દિસમોઽનુચરો હિ મમ સ્યાત્ ॥

SP0259999 ઇતિ સ્કન્દપુરાણે પઞ્ચવિંશતિમોઽધ્યાયઃ ॥

Text available at Institute of Indian Studies of the University of Groningen
http://www.theol.rug.nl/ bakker/sptm
AdhyAya 26-52 are in preparation.

*Skandapurana Chapters 1-25*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*